The Lord Kālacakra is expressed as existent with the nature of the five *paṭalas* in the order as spoken. The *Tantrarāja* is the appellation given to the collection of *paṭalās* manifesting the Lord. The expressed and the expression i.e., the Lord and the *Tantrarāja* are mutually related as to be expressed (*vācya*) and expressive of (*vācaka*). The Lord Kālacakra is the (one) to be expressed as existent with the nature of the qualities described in the five *paṭalas*. The *tantra* named *Kālacakra* consisting of five *paṭalas* is expressive of the nature of the Lord Kālacakra. Thus the nature of the Lord Ādi Buddha is to be expressed and the Lord Ādi Buddha expresses

the *tantra* text. The accumulation of merits by giving the ordinary initiation after entering into the *maṇḍala* is the necessity of this exposition. The accumulation of merit and knowledge in order to obtain accomplishment in the *Mahāmudrā* with the fourth extraordinary initiation into the great *Prajñā* is the necessity of necessity of the exposition.

Since the system is built up with Time (*Kāla*) as the central point of realisation for the removal of ignorance and attainment of emancipation our text deals with movement of planets and astronomical calculations in an exhaustive manner. These Buddhists were great masters of astronomy and *tithi, vāra, karaṇa, nakṣatra* etc. have figured prominently in their theories. Astrology also plays an important role in the text. In keeping with the traditions of tantras our text uses symbolic expressions to denote numerals.

Very interesting are the verses (I. 127-147) which deal with the *Yantras*, a type of magical but mechanical contrivances used to destroy the enemies, their castles or forts and also to protect their own castles or places. These *yantras* numbering twelve are broadly of three types ;

I. Seven types of *yantras* to lay siege to an enemy fort and capture it ;

II. Two types of *yantras* to defend one's own places ;

III. Three types of *yantras* of triumph to enjoy peace and prosperity after conquering over the enemy.

A striking similarity with the purpose of the use of these *yantras* can be noticed in the practice of the Etruskan priests who fought to scare away their Roman adversaries in 399 B.C. by holding fire and snakes in their hands. (cf. H. Kuhn, Die Entfaltung der Menschheit, p. 146). In an illuminating paper (Transaction no. 10. The Indian Institute of Culture, Bangalore) Dr. V. Raghavan has dealt with the *yantras* or mechanical contrivances in Ancient India, but the *yantras* of our text are different in form and character from those mentioned by Raghavan.

It will be evident to any student of Sanskrit language that our text abounds in un-Paninian or ungrammatical Sanskrit forms, but these should not be corrected or changed inasmuch as these Buddhist Sanskrit writers did not care for grammatically correct Sanskrit and that is but a peculiarity of such texts They wanted only to express their ideas clearly and forcefully, no matter how much ungrammatical the language becomes. They paid more attention to meaning than to correct forms. The *Vimalaprabhā* has dwelt on this problem at length.

In the following pages we will find that the Tantra text, particularly in cases of mathematical and astronomical calculations and computations, is couched in a language not easily understandable. Even with the help of Tibetan and Sanskrit commentaries and sub-commentaries many problems are difficult to be solved. In our *Study* we will offer only suggestions to those problems. It is absolutely necessary to find out some text or commentary dealing with these problems before we can reach to a satisfactory solution of those problems.

ॐ नमः श्रीकालचक्राय[1]

सर्वज्ञं ज्ञानकायं दिनकरवपुषं पद्मपत्रायताक्षं
बुद्धं सिंहासनस्थं सुरवरनमितं मस्तकेन प्रणम्य ।
पृच्छेद्राजा सुचन्द्रः करकमलपुटं स्थापयित्वोत्तमाङ्गे[a]
योगं श्रीकालचक्रे कलियुगसमये मुक्तिहेतोर्नराणां ॥ १ ॥

शून्यं ज्ञानञ्च बिन्दुं वरकुलिशधरं बुद्धदेवासुरांश्च
बाह्ये देहे परे च प्रकृतिषु पुरुषं पञ्चविंशात्मकञ्च ।
देहे विश्वस्य मानं त्रिभुवनरचनां भुक्ति देवासुराणा-[b]
मेतद् व्याख्या हि सम्यक् त्रिदशनरगुरो मण्डलं चाभिषेकं ॥ २ ॥

तुष्टोऽहन्ते सुचन्द्र प्रवरसुरनरै राक्षसै दैत्यनागै-
र्न ज्ञातं वीतरागैः परममुनिकुलै र्यत्त्वया पृष्टमेतत् ।
निर्वाणाद्यं धरान्तं पदगतिसहितं देहमध्ये समस्तं
योगं व्याख्यायमानं [2]शृणु सुनरपते मण्डलं चाभिषेकं ॥ ३ ॥

कालाच्छून्येषु[3] वायु र्ज्वलन जलधरा द्वीप शैलाः समुद्राः
[4]ऋक्षाणीन्द्वर्कतारा ग्रहगण ऋषयो देवभूताश्च नागाः ।
तिर्यग्योनिश्चतुर्धा विविध[5] महितले मानुषा नारकाश्च
संभूताः शून्यमध्ये लवणमिव जले त्वण्डजाश्चाण्डमध्ये ॥ ४ ॥

---

1. P. ओं नमः श्री वज्रसत्त्वाय, *Tib.* dpal dus kyi 'k'or lo la p'yag 'c'al lo.
2. CL. शृणुष्व नरपते ; *Tib.* mi yi bdag po bzaṅ po ñon.
3. L. काला तुल्येषु , *Tib.* dus kyi stoṅ pa rnams las.
4. L. सक्षोणिः , rgyu skar.
5. L. द्विविध , sna c'ogs.

a. yan lag mc'og la bžag nas žus pa ni.
b. lus la sna c'ogs daṅ srid pa gsum gyi bkod pa lha daṅ lha min rnams kyi loṅs spyod daṅ.

काये ज्ञानाम्बरे वे पवन हवि[a] जले भूस्थिरे अङ्गमे च
दिव्यादृष्टौ च सृष्टौ दशविधभुवने वर्णिते वज्रकाये ।
संभूति मन्त्रयोनि भवति नरपते मुक्तिरत्रैव भूयः
[b]एवं यो वेत्ति सम्यग् [1]ज्ञानं भवति पशुश्चित्तसंकल्पमुक्तः ॥ ५ ॥

वामाङ्गे श्वेतदोषि जंग्दमृतकणा[2] दक्षिणे रक्तवर्णा
राहुः कालाग्निचन्द्रौ रविशशितनयौ मोमशुक्रौ गुरुश्च ।
केतुर्मन्दश्च वृष्टिः[3] पविजलशिखिनः सप्तयुग्मानि लाके
दोषानां विद्यमाना[4] भुवि विगततमा[5] युग्ममेकन्तमोऽन्ते[c] ॥ ६

पृष्ठे पीता च तारा सुरधनुरवनिः सा चतुर्धा द्विभेदा
प्राणो नामैक[6] वायु भवति दशविधो मूर्ध्नि मूले च पूर्व
मध्ये वज्रार्धबीजं गुणगणसहिता संस्थिताधः स्वशक्ति-
र्ज्ञानं सर्वत्र शून्यं शिवपदसहितं सर्वभावे विमुक्तं । ७ ॥

आद्यास्त्रिंशत् स्वरा ये हयरवलयुतास्ते [7]कणेन्दा दिनैश्च
काद्यान् वर्गान् समात्रांश्चरति दिनकरः शून्य षड्वह्निमानैः ।
छाया मात्राश्च नाड्यः[d] सुरनरफणिनो भूतयोनिश्च मन्त्राः
इत्यादौ कादियुक्तं भवति खलु नृपोत्पत्तिरेवं[8] त्रिधातोः ॥ ८ ॥

---

1. PD. न स भवति
2. PD. कला
3. CL. विष्टिः ; c'ar dan
4. P. विद्यमानानि
5. P. भुवि गततमो
6. CLD. नामैक
7. P. कनेन्दो D. कलेन्दो
8. CLD. रव

a. me dan
b. de ltar gan gis yan dag rig pa de ni p'yugs min sems kyi kun tu rtog pa dag las grol
c. 'jig rten la ni gnas pa ñid te mun pa med pa zun gcig dag ni mun pa'i mt'a' la'o
d. ha sogs dbyans rnams dag kyan c'u c'od

जन्मस्थानं स्वराणां[1] क च ट त प युत ष्कादि[2] संयोजितानां
कण्ठे तालूर्ध्वभागे ख पवन हृविजे चोष्ठदन्तेऽम्बुभूम्योः ।
आदेरुष्णीषचक्रे हृदिगल[3]शिरसि नाभिचक्रे क्रमेण
विश्वे कृष्णे च रक्ते शशिकनकनिभे स्कन्धधात्वाविदेवे ॥ ९ ॥

ᵃवाय्वन्तान् मेरुसीम्नो नरकफणिपुरं योजनानां द्विलक्षं
मेरो र्लक्षं प्रमाणं ग्रहगणनिलयात् पञ्चविंशत् सहस्रं ।
ग्रीवा पञ्चाशदास्यं ध्रुवपदमचलं पञ्चविंशत्तथैव
तद्बाह्ये शून्यमेकं त्रिभुवनरहितं निर्गुणं तत्त्वहीनं ॥ १० ॥

ᵇवाय्वन्ताद् वायुसीम्नः स्थिरधरणितले द्वीपशैलाः समुद्रा-
श्चत्वार्यर्धं द्विलक्षं शिखिचलवलयं योजनानां द्विलक्षं ।
मध्यं मेरो रूर्ध्वं भ्रमति दिननिशं राशिचक्रं सतारं
षड्भागे द्वि द्विलक्षं त्रिभुवनसकलं कालयोगात् प्रजातं ॥ ११ ॥

तिर्यग्मानस्य वृत्तं त्रिगुणमपि भवेल्लोकधातोः समन्तात्
भूमे वृत्तं त्रिलक्षं जलशिखिमरुतां [4]षण्णवार्कं क्रमेण ।
यद्बाह्ये लक्षमेकं त्रिभुवननिलये योजनानां नरेन्द्र
ᶜतद्देहे हस्तमेकं क्षितितलनिलये स्व स्व मानेन सम्यक् ॥ १२ ॥

1. CL. सुराणां ; dbyaṅs ni.
2. P. प त युतं कादि D. त प युतः कादि
3. PD. शिरसोर्
4. L. खण्डवार्क , drug dgu ñi ma rim pas sc-

a. rluṅ gi mt'a' nas lhun po'i mc'ams su dmyal ba daṅ ni gdeṅs čan groṅ k'yer la ni dpag c'ad 'bum p'rag gñis.

b. rluṅ gi mt'a' nas rluṅ gi mc'ams daṅ brtan pa 'jin ma'i gži la gliṅ daṅ ri daṅ rgya mc'o rnams.

c. de ni sa yi steṅ gi gnas su bus la raṅ raṅ dag gi c'ad kyis yaṅ dag k'ru gaṅ ṅo.

सूक्ष्मे[1] रष्टाभिरेको ह्यनुरिह्मणुभिः सूक्ष्मबालाग्रमेभिः[2]
[a]राजियूका यवश्चागुंलमुरगयवैरंगुलैरर्कयुग्मे-
र्हस्तो हस्तैश्चतुर्भि र्धनुरिह धनुषा स्यात् सहस्रद्वयेन
क्रोशः क्रोशैश्चतुर्भि र्दिवि भुवि गगने याजनं तेन मानं ॥ १३ ॥

आदौ सौधर्मकल्पं युगयुगयुगलं ब्रह्मलोकोत्तरश्च
श्चाकल्पं श्वेतकल्पं सुवसित[3] भुवनात्[4] कामम[5]कादशश्च ।
चत्वारश्चाद्यरूपा[6]ह मिथुनरहिता षोड्शा यादिरूपा[b]
ह्याद्या लान्ताश्च कामाः प्रकट दशविधा व्यञ्जनान्येकः कः सः[7] ॥ १४ ॥

एकत्रिशद्भवैश्च[8] त्रिभव इह भवेद्धातुभेदात् त्रिधातु[9]-
रेतद् वज्रत्रयं स्यात् त्रिभुवनसकलं चादिकादिप्रभेदैः ।
रत्नाभात्[10] शर्करान्भो[11] निगदितनरको बालुकाम्भो द्वितीयः
पंकाम्भस्तीव्रधूमो हरि[12] रपि च तमो रौरवः सप्तमश्च[c] ॥ १५ ॥

क्षारो मद्याम्बुदुग्धा दधिघृतमधुराः सागराः सप्तशैलाः
नीलाभो[13] मन्दराद्रि[14]र्निषद्ध[15] मणिकरो द्रोणशीताद्रिवज्राः ।
द्वीपं चन्द्रं सिताभं वरपरमकुशं किन्नरं भोगभूमौ
क्रौञ्चं[16]रौद्रश्च जम्बु[17]र्निवसति मनुजः सप्तमं कर्मभूमौ[18] ॥ १६ ॥

---

1. CL. सूक्ष्मौ
2. PD. बालाग्रमेभी
3. CL. स्ववशितं
4. L. भुवना
5. L. कोशमे
6. CLD. °द्यरूपो
7. D. षः
8. CL. भवश्च
9. CL. त्रिधातो D. भेदास् त्रिधातो
10. CLD. रत्नाम्भः
11. L. शुर्कराहो
12. D. हवि
13. L. नोलाम्भो
14. P. मन्दराद्रेर्
15. D. निष्ध
16. P, क्रोञ्चं
17. P. जम्बु निवसति
18. CLD. कर्मभूमिः

a. 'di rnams kyis ni ske c'e sig dan nas te ltos 'gro nas kyis sor te sor mo ñi ma ni.
b. gzugs med dag ni a sogs bži bo ha 'k'rig bral ba rnams te i la sogs pa bču drug gzugs.
c. 'dam gyi č'u dan mi bzad ñu ba dag dan me dan mun pa dan ni ñu 'bod bdun pa dan

पूर्वं वायूर्ध्ववृत्तं[1] भवति नरपते दक्षिणेऽग्निस्त्रिकोणं
पूर्णेन्दुं चोत्तरेऽधो[2] वरवरुणकमलेः पश्चिमे चाब्धिकोणं ।
शून्याकारः सुमेरुर्वरकुलिशमयो मध्यता मण्डलानां
शैला नागा ग्रहा दिक्[3] भवति भुवितलं योजनानां सहस्रं ॥ १७ ॥

मेरो विस्तारमूर्ध्वं क्षितितलनिलये योजनानां सहस्रं
पञ्चाशत् षोडशैकं प्रवरभुवितले चक्रवालस्य सम्यक् ।
ऊर्ध्वं शृंगानि पञ्च क्षितितलनिलये सर्वदिक्चक्रवालं
तद्बाह्ये द्वीपशैलास्त्वपि जलनिधयः सर्वदिग्वह्निवायुः ॥ १८ ॥

सर्वैकैकं सहस्रं षडपि जलधयश्चन्द्र चन्द्रैकहीना
द्वीपान्येवं[4] सहस्रं वर[5]कुलगिरयः पञ्चविंशत् सहस्रं ।
जम्बुद्वीपं विशालं लवनजलनिधेरर्धलक्षं प्रमाणं
[a]तद्वद्वह्नेश्च[6] वायो स्त्रिभुवनधरणस्यान्तिमस्य प्रमाणं ॥ १९ ॥

ब्रह्माण्डे कालचक्रं जिनवरसहितं संस्तुतं देववृन्दै-
र्मेरौ[7] गीर्वाणचक्रं त्ववनितलगतं पञ्चवर्णं ह्यहीनां ।
श्रीमेरोः सर्वदिक्षु क्षितिवलयगतं सर्वपीठोपपीठं
क्षेत्रं छन्दोह[8] मेलापक चिति[9] भुवनं वह्निवाय्वन्तसीम्नः[b] ॥ २० ॥

1. P. वाय्वर्धवृत्तं
2. PD. चोत्तरेम्बो
3. L. ग्रहादिर्
4. CL. द्वीपाद्येवं
5. L. बलकुल
6. CL. तद्वद्वग्नेश्च
7. D. मेरोर्
8. D. छन्दो ह मेलापक
9. L. चित्ति

a. srid pa gsum po 'jin pa yin ni mt'a' ma dag gi me daṅ rluṅ gi c'ad dag de bžin no.

b. žiṅ daṅ 'dun pa dag daṅ 'dus pa čan daṅ ro k'aṅ gnas ni me daṅ rluṅ gi mc'ams kyi mt'ar.

पूर्वे शक्रोऽग्निरग्नौ यमदनुवरुणा याम्यदैत्यापरेषु
वायुर्यक्षो हरश्चानिल धनद हरेषूर्ध्वभागे[1] त्वधश्च ।
[a]ब्रह्मा विष्णुः सशस्त्राः[2] परिजनसहिताः स्व स्व [3]दिग्रक्षपाला-
[b]स्तन्मध्ये कालचक्रो जिनवरजनकोऽनाहतो वज्रकायः ॥ २१ ॥

मेरोः पृष्ठेषु दिक्षु भ्रमति भुवितले दुर्जयो दानवानां
यस्मिन् धर्मो विनष्टो वहति कलियुगं तत्र तत्र[4] प्रयाति ।
हत्वा म्लेच्छांश्च युद्धे विचरति पुरतः स्थापयित्वा स्वधर्मं
कृत् त्रेता द्वापरं वै कलियुगमपरं वर्तते कालयोगात् ॥ २२ ॥

यस्मिन् खण्डे स चक्री प्रविशति बलवान् कृत्युगं तत्र याति
त्रेता पृष्ठे च राज्ञः कलिरपि पुरतो द्वापरं च द्विमध्ये ।
विंशत्येकं सहस्रं रसशतसहितं वर्षमानं युगानां
एकैकस्य प्रमाणं युगपरगुणितं मानताब्दे शतं यत् ॥ २३ ॥

सूक्ष्मोच्छ्वास ध्रु नाडि दिन ध्रु[5] यु । सहस्रैक[6] त्रिंशच्छतैश्च
षड्भि र्मानं क्रमेण त्वनु तनुज नृणां भूतदेवासुराणां ।
शक्ते भर्तु र्दिनैकं वहति भुवितले शक्तिमानं युगानां
खण्डे खण्डे च चक्री व्रजति शिवपदं द्वादशार्का दिनैके[7] ॥ २४ ॥

1. P. हरे पूर्व्वभागे
2. L. सशक्राः P. स्वशस्त्राः
3. L. दिग्क्षत्रपालाः
4. CL. तत्र पूर्वं प्रयाति ; de daṅ der ni rab tu bgrod par byed.
5. D. दिनयुग ; p'ra dbugs dhru daṅ c'u c'od ñin žag dhru daṅ.
6. D. सहस्रैक
7. CLD. दिनैकं

a. c'aṅs daṅ k'yab 'jug mc'on ldan 'k'or gyi skye bo daṅ bcas rab raṅ p'yogs ni sruṅ žiṅ skyoṅ ba ste.
b. de rnams dbus su dus kyi 'k'or lo rgyal ba mc'og gi skyed mjad gžom du med pa rdo rje'i sku.

पक्षाः मासाः समस्ता ऋतुयुगसमया अग्निकालोऽयने[1] द्वे
वर्षं राजन् समस्तं त्वनुदिनघटिका लग्नप्राणपलानि ।
एतान्येवं व्रजन्ति त्वनु तनुजनूणां भूतदेवासुराणां
शक्ते भेते दिनैके त्रिभुवननिलये देहमध्ये तथैव ॥ २५ ॥

अद्याब्दात्[2] षट्शताब्दैः प्रकट यशनृपः शम्भलाख्ये भविष्यत्[3]
तस्मान्नागैः शताब्दैः खलु मखविषये म्लेच्छधर्मप्रवृत्तिः ।
[a]तस्मिन् काले धरण्यां स्फुटलघुकरणं मानवै र्वेदितव्यं
सिद्धान्तानां विनाशः सकलभुवितले कालयोगे भविष्यत्[4] ॥ २६ ॥

वह्नौ खेब्धौ विमिश्रं प्रभवमुखगतं म्लेच्छवर्षं प्रसिद्धं
[b]ऊनं म्लेच्छेन्द्रवर्षं करफणिशशिना शेषमर्काहतञ्च ।
मिश्रं चैत्रादिमासैरधरयुगहृतं खाग्निचन्द्रै र्विभक्तं
लब्ध मूर्ध्नि प्रविष्टं भवति नरपते मासपिण्डं विशुद्धं ॥ २७ ॥

मासास्त्रिस्थानभूताः करशिखि गुणिता मध्यराशौ स्थिता ये
मूले षड्भागलब्धं भवति च तदृणं मध्यमे शोधनीयं ।
ऊर्ध्वेऽधो नेत्रत्रिंशत् प्रकटयति धनं मिश्रितं[5]षष्टिभागै-
[c]र्लब्धं मूर्ध्नि प्रविष्टं भवति मुनिवरै श्छेदितः शेषवारः ॥ २८ ॥

---

1. C. कालोने L. कालो अने
2. P, आद्याब्दा D. आद्याब्दात् ; lo 'di nas ni
3. D. भविष्यं
4. P. भविष्यति
5. L. षड् विभागैर् , drug ču'i č a dag gis.

a. de yi dus su 'jin ma la ni ñuṅ ṅu'i byed pa gsal bar mi rnams dag gis rig par bya.

b. kla klo'i dbaṅ po'i lo ni lag pa gdeṅs čan zla bas dman pa'i lhag ma dag kyaṅ ñi mas bsgyur.

c. rñed pa steṅ du rab bsres t'ub pa mč'og rnams dag gis bčad pa'i lhag ma dag ni gza' ru 'gyur.

द्विस्थानेऽर्केन्दुमिश्रं [1]हृतं ऋतुरविना भूतमिश्रं समस्तं
देयं तन् मूर्ध्निराशौ प्रथमकरहृते पिण्डमष्टद्विभक्तं ।
त्रिस्था मध्ये हृतेशास्त्वघरनवगुणे भागलब्धं द्विमिश्रं
ऊनं मध्ये घटीभि र्हृतमपि [2]तु घनं मूर्ध्निराशौ द्विहृत्वा ॥ २९ ॥

युक्तञ्चर्क्षं प्रभक्तो भवति नृप रवेः[3] शेषमृक्षादि भोगे[4]
वारे वारं प्रदेयं द्विगुण नृप घटी पिण्डके द्वे त्वचश्च ।
द्वे चर्क्षे[5] रुद्रनाड्यः प्रकटयति धनं सूर्यभोगे प्रदेयं
एतन् मासं ध्रुवं स्यात् कथितमपि पुन र्मासि मासि प्रदेयं ॥ ३० ॥

देया हेयाश्च देयाः[6] पुनरपि तिथयो वारनाड़ी पदेषु
पिण्डे भागेऽब्धिचन्द्रैः समविषमगते देयहेयौ पदार्थौ ।
शून्ये शून्यं विशुद्धं त्रिदशशशिपदे पञ्चनेत्रार्कयो र्दिक्
तिथ्याख्ये‌कादशोऽग्नौ दशजलधिपदे विंशतिश्चैकहीना ॥ ३१ ॥

द्वाविंशत्[7] पञ्चरन्ध्रे ऋतुवसुनि जिनाः सप्तमे पञ्चविंशत्
[a]तस्मिन्नर्कप्रभेदैः प्रकटितरविका देयहेयाः भवन्ति ।
भूताभूतेषु वेदाः शिखिकरशशिनः पूर्वभागे परे च
पिण्डे[8] भागेऽब्धिचन्द्रैः समविषमगतौ[9] देयहेयश्च चाराः[10] ॥ ३२ ॥

---

1. D. हृतऋतु
2. CL. भुवनं , t'ob pa nor te
3. CLD. वरे , ñi ma'i
4. CL. भागे P. भागो loṅs spyod dag tu 'gyur
5. L. चक्षु , skar mar gñis
6. CLP. देयाहेयाद्यदेया , c'es rnams sbyin daṅ dor daṅ
7. CL. द्वात्रिंशत् , ñi šu rca gñis
8. CL. भोगेऽब्धि , c'ogs kyi č'a la č'u gter
9. P. गते D. गतैर्
10. D. वाराः , rgyu ba rnams ni

a. de la ñi mas rab tu dbye bas gsal byas ñi ma'i rkaṅ pa dag ni sbyin daṅ dor par 'gyur.

सञ्चारेणावशेषं हतमृतु[1]रविना भागलब्धश्च तद्वत्
तत्रैवार्कप्रभेदैः रविपदघटिका देयहेया भवन्ति ।
वेदै स्तिथ्याहतं[2] यत् स्फुटमपि च धनं[3] तत् त्रिभागेन मिश्रं
ऋत्वृक्षं सत्रिपादं तृणमपि च रवेः शोधयेत् भुक्तिमध्ये ॥ ३३ ॥

शिष्टं कार्यं यथारे रसयुगशशिनो मन्दकार्ये पदानि
हत्वा भोगेन नाड्रोः शरगुणशशिभि र्भागलब्धं सभोगं ।
देयं हेयञ्च सूर्ये त्वयनगतिवशात् नान्यथा शुद्धिरस्ति
सूर्ये कालो रसोह्निश्च[4] दशहरहरा रुद्रदिङ्नाग षट् च ॥ ३४ ॥

वह्निः खञ्चायनान्ते[5] भवति धनमृणं चोत्तरे दक्षिणे च
षण्मासे पक्षभेदै श्चरति दिनकरो माससंक्रान्ति भेदात् ।
दत्वा सूर्ये तिथिश्चाप्यधररसहता वारभोगेन मिश्रा
ऊनीभूता शशांको भवति नरपते मिश्रसूर्येन्दु [6]योगः ॥ ३५ ॥

[a]अक्ष्णा तिथ्याहतं यद् गत शशिकरणं सप्तभागावशेषं
शुद्धाब्दा नागमिश्राः[7] ख ख जलधिहताः शोधिता [8]नागमिश्रैः ।
शैलेन्द्वग्नि प्रभक्ता गगनरसहता नाड़िकाद्यादि[9] भक्ता
[b]द्वात्रिंशद्वारनाड्यो ध्रुवकमिह युतं चाब्द संक्रान्ति मासे ॥ ३६ ॥

1. CLD. हतमृदु , bsgyur ba las ni dus daṅ
2. CLD. वेदैर्मिथ्याहतं ; gaṅ žig rig byed rnams kyis č'os bsgyur
3. CL. धरं , nor te
4. P. रसोभिश्च ; ñi ma la ni dus ro klu daṅ
5. CL. खञायनान्ते
6. CLD. भोगः , ñi zla bsres pa sbyor ṅa'o
7. L. मिश्रैः
8. D. रागमिश्रैः ; klu bsres rnams kyis
9. CLPD. नाड़िकाद्यादि , ri la sogs pas bgos pa č'u c'od te

a. byed pa dag ni c'es la mig gis bsgyur ba zla bral gaṅ žig bdun gyl č'a yi lhag ma'o,

b. gñis daṅ sum ču'i gza' daṅ č'u c'od ṅes par 'dir ldan zla ba dag la lo yi 'p'o ba'o.

मेषादौ वारनाड्यां [1]क्रमपरिरचिताः क्षेपणे [2]द्वादशैते
चन्द्रादौ[3] भूतवेदौ गुणशरशशिनः शैलचन्द्रं तृतीये ।
वेदाग्नी भूतचन्द्रौ नयनकरयुगं वेदनेत्राणि षष्ठे
षड्चन्द्रौ बाणचन्द्रौ गिरियुगशिखि षट् चन्द्रवेदाद्रिलोकाः ॥ ३७ ॥

षड्वेदौ शून्य शून्यं नयनशरपदं मीनराशौ रवेश्च
षण्मासं ह्रानिवृद्धि र्भवति दिननिशायाश्च सूर्यप्रचारैः ।
अब्धिघर्णाग्निलिप्ताः प्रतिदिनसमये वृद्धिनाशेऽयनाङ्कैः
मध्ये रात्रेश्च वृद्धि र्भवति हिमगिरावुत्तरे वासरस्य ॥ ३८ ॥

मासा नेत्रार्कमिश्रा नयनविगुणिता[4]श्चन्द्रखर्वेकमिश्राः
खर्वम्भोधि प्रभक्ता मुनिकरगुणिताः खाद्रिभागेन चर्क्षं ।
शिष्टा षष्ठ्या हता ये पुनरपि घटिकामन्त्रैर्विलिप्ता हतास्ते
चक्रं लब्धानवक्त्रं भवति[5] च तमिनः पुच्छमूलार्धमिश्रं ॥ ३९ ॥

मासास्त्रिंशद्धताश्च प्रतिदिनपहिताः शैलखाग्नैश्च लब्धं
त्रिस्था मध्ये विमिश्रं त्वनि जलधिरसै र्लब्धहीनोऽस्फुटाहः ।
शैलत्र्वेकैश्च मिश्रः स्फुटदिवसगणः शैलनागतुभक्तः
शेषश्चर्क्षाहतश्च[6] पुनरपि खरसै र्गण्य शैलादि[7] नाड्यः ॥ ४० ॥

---

1. P. नाड्योः
2. D. द्वादशे ते ; bču gñis di rnams te
3. CL. चन्द्रादी ; zla ba ri
4. L. द्विगुणिता ; mig gis rnam bsgyur
5. D. प्रभवति तमिनः
6. P. हतो हत् पुनरपि
7. CL. शैलानि ; ri la sogs pa

a. t'ob pas dman pa'i 'k'or lo gdon du 'gyur te mun čan mjug ma dag kyan rgyu skar p'yed bsres pa'o.

b. zla ba sum ču bsgyur ba ñin žag so so dag dan bčas pa las ni ri mk'a' ris t'ob pa.

शोध्या सार्धा नवारे यदि ऋणमधिकं चक्रमध्ये विशोध्यं
योज्यं[1] चक्रार्धमर्धाधिकमपि च भवेत् त्यक्तशेषोत्क्रमः स्यात् ।
ऋक्षे षष्ट्याहते युक् प्रभवति घटिका भूतवह्नीन्दुभक्तं
ᵃयल्लब्धं मन्दकर्मण्यपि च धनमृणं चोत्क्रमेण क्रमेण ॥ ४१ ॥

तत्रान्यष्टादशाद्रिः प्रकटगसपदान्यर्धचक्रे त्वधोर्ध्वे
ᵇहन्यात् भोगेन नाड़ो शरगुणशशिभि र्भागलब्धोर्धचक्रात् ।
पूर्वार्धे ग्राह्य इष्टो भवति पदवशात् त्याज्य एव परार्धे
भुक्तं कृत्यैकपिण्डं ग्रहगमनवशाद् देयहेयञ्च नाड्यां ॥ ४२ ॥

सूर्ये भौमा[2] विशोध्यो गुरुरपि रविजः शीघ्रकर्मण्यथैव
सौम्ये शुक्रे च सूर्यः खलु भवति धनं शीघ्रकार्ये क्रमेण ।
शोध्यः[3] शेषोत्र चारो ग्रहचरणपदैः शेषनाड़ी निहत्य
षष्ट्याभागेन लब्धं ग्रहचरणपदाद् ग्राह्य हार्यं तथैव ॥ ४३ ॥

भुक्तं कृत्यैकपिण्डं ग्रहगमनवशाद् देयहेयं समस्तं
भौमे चारा जिनाद्याः प्रकटमनुपदे स्थापनीयाः समस्ताः ।
एवं सर्वग्रहाणां ᶜक्रमपरिगणना[4] वेदितव्या नरेन्द्र
सौम्ये शुक्रे विशुद्धो भवति दिनकरः सौम्यशुक्रौ च सम्यक् ॥ ४४ ॥

1. PD. त्याज्यं ; byed pas lhag par gyur
2. D. भौमे
3. P. शोध्ये
4. CL. परिगमना

a. gaṅ t'ob dal ba'i las dag la yaṅ nor daṅ bu lon dag ni rim pa min daṅ rim pas so.

b. loṅs spyod kyis ni č'u c'od bsgyur las mda' daṅ yon tan zla bas 'k'or lo p'yed las č'a t'ob pa.

c. rim par yoṅs su broi ba rig par bya'o mi'i dbaṅ.

शून्याकाशेन्दु गुण्यं दिनगणसकलं वह्निसूर्याद्रिहीनं
शैलाद्रन्ध्राद्रि[1] नागै ह्रतमपि निहतं शेषं ऋक्षादिभेदैः ।
प्रोक्तैर्भागेन चर्क्षं[2] पुनरपि घटिकाः सौम्यभोगे[3] भवन्ति
सौम्यं त्यक्त्वार्कमध्ये त्यज सुनृप नृपं चार्धमृक्षञ्च[4] सम्यक् ॥ ४५ ॥

शिष्टं कार्यं यथारे भवति धनमृणं मन्दशीघ्रं च कर्म
सौम्ये यत् मन्दकार्ये दशगिरिशिखिनः शीघ्रकार्ये नृपाद्याः ।
[a]कृत्वाहः पिण्डमूनं[5] ख ख रसनयनै र्दन्तवह्न्यब्धि भक्तं
[6]शेषं त्वृक्षघ्नं ऋक्षं पुनरपि घटिका मन्दकार्ये गुरोश्च ॥ ४६ ॥

नक्षत्रं शीघ्यमर्कं हरनवशिखिनो मन्दकार्ये पदानि
भूयः शीघ्रे पदानि प्रकटमनुपदे दिक्पदाद्यानि तानि ।
हृत्वाहः खेन्दुनोनं जलनिधिवसुभि र्भक्तमद्रे जिनाख्यैः
ऋक्षघ्नं श्चर्क्षभोगः[7] पुनरपि घटिका शीघ्रकार्ये भृगोश्च ॥ ४७ ॥

ऋत्वृक्षं शीघ्यमर्के शरयुगशशिनो मन्दकार्ये पदानि
शीघ्रे तत्त्वादिभेदैः प्रकटमनुपदे देयहेयं यथारे[8] ।
[b]ऊनः खाक्ष्यष्टवेदैः स्फुट[9] दिवसगणः षड्रसागाम्बरैर्के—
र्भक्त[10]श्चर्क्षघ्नं ऋक्षं भवति च शनिनः[11] पाद्य[12]मष्टादशाश्च ॥ ४८ ॥

---

1. CLD. रन्ध्रादि ; ri nas bug par ri daṅ
2. P. चक्रं ; rgyu skar 3. CL. भागे ; zla skyes loṅs spyod
4. CLD. चार्धसूक्ष्मश्च ; skar ma 5. D. पिण्डमूलं
6. P. शेषे 7. L. श्चक्षुभोगः 8. CLD. तथैव ; mig dmar bžin
9. CLD. स च दिवस 10. D. भक्तं
11. D. शशिनः ; spen pa 12. D. पाठ्यं

a. ñin žag o'ogs ni mk'a' mk'a' ro daṅ mig gis dman pa byas nas so me ŏ'u gter dag gis bgo.

b. mk'a' mig klu daṅ rig byed kyis dman gsal ba'i ñin žag o'ogs ni drug ro ri mk'a' zla ba yis

यद् द्वाविंशद् दिनत्तुः प्रकटरसपदे शीघ्रकार्ये रसाद्याः
शीघ्रो मन्दश्च चारः क्रमपदगमने वक्र[1] एवोत्क्रमेण ।
पूर्वार्धे चापरार्धे रविगमनवशान् निर्गमश्च ग्रहाणां
[a]सप्तत्रिंशत्सु मासै भवति करहृतैः शीघ्रवक्रश्च केतोः ॥ ४९ ॥

यः कश्चित् सूर्यभोगं प्रविशति निहतं स[2] ग्रहश्चास्तमेति
सूर्यं त्यक्त्वादितः स्याद् अयनगतिविभागेन[3] मार्गश्च तस्य[4] ।
वामे मार्गे[5] स्थितो यो रविगमनवशात् स व्रजत्युत्तरेण
सव्यस्थो दक्षिणेन स्फुटमपि च रिपो युद्धमन्योन्यमत्र ॥ ५० ॥

स्वक्षेत्रे संस्थितानां यदि भवति रिपु निश्चितं तत्र युद्धं
[b]नक्षत्रेऽन्ये न युद्धं खलु भवति समायुक्तिरन्योन्यमत्र ।
वामे चन्द्रप्रवेशो यदि भवति रवौ निर्गमश्चोत्तरेण
वामे शृङ्गोन्नतिः स्यात् क्वचिदयनवशाद् दक्षिणे दक्षिणे च ॥ ५१ ॥

[c]पर्वच्छेदे च राहो व्रजति सममुखः[6] संमुखो ग्रास एव
वामे चारेऽवसव्ये रविगमनवशाद् दक्षिणे सव्यभागे ।
एवं राहु विदिक्षु ग्रसति शशधरं निर्गतं पृष्ठतश्च
अश्विन्याद्यर्ध[7] चित्रं निशिदिवससमा मध्यतो गोलरेखा ॥ ५२ ॥

1. P. चक्र ; 'k'yog po ñid ni rim min gyis

2. L. संग्रह 3. L. विभोगेन 4. L. तस्याः 5. L. मार्गा

6. CL. समसुखः 7. CL. अश्विन्यान्य° ; t'a skar la sogs

a. sum ču rca bdun lag pas bsgyur ba'i zla ba rnams kyis mjug riṅs dag ni myur daṅ 'k'yog por 'gyur.

b. skar ma la ste gžan la 't'ab pa min par ṅes šiṅ 'dir ni p'an c'un mc'uṅs pa dag tu ldan.

c. c'igs 'c'ams su yaṅ sgra gčan gdoṅ daṅ mñam par 'gro ste mṅon du p'yogs par 'jin pa k'o na'o.

ऊर्ध्वं सव्यावसव्ये[1] खलु भुवनपदे संस्थितं राशिभेदै-
श्चापाकारस्तु[2] राशौ शिखिवलयगतं दक्षिणे गोलमध्यात् ।
वामे तच्छीतशैलं [3]सुकमलदलवन् मेष पूर्वे [4]तुलादौ
वह्नेः शीताद्रिसीम्नः ख ख ख शरनगा योजनानां सहस्रं ॥ ५३ ॥

मध्ये चक्रार्धरेखा गमनमपि रवे[5]रेकरात्रं[6] विषौ च
पश्चात् सव्यावसव्यं चरति दिननिशं चक्षभेदैः[7] क्रमेण ।
मार्गाणां [8]खाहिचन्द्रं त्यजति दिननिशं चायनान्तं हि यावत्
हानिर्वृद्धिः षड्ङ्क्षैस्त्वपि रविशशिनोः षष्टिनाड्यां निशाह्नि ॥५४॥

यस्माच्छैले जनानां भवति हि विषुवं मेषसूर्ये तुलार्के
तस्माद् द्व्यष्टे च खण्डे खलु वृषभगते वृश्चिकस्थे तथैव ।
रन्ध्राख्ये वह्निसंख्ये मिथुनधनुगते दिक्प्रमाणे चतुर्थे
मार्त्तण्डे कर्कटस्थेपि च मकरगते पञ्चमेकादशे च ॥ ५५ ॥

सिंहे कुम्भे प्रविष्टे द्विदशरसमहो मीनकन्यागते च
अस्मिन् वामायनं स्यात् मकरगतरवौ कुम्भसूर्य[9] द्वितीये ।
मीने खण्डे तृतीये त्वयनमपि नृणां मेषसूर्ये चतुर्थे
[a]भूताख्येऽर्के[10] वृषस्थे मिथुनगतरवौ षण्महो सप्तमे च ॥ ५६ ॥

---

1. D. सव्यावसव्यं ; Gyas daṅ Gyas min dag la
2. CD. चापाकारातु L. चापाकारार्घ
3. D. स्वकमलदल
4. CL. तु नादौ
5. L. नवेः
6. CLD. रात्रौ
7. L. चक्षु
8. L. खादि
9. CLD. सूर्यो
10. P. भूताख्येऽर्के

a. 'byuṅ ba z̆es byar ñi ma glaṅ la gnas pas 'k'rig par ñi gnas 'sa ni drug pa bdun par yaṅ

मार्तण्डे कर्कटस्थे भवति हरिगते चाष्टमे भूमिखण्डे
कन्या रन्ध्रे तुलार्के भवति च दशमे वृश्चिके रुद्रखण्डे ।
चापस्थे द्वादशे स्यादयनमपि नृणां द्वादशारे च भूम्यां
एवं सव्यायनं स्याद् रविगमनवशात् कर्कटादौ च राशौ ॥ ५७ ॥

ऊर्ध्वं षण् नागसंख्या तपनमपि रवेश्च यने चोत्तरान्ते
तस्मात् क्षीणाश्च सव्ये भवति मध्यते रुद्रसंख्या सहस्रं ।
एकाशीतिः सहस्रं शरशत [1]रहितं मध्यतो गोलरेखा
तस्या यद् वृद्धिपातं भवति च ... पूत्तरे दक्षिणे च ॥ ५८ ॥

क्षाराब्धिं लंघयित्वा व्रजति दिनकरो दक्षिणे यावदग्निं
कैलासस्योत्तरेण व्रजति हिमगिरिं चोत्तरे चोत्तरस्थः ।
बाणस्तिथ्याहताश्च व्रजति दिगयने योजनानां सहस्रं
सार्धक्षाहीन्दुलब्धं त्यजति दिनदिने [2]पञ्चभूभृत् सहस्रात् ॥ ५९ ॥

राशा[3]वेके स्थितोर्कः सकलमृतुगणं मासपक्षान्[4] करोति
खण्डे खण्डे च मासो भवति भुवितले द्वादशारे क्रमेण ।
[a]यन् [5]मानः यत्र खण्डे भवति दिनवशात् सप्तमे तन् निशायां
[b]त्रैलक्षादर्धमार्गे दिनमपि पुरतः पृष्ठतोऽर्कस्य रात्रिः ॥ ६० ॥

---

1. CLD. शतसहितं ; m̃da' ni brgya daṅ bral bar gyur pa
2. CLD. पञ्चभूतः ; lṅa daṅ sa 'jin
3. P. रांगा
4. D. पक्षात्
5. CLD. मासं ; c'ad gaṅ

a. c'ad gaṅ dum bu gaṅ du ñin mo'i dbaṅ gis yin pa de ni bdun pa dag tu mc'an mo la'o

c. lam p'yed 'bum p'rag gsum po dag la ñi ma'i m̃dun du ñin mo daṅ ni rgyab tu mc'an mo'o

सर्वेषां चोत्तरस्थो भवति नरपते शैलराजो जनानां
पूर्वे सूर्योदयः स्याद् गिरिसममयनं पश्चिमे चास्तमेतत् ।
कालाः सन्ध्याश्चतस्रः प्रहरदिननिशाः[1] सर्वदा संक्रमन्तो
मेरौ दिक्षु भ्रमन्ति प्रकटरवि महो भेदिता लग्नभेदैः ॥ ६१ ॥

नाड्यूर्ध्वे षट् [2]सपाद क्रमति दिनकरो योजनानां सहस्रं
षष्टोनामग्निलक्षं भ्रमति दिननिशं पञ्चशैलं सहस्रं ।
[a]गोलार्धे खाग्निनाड़ी [3]र्वहति दिननिशं हानिवृद्धयोश्च पञ्च-
गोले सन्ध्यावसन्ध्यं प्रतिदिनमपि तत् श्वासयुग्मं त्रिलिप्तं ॥ ६२ ॥

लिप्ता स्यान् मेषलग्ने गगननवकरं खर्तुनेत्रं वृषे स्यात्
युग्मेऽप्याकाश ख द्वे शररसघटिकाः स्युः कुलिरे च सिंहे ।
कन्यायां सार्ध[4]षट्कं भवति खलु तुलाद्युत्क्रमेणैव सर्वं
[b]षड्लग्नैरस्तमेतदुदितमपि तथार्कस्य नक्षत्रभेदैः ॥ ६३ ॥

विंशत्येके सहस्रं रसशतसहिते निर्गता दन्तभागे-
देहे श्वासाधिका ये प्रतिदिन समये भूतशैलर्तुसंख्याः ।
षट्त्रिंशद्भिः सहस्रैर्गुणितमपि [5]शताब्दस्य मानं प्रसिद्धं
शून्यर्त्वग्नि प्रसक्ता प्रभवति घटिका षष्टिभागा दिनश्च ॥ ६४ ॥

1. P. दिननिशान्

2. CLD. षट पदं च ; drug ni rkan pa dan bčas

3. CLD. भवति

4. L. षट्कैर्

5. P. शतार्धस्य ; lo brgya'i c'ad du

a. ñin dan mc'an mor go la p'yed la mk'a' me č'u c'od bgrod te go la dag la Gyas dan ni ‖ Gyas min dag tu 'grib dan 'p'el ba lna ste ñin žag so sor de ni dbugs zun č'u sran gsum.

b. dus sbyor drug gis de nub gan p'yir 'č'ar ba dag kyan de bžin ñi ma'i rgyu skar dbye bas so.

चन्द्रे पक्षे रवौ चायनमपि नवमासाश्च भौमे च रात्रिः
षड् वर्षा स्यु र्गुरौ स्यादयनमपि भृगौ चायनं चन्द्रसूनौ ।
तिष्याख्याब्दानि शौरौ तमिनि नव तथा केतुहीना च राजन्
तत् सर्वं चैकपिण्डं वपुगुणितयुगाब्दानि सार्धत्रिमासाः ॥ ६५ ॥

संख्या [1]सार्धे दिने चाब्दशतमपि भवेत् कालचक्रोनमत्र
प्राणान् सत्त्वे वहन्त्या रजसि तमसि वै कायवाक्चित्तभेदैः ।
पञ्चत्वं यान्ति तस्मात् सुरनरफणिनः सार्धरात्रेण चेन्दो-
रेषा संख्या प्रसिद्धा भवति सुनियता कालचक्रे नरेन्द्र ॥ ६६ ॥

नोच्छिन्ने कालचक्रे त्वयन ऋण नव क्षेपयित्वा समस्तं
पञ्चानां शीघ्रकर्मण्यपि चरणघटी मङ्गलादिग्रहाणां ।
भौमे वेदर्त्तु वह्निः प्रभवति भुवनस्थानके [2]चारभेदे-
स्तुल्या[3] पूर्वापरार्धे त्वृणधन[4]गतिषु स्थानभेदे नियोज्याः ॥ ६७

आदौ जैनेन्द्रसंख्या प्रभवति घटिका वह्निनेत्रं त्रिधा च
द्विस्था[5] सैकाक्षिरष्टादशकतिथि हरा वह्निमूलाद्धरश्च ।
अष्टत्रिंशत् त्वशीति स्थिति[6]भुवनपदे सत्रिपञ्चाशदत्र
तस्मिन्नर्के विशुद्धे त्वृणमपि च धनं चोत्क्रमेण क्रमेण ॥ ६८ ॥

1. D. चार्धे
2. D. वारभेदैस् , srid pa'i gnas rnams dag la rgyu ba'i dbye ba yis
3. P. तस्याः ; mo'u:s par
4. D. °गतिस्थान°
5. D. द्विस्थां
6. D. °स्तिथिभुवनपदे , brtan pa srid pa'i gnas la

वेदाद् रन्ध्रेन्दुसंख्याः प्रभवति घटिका शीघ्रकार्यं बुधस्य
द्विस्थाने षोड़शान्ये तिथिमनु[1]मदना रुद्रशैलेन्द्रियं खं ।
मूलाद् वेदाद्धरश्च प्रकटित नियतं द्वादशे विंशतिश्च
अष्टाविंशद्वसुस्त्रिंशदपि मनुपदे संस्थिताश्चारभेदैः ॥ ६९ ॥

अङ्क्याकाशेन्दुसंख्या भवति हि घटिका पिण्डमेतद् गुरोश्च
द्विस्थाने दिक् प्रमाणा नववसु ऋतवः षट्करेन्दुश्च मूलात् ।
वह्निः षड् रन्ध्ररुद्रा नरपति मुनयः सर्वचाराः क्रमेण
शीघ्रे मन्दे च वक्रे ग्रहगणनियमं[2] सूर्यभेदैश्चरन्ति ॥ ७० ॥

षट् चन्द्राम्भोधि संख्या भवति हि घटिका शीघ्रकार्ये भृगोश्च
[a]त्रिस्थाने पञ्चविंशद् द्विजिन इति तथा हस्तनेत्रं द्विधा स्यात् ।
दोषास्तिथ्यष्टमूलात् षड़पि च खगुणं चैकहीनं शतञ्च
[b]अन्ते वह्नेयद्रि[3] संख्या स्थिति[4]भुवनपदे शुक्रचारा क्रमेण ॥ ७१ ॥

[c]सौरे[5] षड्भूतसंख्या [6]भवति हि घटिका पिण्डमेतन् नरेन्द्र
षड्भूता भूतवेदा जलनिधिनयनं युग्मशून्याश्च मूलात्[7] ।
पक्षौ वेदाश्च भूता रसवसुशिखिनः स्थापनीयाः क्रमेण
[d]एवं चारो ग्रहाणां भवति सुनियतः कालचक्रे समस्तः ॥ ७२ ॥

---

1. P. °वदना
2. CLD. °गणनिलयं : gza' yi o'ogs ni ṅes par
3. L. वह्नेन्द्रि°
4. D. °स्तिथि
5. CLD. सौरेः
6. D. प्रभवति घटिका
7. L शूलात्

a. gnas gsum dag la ñi šu lṅa ste gñis ni rgyal ba žes daṅ de bžin lag mig rṅam pa gñis

b. mt'ar ni me daṅ ri yi graṅs te rkaṅ pa srid pa'i gnas la ṛa saṅs rgyu ba rim pas so.

c. ñi ma'i bu la drug daṅ 'byuṅ ba'i graṅs kyi č'u c'od o'ogs ba 'di dag tu 'gyur mi yi dbaṅ

d. de ltar gza' rnams kyi ni rgyu ba mt'a' dag dus kyi 'k'or lo dag las šin tu ṅes par 'gyur.

षट्त्रिंशत् सार्धमासाः स्वल् वसुगुणिता मन्दकार्ये पदानि
नेत्रा रन्ध्राक्षि[1] संख्या भवति च घटिका मङ्गलादि ग्रहाणां ।
तत्त्वान्यष्टादशाद्भिः स्थितिरवनिसुतस्यापरे पूर्वभागे
दिक्शैलाग्नी बुधस्येशः नवशिखिगुरोः पूर्वभागे परे च ॥ ७३ ॥

शुक्रस्येष्वब्धिचन्द्रा भवति च शनिनः[2]साक्षिनेत्रं दिनर्तुः
मासे भौमस्य भुक्तिश्च नवतिघटिका पञ्चलोकेन्दु संख्या ।
शुक्रस्यैवं बुधस्यापि स्वरसंहुतभुक् पिण्डमेकीकृतं स्यात्
एतं[3] मासत्रयेणाब्द दिनक्षण घटी भुक्तिरेषा त्रयाणां ॥ ७४ ॥

मासे भुक्तिर्गुरो स्यात्[4]प्रकटित घटिका रुद्रसंख्या सपादा
त्रिंशत् पाणीपलानि स्फुट युगघटिका सूर्यपुत्रस्य भुक्तिः ।
[a]एकीभूता दिनाख्या त्रिगुणितमपि तत् सार्धमासः [5]सरात्रि-
[b]र्भर्तुर्भुक्तौ[6] दिनानां प्रतिदिवसमृणं षड्ग्रहाणाञ्च भुक्तिः ॥ ७५ ॥

मासैकं मन्दकर्मण्यधिकमपि विभो नानुभुक्तं ग्रहे यत्
तस्माद्वै सार्धसप्त प्रकटित घटिका भुक्तिरत्रैव मासे ।
राहो र्मासस्य भुक्तिः सरविशशिपदं चार्धनाडीविहीनं
तिस्रोऽर्कस्यायनाद्ये शशिमदनदिने पञ्च चन्द्रस्य नाड्यः ॥ ७६ ॥

---

1. C. रन्ध्राद्रि ; mig bug mig gi
2. CLD. शशिनः ; spen pa yi yaṅ mig bčas
3. CLD. एवं ; 'di dag zla ba gsum kyi
4. CLD. °गुरोश्च
5. CLP. सरात्रौ D. सरात्रो
6. CLD. °र्भक्ते

a. gčig tu gyur ba ñin žag čes bya gsum gyis bsgyur ba de yaṅ p'yed bčas zla ba'i ñin žag bčas

b. gco bo'i loṅs spyod ñin bžin bu lon gyi ni ñin žag rnams la gza' drug rnams ni loṅs spyod do

नो भुक्ता याधंनाड़ो ऋतुदिनसमये सा कलाहीन चन्द्रा
सा सूर्यस्याधिका वै[1] खलु युगगुणिता सूर्यमासे दिनं तत् ।
राहोर्मासस्य भोगान् नयनविगुणितात् पक्षभोगेन भुक्ता
लब्धाः केतोश्च नाड्यः प्रतिदिनसमये मासभोगाच्च[2] राहोः ॥ ७७ ॥

कृत्वा सत्रार्धलिप्तां खलु गुणगुणितां शोधयेत् सूर्यभोगे
केतुः सूर्येण सार्धं विचरति पुरतः पृष्ठतः शीघ्र[3]वक्रे ।
चारे सार्धा द्विलिप्तां चरति दिनदिने सूर्यभोगात् क्रमेण
[a]षट्त्रिंशद्भिः स्वमासे[4] इचरति स[5] घटिका लोकतिथ्याहताश्च ॥७८॥

सार्धं मासं द्विनाड़ो प्रतिदिनमुदयः शीघ्रवक्रेऽग्रपृष्ठे
सार्धं मासं हि यावत् भवति तदुदयो दृश्यते मर्त्यलोके ।
[b]भूयः श्रीकालचक्रे प्रविशति स यदा वर्षभागे[6]ऽप्यदृश्यो
ज्ञाते तस्योदयांशे तदुदयनमपि ज्ञायतेऽनन्तकालम् ॥ ७९ ॥

वर्षाहः पञ्चगुण्यं पुनरिषुनिहतं [7]चायनाहः प्रहीनं
रन्ध्रै मिश्रं भवन्ति स्वगतिगुणवशान् मण्डलानि ग्रहाणां ।
भौमे शैलाहि[8] षट्कं भवति दिनगणं शैलं [9]रन्ध्राद्रिनागं
सौम्ये दन्ताग्निवेदं भवति सुरगुरो [c]भार्गवेऽगोजिनाक्षी ॥ ८० ॥

---

1. D. °स्याधिकारैः ; de ni ñi ma'i lhag par 'gyur te
2. D. ° भोगाश्च
3. D. °चक्रे ; myur 'k'yog dag la
4. P. सुमासै°
5. CLD. सुघटिका
6. CLD. °भोग्ये°
7. P. वायनाहः
8. CL. शैलाभि D. शैला हि ; sa skyes la ni ri klu
9. CLD. रन्धादि° ; ri bug ri klu

a. raṅ gi zla ba sum ču drug gis de rgyu č'u c'od dag gyaṅ 'jig rten gyis ni c'es graṅs bsgyur
b. slar yaṅ dpal dus 'k'or lo rab 'jug de ni gaṅ c'e lo yi loṅs spyod dag la mt'oṅ mi 'gyur
c. pa saṅs la ni ri daṅ rgyal ba mig

षट् षट् [1]शैलाम्बरैकं भवति दिनगणं मण्डलं सूर्यसूनो
शैलर्त्वेकश्च भौमे खलु भवति धनं चन्द्रपुत्रे शतघ्नं ।
हीनं वह्न्यर्क शैले दशगुणितदिनं [2]भार्गवेऽब्ध्यष्टहीनं
शून्याकाशर्तु नेत्रं ख कर फणियुगं मन्त्रि [3]सौरो ऋणं स्यात् ॥ ८१ ॥

भौमे सार्धं नवार्धाधिक नृपति बुधे सूर्य ऋक्षं गुरौ स्यात्
षट् शुक्रे[4] दोषमर्कावृणमिति सबलं शोधयेत् भुक्तिमध्ये ।
पश्चाच्छुद्धिश्च[5] तेषां भवति नरपते जन्मनक्षत्रचारात्
स्वाङ्गे नीचस्य शुद्धि भवति गतिवशाद् उच्चकस्यार्क मध्ये ॥ ८२ ॥

षण्मासे मासभुक्तं गुणितमपि भवेत् कालचक्राब्दमासै-
र्भागे [6]लब्धं त्वृणं स्यादपि रविशशिना नानुभुक्तार्ध नाडी ।
केतो र्भयोऽधिकं यत् प्रतिदिन समये गुण्यमिन्दो दिनैश्च
षष्ट्याभागेन नाडी प्रतिदिनसमये शीघ्रवक्रोदये च ॥ ८३ ॥

सौम्यो मन्त्री च शीघ्रे प्रभवति बलवान् भौमकेतू च वक्रे
[a]मन्दः शुक्रश्च मन्दे ऽकृति गुणवशाच्छेषचारेऽबलाश्च ।
शीघ्रे पूर्वामुखाः स्युः पुनरपरमुखा वक्रचारे प्रविष्टा
[b]मन्दे सव्याननाः स्युः स्वगतिगुणवशान् निर्गमे चोत्तरास्याः ॥ ८४ ॥

---

1. L. शैलाश्वरैकं
2. PD. (भार्गवे) द्व्यष्टहीनं ; ŏ'u gter brgyad kyis dman
3. CL. सप्यो D. सय्यो P. सौर्यो ; ñi skyes dag la
4. P. चक्रे ; pa saṅs la
5. CLD. (पश्चाद्) वृद्धिश्च ; dag par 'gyur te
6. D. लब्धे

a. dman pa pa saṅs dal ba la ste raṅ bžin yon tan dbaṅ gis rgyu ba lbag ñia la stobs med

b. dal la lha ru gtoṅ p'yogs 'gyur te raṅ bgrod yon tan dbaṅ gis 'byuṅ ba la yaṅ byaṅ du gtoṅ

मासे त्रिंशद् दिना ये जलनिधिनिहताः खाक्षिचन्द्रं [1]पदिन्दोः
राशीनां द्वादशानां युगगुणितपदं चाष्टवेदं रवेश्च ।
तन्मध्ये हानिवृद्धी त्वयनगतिवशादुत्क्रमेण क्रमेण
चक्रार्धे समस्ता वसुयुगगणना वेदितव्या नरेन्द्र ॥ ८५ ॥

पर्वच्छेदे च राहोः प्रविशति शशिनो मण्डले मण्डलञ्च
सर्वग्रासो विशुद्धो भवति शशिवशात् मण्डलं षष्टिनाड्यः ।
अर्धग्रासोऽर्धशुद्धे भवति शशिवशात् नाडिका यावदस्ति
छेदे[2] ग्रासो रवीन्द्वोर्दिननिशिसमये कृष्णशुक्ले[3] च [4]पर्वे ॥ ८६ ॥

मानुष्याणां शताब्दं गुणितमपि भवेद् वर्षभुक्त्या ग्रहाणां
द्विस्थं दिग्भागलब्धं भवति च तदणं शोधयेत् मूर्ध्निराशौ ।
विंशत्येकं हि लक्षं षड्युतमपि [5]यत् वर्षसंख्या युगार्धे
भूयो राशिद्वयेन प्रभवति नियतं वर्षसंख्या चतुर्णां ॥ ८७ ॥

शून्यं शून्यं खनागाः करमुनिशशिनः कृद्युगस्य प्रमाणं
त्रेतायां खं खशून्यं रसनवदिन कृद्वर्षसंख्या प्रसिद्धा ।
शून्यं शून्यं खवेदं रसभुजगमिति द्वापरेऽब्दानि सम्यक्
शून्याकाशं ख नेत्रं गुणजलनिधयो वर्षसंख्या कलौ स्यात् ॥ ८८ ॥

---

1. D. पदिन्दो L. पदीन्दो ; zla ba'i rkaṅ pa ste
2. OLD. छेदो
3. L. शुक्रे
4. OLD. पूर्वे ; nag daṅ dkar ba'i c'igs
5. CD. षड्वर्ष° L. षड्म् ; lo graṅs gaṅ dag rnams ni

एते वर्षे युगान्ते ग्रहगणचरणं तिष्ठते राशिशून्ये
अश्विन्याद्यञ्च भूयः प्रभव इति तथा चैत्रमासादिकञ्च ।
वारो योगस्तिथि र्वै करणमपि तथा चादिकं तत्र काले
देवानां दानवानां क्षितितलनिलये रौद्रयुद्धं[1] भविष्यत् ॥ ८९ ॥ *

षड्वर्गाः[2] सार्कमात्राः खलु गुणगुणिता स्त्रीणिवर्षाणि सूर्ये
आद्या ह्रस्वा दिनाख्या त्रिगुणशशिकलाः सार्धमासं हि चन्द्रे ।
नाड्यो ह्याद्याः समात्रा त्रिगुणितमपि [3]यत् तत् त्रिरात्रं हि राहोः
श्री शून्यानाहताद्या त्रिगुणितमपि [4]यत् तत् त्रिलग्नञ्च राहोः ॥ ९० ॥

भूताः सूर्येन्दुसंख्याः पुनरपि नृपते सार्धमासं त्रिलग्नं
त्यक्त्वा सार्धं हि मासं भवति मुनिवरैश्छेदितं कालचक्रं ।
मास[5]क्षेपैकवारो द्विगुणनृपघटी पिण्डके [6]द्वे शरो यत्
चक्रे वारो विभक्तो भवति नियमितः षष्टिभिर्दवतीभिः ॥ ९१ ॥

द्वात्रिंशद्भिश्च[7] नाड्यो वसुगुणितमुने र्दैवती[8] पिण्डके द्वे
देयं ह्येयञ्च देयं प्रथमशशिपदं पञ्चकं[9] चात्र षड्भिः ।
इन्दोः पक्षत्रयाद्द त्रिगुणमपि[10] भवेत् सूर्यभोगे[11] प्रसिद्धं
द्वे चक्रे[12] षष्टिभक्ते प्रथमरविदिने रुद्रनाड्यः सभोगाः ॥ ९२ ॥

---

1. D. रौद्रयुद्धे ऽभविष्यत्
2. L. (षड्) वर्षाः ; sde pa drug ni
3. D. यत् तु त्रिरात्रं
4. D. यत् तु
5. D. मासे
6. D. द्वे त्वधश्च ; gñis daṅ rkaṅ pa mda'
7. D. द्वात्रिंशद्भिन्न° sum ču rca gñis kyis kyaṅ
8. D. °र्दैवते ; lha mo rnams las
9. CLD पञ्च पश्चात्° ; lṅa ste 'dir ni drug gis so
10. P. °गुणितमपि
11. CLD. °भोग ; ñi ma'i loṅs spyod la ni
12. L. चक्षु ; skar ma gñis

*The Patna Ms. reads a verse after this as verse 90 which does not occur either in the other Mss. or in the Tibetan translation.

एतत् श्रीकालचक्रं ग्रहगणसहितं बाह्यदेहे[1] ष्वभिन्नं
संहार स्फारहेतुं त्रिभुवननिलये [2]कालरूपेण सूर्यः।
प्रज्ञोपायप्रभेदैः समविषमकुलैः शीघ्र[3]वक्रादिचारै-
र्न ज्ञातं वीतरागैः परममुनिवुलैः ब्रह्मरुद्रादि देवैः ॥ ६३ ॥

आद्याः पञ्चस्वराः ये प्रथमतिथिवशात् पञ्चनन्दादियोगे
कुर्वन्त्यत्रोदयन्ते यदि नृप न भवेत्तत्र भौमादिवारः।
भौमेऽनिष्टोदयो वै यदि भवति पुनः कृत्तिकायोग एव
तस्मिन् संग्रामरोगो यदि भवति नृणां मृत्युरादिस्वरस्य ॥ ६४ ॥

भद्रासौम्ये द्वितीयो म्रियते[4] यदि मघायोग एवात्रवारे
"अश्लेषार्क्ष"[5] जयायां यदि भवति गुरु र्याति मृत्युं तृतीयः।
रिक्ता तिथ्यां[6] धनिष्ठा यदि भवति भृगु र्याति मृत्युं चतुर्थः
पूर्णा मन्देन सार्धं प्रभवति भरणी पञ्चमो याति मृत्युं ॥ ६५ ॥

सूर्ये[7] नन्दोदयानां व्रणमपि च भवेत् क्लेश एवातुराणां
सोमे[b] भद्रोदयानां [8]भवति च नियतं युद्धरोगे च तद्वत्।
सत्यं पञ्चोदयानां भवति बहुफलं मृत्युयोगे विहीनं
ज्ञातव्यं रोगयुद्धेष्वशुभशुभफलं देशयात्रा विवाहे ॥ ६६ ॥

1. L. °दोहस्त
2. CLD. कामरूपेण ; dus kyi gzugs daṅ ni
3. D. °चक्रादि° ; myur 'k'yog la sogs rgyu ba ste
4. CLD. नृपति P. मृयति ; 'c'i bar 'gyur
5. P. अश्लेषायां
6. CLD. तिथ्या
7. CLD. सूर्यो ; ñi ma dag la
8. CLD. प्रभवति

a. rgyal ba bla ma dag la gal te skag tu gyur na gsum pa dag ni 'c'i bar 'gyur ba yin
b. zla ba la ni bzaṅ po 'c'ar ba rnams kyi

एवन्[1] नक्षत्रवाराः स्वरगणतिथयः पञ्चतत्त्वप्रभेदैः
पक्षे मासेऽयनेऽब्देऽप्युदय इह भवेत् षष्टिसंवत्सरे[2] च ।
चैत्रादौ[3] द्वादशाङ्कैरुदय इह भवेत् पक्षभेदः स एव
द्वासप्तत्या दिनानामुदय इह भवेन् मासभेदे स्वराणां ॥ ९७ ॥

षण्मासैश्चायनाङ्कं प्रभवमुखगतैर्द्वादशाब्दैश्च[4] वर्षं
एवं पञ्चस्वराणामुदय इह भवेच्चास्तमेतं[5] हि पश्चात् ।
[a]आदौ बालाः स्वराश्च स्वतिथिगुणवशात् श्रीकुमारा द्वितीये
प्रौढा वृद्धाः क्रमेणाग्नि जलनिधिदिने पञ्चमेऽस्तं गताः स्युः ॥ ९८ ॥

आद्याः पञ्चस्वराः ये[b] खलु गुणगुणिता स्ते द्विधा त्रिंशदेव
कादौ वर्गाक्षरे च प्रकृतिगुणवशाद्योजनीयाः समस्ताः ।
ह्रस्वानां शुक्लपक्षेप्युदय इह भवेत् पञ्चतत्त्व प्रभेदै-
दीर्घाणां कृष्णपक्षे भवति स [6]नियतं सृष्टिसंहार योगात् ॥ ९९ ॥

सप्त[7] विंशत्तदृक्षं स्फुट शर घटिकाः सूर्यलग्ना नवांशा
एते च त्रिस्वभावाः स्थिर[8]चरसुसमा मेषलग्नादयोऽत्र ।
मेषः कर्की तुला वै मकर [c]इह चरास्तद् द्वितीयाः स्थिराश्च
शेषान्ये द्विस्वभावाः दिननिशिसमये नित्यमेवोदितास्ते ॥ १०० ॥

---

1. CLD. एतन् ; de ltar
2. CLD. °संवत्सरेण
3. CLD. चैत्राद्यैर् ; nag pa sogs la
4. CLD. वर्षैर्
5. D. °श्चान्तमेवं
6. P. नियतः
7. P. सप्तविंशत्
8. CLD. °चल° ; brtan Gyo šin tu mñam

a. dan po la ni dbyans rnams byis pa ran c'es yon tan dbań gis dpal ldan gžon pu gñis pa la
b. a sogs dbyans lna gan dag
c. dir ni Gyo ba dag ste de las gñis pa brtan pa'o

तस्मि[1] त्रिंशत् मुहूर्तान्यपि दिन[2]समये नाडिकाण्येव षष्टि-
रादौ त्रिंशत् स्वराणामुदय इह भवेद्वै मुहूर्ते मुहूर्ते ।
त्रिंशद् वर्णाक्षराणां प्रभवति घटिका ह्रस्वदीर्घ प्रभेदै-
र्मिथ्यंशे चन्द्रमध्ये निगदित उदयश्चास्तमेतं हि तस्मात् ॥ १०१ ॥

शून्यं वाय्वग्नि तोयान्यवनिरपि कुलं त्वादि पञ्चस्वराणां
राहुग्नोन्द्वर्क सौम्यार [3]भृगुगुरुबलाः सौरिरुद्राधिदेवाः ।
पूर्वोक्तेनार्क लग्ने निशिदिवसवशात् नाडिका तत्र साध्या
तन्मध्ये यः स्वरोभूद्[4] ग्रह इति बलवान् मण्डलं तेन साध्यं ॥ १०२ ॥

वामे ह्रस्वस्वराणामुदय इह भवेद् दक्षिणे चापराणां
वामे शून्यादि तत्त्वं ग्रहगणचरणं राहुमुख्यं समस्तं ।
सव्ये तत्त्वं धराद्यं ग्रहगणनियमः सूर्यपुत्रादिनैव
बाह्ये[5]वा कालनाडी ग्रहभवनसमा सस्वरा साधनीयाः ॥ १०३ ॥

प्रश्ने संग्रामहेतो भवति च मरणं कालशून्योदिते च
वायौ सूर्ये[6] च भङ्गो व्रणमपि च भवेत् वह्नि भौमोदये च ।
[7]सन्धिस्तोये गुरौ स्यात्तहि भवति रणं भूमि मन्दोदये च
मृत्युक्लेशो व्रणं स्यात् सुखमपि समता पृच्छकस्यातुरस्य ॥ १०४ ॥

1. CLD. अस्मिन् ; de la
2. CL. दिननिशि°
3. D. °गुरुभृगु° ; pa saṅs bla ma mjug riṅs
4. CLD. ग्रहबलबलवान् ; gza' žes bya ba stobs ldan
5. D. बाह्ये पा
6. D. शून्ये ; rluṅ du ñi ma dag la
7. L. शक्ति° ; č'u daṅ bla ma la ni 'dum par 'gyur te

a. ñar brjod dus sbyor re re de la ñin daṅ mc'an mo'i dbaṅ gis č'u c'od rnams ni bsgrub par bya

b. 'č'i daṅ ñon moṅs rmar 'gyur ble ba dag daṅ mñam pa ñid ni 'dri byed nad pa rnams kyi'o

संग्रामे शत्रुनाशः प्रभवति नियतो राहुशून्योदये च
वायौ चन्द्रे तु[1] भङ्गो व्रणमपि च रणे सौम्य वह्न्योदये च ।
शुक्रे तोयेऽर्थलाभो रिपुरपि च वशी भूमिकेतूदये स्याद्
एवं यात्राविवाहे भवति बहुफलं वाममार्गे ग्रहैश्च ॥ १०५ ॥

दूतेनोक्ताः स्वरा ये खलु दशगुणिता राशिचक्रेण मिश्रा
भूयो भूताहृतास्ते निकटजनयुताः सप्तभागावशेषाः ।
चन्द्रे वह्नौ शरेऽद्रौ विषम[2]पदगते नास्ति लाभो नराणां
नेत्रे वेदे रसे वै [3]सुसमपदगते कार्यसिद्धिर्भवेन्न ॥ १०६ ॥

वर्षा मासाश्च पक्षाः दिननिशिसमया लग्नमध्ये प्रविष्टा
लग्नैकं पञ्चभेदं ग्रहगणसहितं सस्वरं तत्त्वभिन्नं ।
तत्त्वैकं श्वासषष्ट्याभ्यधिक[4] गुणशतं वर्त्तते कालनाड्यां
नाड्यंशाः षष्टिलिप्ता तदवयव इति श्वासषट्कं नरेन्द्र ॥ १०७ ॥

निःश्वासोच्छ्वासमध्ये त्वशुभशुभफलं ज्ञायते योगयुक्तै-
र्दैवज्ञैः कालनाड्यां गत दिवसवशात् साधयित्वार्कचन्द्रौ ।
न ज्ञाते वर्तमानेष्यशुभशुभफलं यो वदत्यत्र लोके
सोऽन्धो[5]ऽप्यन्धं गृहीत्वा प्रविशति गहनं हस्तिसिंहप्रकीर्णं ॥ १०८ ॥

---

1. P. च
2. L. पदिगति
3. L. सुरम°
4. L. षष्ट्यां त्वधिक
5. CD. °ऽप्यर्थं

a. de ñid gčig nl dbugs rnams drug ču mñon lhag yon tan brgya yi dus kyi č'u o'od dag la gnas

b. de nl loṅ ba yis kyaṅ loṅ ba bzuṅ nas glaṅ č'en seṅ ges gdams pa'i t'ibs por rab tu 'jug

न ज्ञाते सूक्ष्मयोगे ग्रहबलसहितो[1] दीयते लग्नयोगः
कालाग्निः सूर्यभौमो[2] दिनकरतनयो जन्म सप्तस्थ राशौ ।
मृत्युं व्याधिं व्रणं वै सकलधनविनाशञ्च कुर्वन्ति तस्मि-
[a]स्तस्मात् तद्वर्जनीयं खलु [3]मम वचनैरन्यलग्नं प्रशस्तं ॥ १०६ ॥

राहुश्चन्द्रश्च सौम्यो[4] गुरुभृगुसहितो जन्म सप्तस्थ राशौ
शत्रोर्नाशः स्वपुष्टि विजय इति रणे द्रव्यलाभः सरामः ।
सम्यग् लग्नेश्च सर्वे यदि भवति पुन [5]र्वामनाडी स्वदेहे
नूनं सर्वार्थसिद्धिः सकलभुवितले शुद्धवारे तिथौ च ॥ ११० ॥

कृत्वा [6]त्वृक्षं त्रिभागं नव नव नवके जन्मनक्षत्रमादौ
क्रूराश्चन्द्रेन सार्धं विषमपदगता मृत्युरेवातुराणां[7] ।
अश्विन्याद्ये स्त्रिनाड्यामहिरपि रचितो रेवती यावदेव
पापेन्दुं जन्मऋक्षे भवति यदि नृणामेकनाड्यां विनाशः ॥ १११ ॥

[b]षट् तिथ्यष्टाद्रिचन्द्रान् दशसनवदशार्कैकविंशत् सुवर्षान्
[c]सूर्येन्द्वारो बुधार्कौ [8]गुरुभुजगसिता भुञ्जते तान् क्रमेण ।
तस्मिन्नन्तर्दशायां पुनरपि च ततश्चाष्टवर्गाक्षरे च[9]
क्रूराः कुर्वन्त्यशान्ति परमसुखकराः सौम्यरूपा ग्रहा ये ॥ ११२ ॥

1. CLD °सहिते
2. P. भूमौ
3. CLD सम°
4. CLD. सौम्ये
5. P. °वायुनाडी D °वामानडी, raṅ lus Gyon gyi roa la gyur pa na
6. P. ऋक्षं
7. L. °रेवोत्तराणां
8. C. गुरुराहुशशिशुक्र L. बुधोर्के गुरुभुजगसिता
9. P. °वर्गाक्षरैश्च

a. de p'yir spaṅ par bya ste ṅes par bdag gis dus sbyor gźan ni rab tu sbyin par bya
b. drug daṅ c'es daṅ brgyad daṅ ri zla ba bču daṅ bču dgu ñi ma ñi šu gčig gi lo bzaṅ rnams
c. ñi zla mig dmar gza' lag ñi skyes b'a ma lag 'gro dkar po rnams kyis de rnams rim pas spyod

पुष्ये मासे त्वविद्या मकरगतरवौ कुम्भसूर्ये च माघे
संस्कारो मीनसूर्ये भवति नरपते फाल्गुणे मेषसूर्ये ।
विज्ञानं नामरूपं वृषमिथुनगते चैत्र वैशाख ज्यैष्ठे
नेत्राद्यं कर्कटेऽर्के भवति हरिरवौ स्पर्शनं वेदना च ॥ ११३ ॥

आषाढे श्रावणे योषिदपि तुलगते भाद्रमासेऽश्विने च
तृष्णोपादानमेव प्रभवति च भवः कार्तिके वृश्चिकेऽर्के ।
जातिश्चापस्थ सूर्ये मरणमपि तथा मार्गशीर्षे क्रमेण
एवं सूर्येन्दुभेदे [a]उभयगतिवशाद् द्वादशाङ्गानि राजन् ॥ ११४ ॥

पुष्ये[1] माघेऽभिसन्धौ मकरगतरवौ तत्र [2]वारे त्वविद्या
तस्मान् मृत्यु द्वितीये भवति नरपते जातिरेवं तृतीये ।
[b]एवं सर्वं भवाद्यं [3]क्रमपरिगणितं द्वादशाङ्गाणि यावत्
तस्माद् वज्राब्जिबाणं[4]मकरगतिवशात्[5]षष्ठमाङ्गं कदाचित् ॥११५॥

पक्षस्तिथ्याख्यवारैः रविचरणवशात् षोडशाङ्गैः कदाचित्
संस्कारो माघसन्धौ कलसगतरवौ तत्र संस्कार एव ।
विज्ञानं तद् द्वितीये प्रभवति दिवसे नामरूपं तृतीये
एवं मासद्वयेऽङ्गं[6] भवति रविवशात् सृष्टिसंहार योगात् ॥ ११६ ॥

---

1. CLD. पुष्यो
2. D. चारे, gza' de la ni ma rig pa
3. CLD. क्रमगतिगुणितं
4. CLDP. मरण°, c'u srin bgrod pa'i dban gis
5. CLD. °मासं, yan lag drug pa'o
6. CLD, °द्वयाङ्ग

a. gñis ka bgrod pa'i dban gis rgyal po yan lag bču gñis so
b. de bžin srid pa la sogs t'ams čad yan lag bču gñis bar du rim pa dag gis yons su 'gyur

तत्राविद्याद्यमङ्ग[1] विषममपि भवेच्छोभनं सर्वकार्ये
संस्काराद्यं [2]समं यत् त्वशुभमपि सदा[3] सेकयात्राविवाहे।
एवं पक्षप्रभेदैः शशिगमनवशाद् द्वादशाङ्गानि यानि
शुक्ले कृष्णे च पक्षे प्रथमतिथिवशात् सृष्टिसंहारयोगात् ॥ ११७ ॥

सूर्यारौ केतुमन्दौ रिपुनिधनकराः संस्थिताः सव्यपृष्ठे
वामेऽग्रे सौम्यरूपं ग्रहगणसकलं युद्धभूम्यां तथैव।
योगिन्यो विष्टिरुद्राश्च पवनसहिताः सौख्यदाः सव्यपृष्ठे
वामेऽग्रे मृत्युरूपाः समविषमगता द्वे बले घातयन्ति ॥ ११८ ॥

ब्राह्मी रौद्री कुमारी खगपतिगमना शूकरी वज्रहस्ता
चामुण्डा चैव लक्ष्मी भवति वसुतिथावादितिथ्यां नवम्यां।
शक्रे पक्षेऽग्निकोणे दनुयमवरुणे मारुते चेशभूमौ
कुर्वन्त्यत्रोदयन्ताः[4] पुनरपि तिथिषु ह्यष्टभेदै र्विभिन्नाः ॥ ११९ ॥

विष्टीनां शुक्लपक्षेऽप्युदय इह भवेत् शक्रयाम्याब्धि[5]पक्षे
कृष्णे पक्षे च भूयः शिखिदनुपवनः[6] ईशकोणे क्रमेण।
रुद्रः [7]पूर्वात् परार्धं व्रजति दिनवशादुत्तरे चोत्तरेऽर्के
वारुण्यादग्निमन्तं[8] व्रजति स नियतं दक्षिणे दक्षिणेऽर्के ॥ १२० ॥

---

1. CLDP. तत्राविद्यादिनाङ्ग — 2. CLD समस्तं
3. CLD. यदा — 4. CLD. °त्रोदयान्ताः
5. D. °पक्षे — 6. P. °पवने
7. CLD. पूर्वपरार्धं — 8. CLD. वारुण्यादग्निवर्ण

a. de la ma rig la sogs yan lag mi mñam pa yaṅ bya ba kun la dge bar 'gyur ba ste

b. gaṅ žǐg 'du byed la sogs mñam pa dag kyaṅ rtag tu dbaṅ bgrod bag ma rnams la dge ba min

c. 'di ni 'ŏ'ar ba dag tu byed te slar yaṅ c'es rnams la ni brgyad gñis dbye bas t'a dad do

d. bi ṣṭi rnams ni dkar po'i p'yogs la brgya byin gšin rje c'u daṅ gnod sbyin du yaṅ 'dir 'ŏ'ar 'gyur

e. c̆'u nas me ldan dag tu de nas ṅos par 'gro ste lho ru lho yi ñi ma dag la'o

पूर्वादिर्घप्रहरात्[1] प्रविशति पवने दक्षिणे याति तद्वद्
ईशे तोयेऽग्नि यक्षे व्रजति दनुपुरे [2]मारुतेर्कोऽस्तमेति ।
[a]त्यक्त्वा श्रीमूलराहुं प्रभवति विजयी मारुतोप्यंक[3] युद्धे
संग्रामे मूलराहु ग्रसति रिपुबलं तेन तुल्योऽस्ति नान्यः ॥ १२१ ॥

[b]मात्राहीनस्तु योधः समविषमरणे हन्यते चाधिकेन
श्वासे नामद्वयो यत् प्रविशति [illegible] तस्य युद्धे जयः स्यात् ।
दूतप्रोक्तादिनामा भवति स विजयी हन्यते पृष्ठनामा
आये[4] वर्णैः स्वराद्यैः समविषमगतैः निष्फलादेश एव ॥ १२२ ॥

कालः सव्येऽपसव्ये यदि भवति तमो युद्धभूमौ नृपाणां
संग्रामे देवनाथो हरिहरसहितो हन्यते मानुषैश्च ।
तस्मात् श्रीमूलराहुस्त्रिभुवनविजयो [5]वक्ररुद्रासुराणां
ज्ञातव्यो युद्धकाले क्षितिवलयगतो नान्यथा शत्रुनाशः ॥ १२३ ॥

[c]कृत्वा त्वृक्षाणि भूमौ मुनियुग विहितानीन्द्रयक्षाब्धि याम्ये
तच्चक्रं भ्राम्यमाणं दिवसगतिवशाद् वेदितव्यं [6]समस्तं ।
नक्षत्रे यत्र कालः प्रभवति च तमो दृष्टिपाते द्वयोश्च
संग्रामे शत्रुसैन्यं निपतति सहसा गर्भमध्ये जयः स्यात् ॥ १२४ ॥

---

1. D. °प्रहारात् , šar nas t'un p'yed dag la
2. P. मारुतेऽर्केऽस्तमेति D. मारुतोर्केस्तमेते , rluṅ du ñi ma nub par 'gyur
3. CLD. °प्यंकयुद्धे
4. CLD. आर्ये° , 'du ba k'a dog
5. LD. चक्र° , 'k'yog po
6. D, समस्ते

a. dpal ldan rṅa ba'i sgra čan dor nas rluṅ dag las kyaṅ rnam par rgyal 'gyur 'gran pa'i 't'ab mo daṅ

b. dbyaṅs dman 't'ab mo pa ni mñam daṅ mi mñam Gyul la lhag pa dag gis 'joms par byed pa ste

c. sa la rgyu skar byas nas t'ub pa dus kyis bsgyur ba dbaṅ po gnod sbyin č'u daṅ gšin rjer ni

^aराहौ काले स्थितानां भवति समरणं तुल्यपातो बलानां
दृष्टांशे निर्गतानामुरगगतिवशात् सैन्यभङ्गो हि तत्र[1] ।
दृष्टांशं[2] वर्जितानां प्रभवति विजयो गर्भवेशे द्वयोश्च
एवं श्रीमूलराहु गुरुवचनगतो ज्ञायते कालचक्रे ॥ १२५ ॥

योगिन्यो विष्टिरुद्रा ग्रहगणसहिताः सस्वरस्योदयश्च
त्यक्त्वा सर्वाणि तानि त्रिभुवनविजयी क्षत्रियै ग्राह्य एकः ।
^bग्रस्तो येनेन्दुसूर्यौ [3]त्रिदशभयकरो रौद्रमूर्त्यञ्जनाभः[4]
भूमौ पूर्वापरं यो भ्रमति दिननिशं दक्षिणं चोत्तरञ्च ॥ १२६ ॥

संग्रामे भग्नशत्रुः प्रविशति सहसा दुर्गमध्ये कदाचित्
कृत्वा यन्त्राणि बाह्ये ह्यनवरत शिलावह्नि[5]बाणप्रपातैः ।
खड्गाद्युच्छेदयन्त्रैः क्षितितलनिलये पञ्जरैः शृङ्गभेदै-
^cस्तद् दुर्गं [6]चूर्णयित्वा कतिपयदिवसैः साधनीयः स दुष्टः ॥ १२७ ॥

चत्वारो द्वयष्टहस्ताः समविषमपदे छिद्रिताष्टप्रदेशाः
स्तम्भा भिन्नार्गलाभि र्जलधियुगयुगाभिश्च पृष्ठैकया च ।
मूले यन्त्रस्य मानं भवति दशकरं मूर्ध्निभागे तदर्धं
^dयष्टि र्हस्तद्वयोना प्रभवति कणयो मूर्ध्नि [7]भागाधिकश्च ॥ १२८ ॥ *

1. CLD. यत्र
2. L. दृष्टेह्नं ; lta ba'i c̆'a ni
3. CLDP. °भयकरो
4. L. रुद्रमृत्यु° D. रौद्रमृत्यु°
5. CLD. °वह्निभिर्वाणपातैः ; me mda' rab 'bab pa dan
6. CLD. छेदयित्वा
7. °भागादिकश्च

a. sgra gc̆an dus la gnas pa rnams ni 'o'i dan bc̆as par 'gyur z̆in dpun rnams mñam du lhun ba ni

b. gan gis sla ba ñi ma za s̆in skabs gsum pa dag 'jigs byed drag po'i gzugs c̆an mig sman mdog.

c. de yi rjon ni p'ye mar byas te ñin z̆ag ñun zad dag gis gdug pa de ni bsgrub par bya

d. sgyogs mda' k'ru gñis dag gis dman par 'gyur te 'o log bc̆u yi sten gi c̆'a ni lhag pa'o

*The Tibetan expression *'o log* by which कणयो has been translated in 128 is an unfamiliar one and is not found in the dictionaries of Das, Jäschke etc. A Tibetan dictionary by Lama C'os Grags gives the meaning of the expression as *yu ba 'am dbyug pa la 'an*, i. e., a stick, a staff. A Tibetan-German edition of this work is being prepared by the Bavarian Academy of Sciences, Munich.

वृत्तं [1]सार्धद्विहस्तं मुनिमनुनियतं [2]अंगुलं च्छिद्रमेकं
त्यक्त्वा हस्तं हि यष्टिः प्रविशति कणये कीलिताः पृष्ठभागे ।
पञ्चाशद् रज्जुबद्धे शिरसि च कटके मूर्ध्नि [3]मानार्धवृत्ते
यष्ट्यन्ते सांगुलीकं प्रविशति वलयं [4]वृत्तमेकावितस्तिः ॥ १२९ ॥

यष्ट्यंगुल्या त्रिहस्तं भवति च नियतं क्षेपणं रज्जुसार्धं
पाषाणं तस्य मध्ये प्रविशति बलवत् कट्टकै[5] कंट्यमानं ।
मुक्तं खे याति शीघ्रं निपतति सहसाट्टालकादौ[6] प्रतोल्यां
चूर्णीकृत्वा समस्तं व्रजति भुवितलं वज्रपातो यथैव ॥ १३० ॥

तस्यांगुल्यर्धचन्द्रा क्षितितलनिलये ब्रह्मरेखा द्विपार्श्वे
द्व्यष्टौ[7] मोक्षप्रदेशा उभयकरतलान् मुष्टिबन्धाद्धि मोक्षः ।
मोक्षे भूस्पर्शनं वै समविषमपदे यन्त्रगर्भे स्थितैश्च
स्वेच्छापाषाणपात[8]स्त्रिविधगतिवशाद् दुर्गविध्वंसनार्थं ॥ १३१ ॥

ऐभं यस्य प्रहारे निपतति सहसा तस्य किं क्षुद्रजन्तुः
कोट्टाट्टाले स्थितं यद्रिपुबलसकलं पातयेद् बाह्यसंस्थं ।
का स्पर्धा तेन सार्धं क्षितितलनिलये धन्विनां दुर्गयुद्धे
कः शत्रुस्तत्र दुर्गे विशति यममुखे यत्र यन्त्रप्रहाराः ॥ १३२ ॥

---

1. D. साधं
2. CLPD. द्व्यंगुलं ; sor mo t'ub pa ma nur ñes pa'i bug gčig šu ni.
3. CD. °मानर्द्धि° ; c'ad ni slum po p'yed.
4. CD. वृत्तिमे°
5. D. कण्टकैः कण्ट्यमानं ; 't'yen byed rnams kyi 't'en par gyur pa dag.
6. D. सहसा तालकादौ
7. D. व्यष्टौ ; brgyad gñis btan ba'i gnas rnams dag ste
8. CD. °घात° ; rdo ba lhun ste

षट् षट् स्तम्भे भुजैः स्यादुभयपुटसमो युग्म हस्तान्तराले[1]
गर्भैकैकोऽर्कहस्तोप्युभयपुटसमो नाधिको हीन एव ।
[a]सर्वं प्रत्येककोष्टे पिहितमपि फलैश्चर्मभिः सिक्थ[2] वस्त्रै-
गर्भे[3] ऋत्वष्टदोषै स्त्रिगुणदिनकरै रेकयन्त्रं प्रकुर्यात् ॥ १३३ ॥

द्वौ द्वौ गर्भान्तराले स्खलितमपि भुजे मुद्रितं वा समन्तात्
पृष्ठे षट् कर्ण[4]धारा उभयभुजसमा चाग्रतो यन्त्रवाहाः ।
कूपस्तम्भे[5] निबद्धै श्चलदनिलपटै श्चालितं चानिलेन
तत्रारूढं [6]स्वसैन्यं व्रजति जलनिधौ तोयदुर्गक्षयार्थं ॥ १३४ ॥

एके पीठेऽब्धिकोणे चलदनिलपटः [7]सध्वजस्तम्भबद्धः
पक्षे पृष्टे मनुष्यैः स्खलितमपि महौ रज्जुना मूर्ध्नि गच्छन् ।
वातेनोद्धूयमानो[8] व्रजति नभसि वै शैलदुर्गस्य मूर्ध्नि
तस्मान् मुक्ताग्नितैलं दहति रिपुबलं सर्वदुर्गं समन्तात् ॥१३५ ॥

चक्रं मूलेऽरघट्ट प्रभवति कणये चाग्रतश्चक्रमन्यत्
द्वि द्व्यंगुल्यन्तराले [9]अरमपि रचितं मण्डलाग्रे समन्तात् ।
चक्रं सार्धद्विहस्तं भवति च कणयश्चोर्ध्वतोन्यः स यष्टि-
र्यष्ट्यग्रे तीक्ष्णखड्ग भ्रमति लघुतया भ्रामिते यन्त्रमूले ॥ १३६ ॥

---

1. OD. °न्तरालैर्°
2. CLD. सिक्त°
3. L. कुम्भे D गर्भे ; sñin po
4. D. °काण्डधारा
5. P. °प्रबद्धै°
6. D. सुसैन्यं ; raṅ gi sde ni
7. D. स ध्वजस्तम्भबन्धः ; rgyal mo'an bcas pa ka par gdags
8. P. °नोद्धूयमानो ; rluṅ gis rab tu bskyod par gyur pa
9. OLD. पुनरपि P. पुरमपि ; sor mo gñis gñis bar du rcibs su 'gyur te.

a. so so'i re mig kun la sbaṅ leb dag daṅ lpags pa spra o'il gos rnams kyis kyaṅ Gyogs pa ste

रज्जुक्या वातयन्त्रं व्रजति हि गगने [1]स्वप्रदेशात् क्रमेण
दुर्गोर्ध्वे शत्रुवेश्मं प्रति गत[2] नियतां रज्जुकी नामयित्वा[3] ।
भूमौ मानं तया वै कथितमपि भवेद् शृङ्ग भेदे रिपूनां
शृङ्गं दग्ध्वा समन्ताद्[4] रिपुभवनतले मण्डपेऽग्नि प्रदद्यात् ॥ १३७ ॥

चक्राणां मूर्ध्निभागे रचितमपि महामन्दिरं लोहकाष्ठै-
र्वृत्ताकारं समन्तात् पिहितमपि फलैः [5]चर्मभिर्माहिषैश्च ।
मानुष्यैश्चाल्यमानं व्रजति सममहो [6]खानिकां [7]यावदेव
तत् खानिं पूरयित्वा प्रविशति सहसा कोट्टभित्तौ प्रतोल्यां ॥ १३८ ॥

पीठे कोलद्वयं वै सगुणमपि धनु निश्चलं यन्त्रयित्वा
पृष्ठे द्वौ लोहकीलौ सुरचितकणयेऽप्यंगुलोकार्धवक्राः[8]
अंगुल्यग्रे गुणेन [9]प्रचुर समशरास्तीक्ष्ण नाराचकानां
मुक्ताः संग्रामकाले सगुह गजतनु भेदयित्वा प्रयान्ति ॥ १३९ ॥

द्वौ स्तम्भौ भूमिगर्भे दृढमपि निहतौ रज्जुभि र्वेष्ट्यमानौ
रज्जौ मध्येऽसिमुष्टि विशति सवलयावर्तितानेकवर्ते ।
तन् मध्ये खड्गमुष्टिः प्रभवति नियता निश्चला कीलिता च ।
[10]मुद्रावर्तेन सार्धं पिहितमसिवरं[11] स्तम्भितं चाग्रभागे ॥ १४० ॥

1. CD. सुप्रदेशात् L. सुप्रभेशात्
2. CL. द्रति
3. P. मानयित्वा
4. L. समस्ताद्
5. P. माहिषैश्चर्मभि र्वा
6. CLD खादिका ; 'obs ni
7. CLD. यावदेतत् ; ji srid ñid du
8. D °चक्राः ; p'yed 'k'yogs rnams
9. CLD. प्रवर° ; maṅ žiṅ mñam pa'i
10. L. मुद्रावृत्तेन
11. Tibetan version suggests the reading to be असिधारम्—ral gri'i ...yi rca mo

तस्योर्धे छिद्ररेखा भवति च फलके निर्गमश्चालितस्य
खड्गोर्धे देय एकस्त्वयसकृत लघुश्चन्द्रमा मध्यभागे ।
पादो यस्येन्दुमुर्ध्नि प्रपतति सहसा छिद्यते सोऽसिना च
कोट्टद्वारावसाने नरपतिभवने यन्त्रमेव प्रहारि ॥ १४१ ॥
अक्षोर्धं[1] मूलपीठं भवति रविभुजैश्चक्रमानन्नवांशं
कोणे स्तम्भार्गलाभि विषम समरथो [2]द्व्यर्धमानेन पीठात् ।
भागार्धे योधभूमि विषम समधुरा वाजिनां वा गजानां
[3]तस्माच्चक्रार्धभूमावुपरि विरचितादर्शहाराध्वजाद्याः ॥ १४२ ॥
सार्धैकद्वित्रिभागा शशिकरशिखिनो मूल[4]पीठासनानां
वृत्ता सार्धैकभागे[5] कमल[6]रथमहीनन्दिभेदे[7] समा स्यात् ।
[a]साधारं चक्रमानं तुरगगजवशात् सार्धहस्तं द्विधा च
देवानां पद्मजातिः सुरसुतविहितो नन्दिजाति र्नराणां ॥ १४३ ॥
अष्टाम्भोध्यक्ष[8]चक्रैस्त्रिविध इह महास्यन्दनोऽर्धसमश्च
दिव्योऽर्कस्यैकचक्रो विषमहयरथश्चासुराणां विनाशः ।
युद्धे वैवर्तिकः स्याद्विषमसममहास्यन्दनः क्षत्रियाणां
भग्नोर्धः संमुखो वै समविषमरणे पृष्ठभङ्गी समः स्यात् ॥ १४४ ॥

---

1. P. अक्षार्धे ; srog śiṅ sten du
2. CD. सार्धमानेन L. सार्धनेन ; gnas las gñis daṅ p'yed kyi c'ad kyis so.
3. All the Mss. read तस्माच्चिह्नार्ध, but the Tibetan version °चक्रार्ध°—de nas 'k'or lo'i p'yed—is more convincing.
4. All the Mss. read °पीठार्गलानां, but the Tibetan version °पीठासनानां—gnas deṅ gdan rnams kyi—seems to be more appropriate here.
5. CLD. °भागे: 6. CLD. कमर 7. CLD. भेदै:
8. CL. अष्टाम्भोध्यक्षिरचक्रै° D. °ध्यक्षिचक्रै° ; srog śiṅ 'k'or lo rnams kyis.

a. rten daṅ bcas pa 'k'or lo'i c'ad ni rta daṅ glaṅ po'i dbaṅ gis p'yed daṅ bcas pa rnam gñis kyaṅ.

षट्पञ्चाब्ध्यग्निभागैः प्रभवति च समाच्छिद्रिता स्तम्भकोटि-
[a]मूलादूर्ध्वार्धभागो भवति पुरवशाच्चामराणां विमाने ।
एवं भूमौ नृपाणां त्रिविधपुरवशाद्देशयात्रोत्सवे च
[b]हस्ताद्धस्तान्तरेण प्रभवति हि महाभ्रामरी सर्वदिक्षु ॥ १४५ ॥

चक्रोर्ध्वे स्तम्भमूर्ध्नि त्रिविधपुरवशाद्दोलकाः सर्वदिक्षु
द्व्यष्टावष्टौ ततोऽर्धो[2] दिगृतुयुगभुजाधार एष त्रिभूमौ ।
ऊर्ध्वाधो[3] भ्राम्यमाणे भुजधृतकणये योषितामासनानि
अन्तर्बाह्ये निवेष्टान्यध उपरि गतान्यष्टदिक् चालितानि ॥१४६॥

ऊर्ध्वाधो वक्रमानं भवति च नलिकाकारयन्त्रं समन्तात्
नालाग्रे कुम्भरूपे शुषिरमपि भवेन्नाल[4] रन्ध्र प्रमाणं ।
तोयाकृष्टिं करोति स्खलितमपि जलं मोक्षितं कुम्भरन्ध्राद्
उद्याने वाटिकायां व्रजति सममहो नीयते यत्र तत्र ॥१४७॥

दुष्टानां साधनार्थं प्रवरभुवितले धार्मिकानां जयार्थं
पूर्वोक्तं चादिबुद्धे त्रिभुवनगुरुणा यत् सुचन्द्रस्य सर्वं ।
तन् मध्ये किञ्चिदत्र स्फुटमिह विषये देशितं ते मयाद्य
स्वस्थानं[5] रक्षणार्थं कुरु सकलमिदं द्वेषलोभै र्न सूर्य[6] ॥१४८॥

---

1. D. हस्ताघस्थान्तरण
2. OLD. °ततोऽर्घ°
3. D. ऊर्ध्वेऽधो
4. OLD °नाडि
5. D. ०स्थाने
6. D. सूर्यः

a. rca ba dag las sten du p'yed kyl č'a ni rceg ma'i dbaṅ gis 'gyur te lha rnams gžal med k'aṅ

b. k'ru nas k'ru yi bar dag gis ni p'yogs rnams kun tu 'k'or ba dan lhan č'en por rab tu 'gyur.

मद्यक्षाराब्धिमध्ये मुनिमहिवलये संस्थिता कर्मभूमि
त्रैलक्षे[1] योजने च भ्रमति नरपतिः सूर्यखण्डान् क्रमेण ।
खण्डैकं योजनानां वसुदलसहितं पञ्चविंशत् सहस्रं
कैलास[2] स्तस्य मध्ये वरहिमगिरिणा वेष्टिता सर्वदिक्षु ॥१४९॥

भूमौ कैलासखण्डं हिमगिरिसहितं तत्[3] त्रिभागं समन्तात्
बाह्ये चैकैकपत्रं[4] दिनकरविषयै र्भूषितं द्वीपदेशैः ।
सव्यार्धे शम्भलाख्यं मुनिवरनिलयं ग्रामकोट्याधिवासं
कोटिग्रामै निबद्धो भवति हि विषयो मण्डलं ग्रामलक्षैः ॥१५०॥

एक द्वि त्र्यब्धिभेदैः [5]शर रस विजनैः पञ्चलोकादिभेदै-
र्भिन्नश्चक्री नरेन्द्रो भ्रमति भुवितलेऽन्वेषणीयः सुविज्ञैः ।
चक्री [6]चार्धी च खण्डी विषयनरपति र्मुद्रहस्तस्ततोऽन्यो
बाह्ये कालस्य भेदः खलु भवति यथा लोकनाथस्य तद्वत् ॥१५१॥

[7]सप्तार्चिंर्ब्यद्रिवारा मुनय इह तथा सात्त्विका दिव्ययोनि-
र्मत्स्यः कूर्मो वराहो नरहरिसहितो वामनो यामदग्निः ।
रामः कृष्ण स्तथाष्टौ दनुकुलभयदा राजसा भूतयोनि-
र्द्वात्रिंशद्विष्टरान्ते भवति दनुरिपुश्चक्रपाणिः शतायुः ॥१५२॥

---

1. CL. त्रैलोक्ये ; 'bum p'rag gsum la
2. CLD. कैलासं
3. CLD. तत् भागं
4. D. चैकैकयन्त्रं
5. CLD. सरसर° ; mda' ro t'ub pa lṅa daṅ 'jig rten la sogs dbye-ba yis
6. CLD. चार्धा
7. CD. सप्ताब्ध्यक्षद्रि° L. सप्ताब्ध्यक्षद्रि° ; 'od zer bdun daṅ ri gza'

आर्घोऽनोघो[1] वराही दनुभुजगकुले तामसान्येपि पञ्च
"मृगेशौ[2] श्वेतवस्त्रो मधुपतिमथनीयोऽष्टमः[3] सोऽन्धकः स्यात् ।
संभूतिः सप्तमस्य स्फुट मखविषये वागदादौ नगर्य्यां
"यस्यां लोकोऽसुराज्ञो[4] निवसति बलवान् निर्दयो म्लेच्छमूर्तिः ॥१५३॥

उष्ट्राश्वौ [5]गाश्च हत्वा सरुधिरपिशितं शुद्धपक्वं हि किञ्चित्
गोमांसं [6]सूततोयं घृतकटुकसमं तण्डूलं शाकमिश्रं ।
[7]एकस्मिन् वह्निपक्वं [8]वनफलसहितं यत्र भोज्यं नराणां
पानं चाण्डं खगानां भवति नरपते तत्पदं चासुराणां ॥१५४॥

बिन्दुशक्त्यञ्जनो[9] यो गरुडः सुरसरिन्नारदः कामधेनुः
दुर्गा [10]विद्युत् सुविद्याक्षर परमकला दिव्यभाषा शरीरा ।
एतैः सञ्चाररूपैरवतरति भुवि ज्ञानकायो जिनस्य
भूतं भव्यं भविष्यत् प्रवदति सकलं वेदतर्कादिशास्त्रं ॥१५५॥

श्रीमान् राजन् कलापे कतिपयदिवसैः शम्भलाख्ये प्रसिद्धे
शैलावेष्टे चतुर्दिक् शर गुणित शते योजनानां प्रमाणे ।
स्वस्थाने यास्यसि त्वं प्रवरनरपतिं स्थापयित्वा सुरेशं
सप्त श्रीशाक्यवंशे प्रकट नृपतयश्चाष्टमः श्रीयशश्च ॥१५६॥

1. CLD. अद्राऽमाघारनादो
2. CPD. म्लेच्छोऽसौ L. शस्टोसौ
3. D °मथनी योष्टमः
4. C. सराशी L. सुराशिनी वसति PD. लोकोऽसुराशी
5. CL. गां सुहत्वा D. गाश्च हत्वा स रुधिर
6. dnul c̆'u c̆'u daṅ
7. CLD. एकत्वं
8. CLD. नवफल°
9. D. शक्त्याञ्जनेयो
10. D. विद्वत्सु ; rjeṅ daṅ glog daṅ rig pa bzaṅ po

a. byl ba dbaṅ po gos dkar c̆an daṅ sbraṅ rci ldan pa 'joms byed brgyad pa gaṅ de mun pa c̆an.

b. gaṅ du 'jig rten lha min yan lag stobs daṅ ldan par gnas s̆iṅ broe ba med pa klo klo'i gzugs.

सोऽयं श्रीमञ्जुवज्रः सुरवरनमितो वज्रगोत्रेण कल्को
दत्त्वा वज्राभिषेकं सकलमुनिकुलान्येककल्कं करिष्यत् ।
सम्यगाज्ञाभिरूढो[1] दनुकुल[illegible]ः श्रीयशः सेल्लपाणिः[2]
सत्त्वानां मोक्षहेतोः प्रव[illegible] म[illegible] कालचक्रं करिष्यत् ॥१५७॥

तन्मध्ये पञ्चविंशत् क्रमपरि[illegible]ते [illegible]णां युगान्ते
कल्कीगोत्रे सुरेशः सुरवरनमिता रौद्रकल्की[3] भविष्यत्[4] ।
साधूनां शान्तिरूपः सुखद इति तथैवान्तकः म्लेच्छजातेः
शैलाश्वारूढश्चक्री हनदरिसकलं[5] सेल्लहस्तोऽर्कतेजः[6] ॥१५८॥

कल्की गोत्रस्य मध्ये करगुणितयुगे पुत्रपौत्रेष्वतीते
तस्मिन् काले भवेद् वै खलु मलविषये म्लेच्छधर्मप्रवृत्तिः ।
यावन् म्लेच्छेन्द्रदुष्टः सुरवरनमितो रौद्रकल्की च यावत्
तस्मिन् काले द्वयोश्च क्षितितल निलये रौद्रयुद्धं भविष्यत् ॥१५९॥

युद्धे म्लेच्छान् हनन्[7] यः सकल भुवितले चातुरङ्गैः स्वसैन्यैः
कैलासाद्रौ युगान्ते सुररचितपुरे चक्रवर्त्यागमिष्यत् ।
रुद्रं स्कन्दं गणेन्द्रं[8] हरिमपि च सखीन् दास्यते कल्किनश्च
शैलाश्वान् वारणेन्द्रान् कनकरथनृपान् शस्त्रहस्तान् [9]भटांश्च ॥१६०॥

1. D, °गाज्ञानिरूढो ; yaṅ dag t'og par mṅon 'jegs
2. mduṅ t'uṅ čan
3. OL. रौद्रकी
4. P. करिष्यत्
5. O. °रिपुबलं L, रिपुवरं ; mt'a' dag dgra la bsnun byed
6. PD. °तेजाः
7. OL. हनन्य
8. OL. कणेन्द्रं
9. O. फटा L. फटाश्च

शैलाश्वै र्वायुवेगै गु णै¹ गुणित गुणैः कोटिभि र्विश्ववर्णै-
र्वेदाख्यै² र्लक्षसंख्यै र्मदमुदितगजैः स्यन्दनै र्भूतलक्षैः ।
षड् भिश्चाक्षौहिणीभिः रसनवतिकुलै र्मौलिबद्धै र्नरेन्द्रै-
रेतत् सैन्येन कल्की हरिहरसहितो म्लेच्छनाशं करिष्यत् ॥१६१॥

हन्तव्यं म्लेच्छवृन्दं वर³कटुकभटै र्वारणेन्द्रै र्गजानां
शैलाश्वैः सैन्धवानां समविषमरणे पार्थिवैः पार्थिवानां ।
अश्वत्थामं महाचन्द्रतनय हनूमांस्तीक्ष्णशस्त्रै र्हनिष्यत्
रुद्रो म्लेच्छेन्द्रनाथं सकलदनुपति ⁴कृन्मतिं रुद्रकल्की । १६२ ॥

हत्वा म्लेच्छांश्च युद्धे हरिहरसहितः सर्वसैन्येन⁵ कल्की
कैलासाद्रौ व्रजिष्यत् सुररचितपुरे संस्थितो यत्र चक्री ।
तस्मिन् काले धरण्यां सकलजनकुलं धर्मकामार्थपूर्णं
⁶शस्यान्यरण्यजानि स्थिरफलनमितास्ते भविष्यन्ति वृक्षाः ॥१६३॥

उच्छिन्ने⁷ म्लेच्छवृन्दे परिजनसहिते मानवाब्दे शतार्धे
कल्की सिद्धिं व्रजिष्यत् सुररचितपुरे तुङ्गकैलास पृष्ठे ।
पुत्रो ब्रह्मासुरेशो⁸ त्रिदश नरगुरो युग्मवर्म भवेतां
ब्रह्मा पृष्ठैकखण्डे भवति नरपतिः ⁹सर्वभूम्यां सुरेशः ॥१६४॥

---

1. D. °गण
2. L वेदाख्यं
3. D. °कटक
4. D. कृन्मती
5. LD. °सैन्यैक ; dpuṅ ni t'ams čad dag gis Gyul du
6. OLD. सस्या° P. शश्या°
7. PD. उच्छन्ने
8. OLD. पुत्रो ब्रह्मा सुरेश°
9. All the Mss read सव्यभूम्यां but the Tibetan version सर्वभूम्यां—as kun la ni—seems to be better.

कृत् सव्यान् म्लेच्छधर्मं त्रिभुवनगुरुकश्च्छेदयित्वा समस्तं
स्थित्वाब्दाष्टौ शतानि व्रजति सुखपदं ब्राह्मणं स्थापयित्वा ।
भूयस्तस्यैव मध्ये भवति नरपते वर्णभेदः सुतानां
तेषां मध्येऽ सुरेन्द्रो[1] नरपतिमुनयः प्राकृतान्ये भवन्ति ॥१६५॥

म्लेच्छानां नाशहेता व्रजति सुरपति द्वादशेन्द्राभियुक्तः
खण्डे खण्डे च चक्री व्रजति सुखपदं म्लेच्छधर्मं निहत्य ।
पुत्रो ब्रह्मा सुरेश स्त्रिदशनरगुरोः [2]पृष्ठतश्चाग्रतश्च
पृष्ठे ब्रह्मादिवंशो[3] विविध[4] भुवितलेऽनेकभेदा भवन्ति ॥१६६॥

ब्रह्मादौ[5] मानवाब्दाष्टादशशत युतं चायुरे[6]तन्नराणां
तस्यार्धं काश्यपस्य प्रवरभुवितले नारसिंहस्य चार्धं ।
षष्ट्या हीनं तथैव प्रतियुग समये वामनादौ हरेश्च
[7]कल्क्यन्तं यावदायुष् प्रभवति [8]च शतैकाब्द संख्या जनस्य ॥१६७॥

एवं[9] सर्वेषु खण्डेष्वपि युगसमयान् म्लेच्छ धर्म प्रवृत्ति-
र्वर्षाष्टैकं[10] शतं वै स्थितिरपि च ततो म्लेच्छधर्मस्य नाशः ।
तस्माद्विशत् सहस्रं करशत [11]रहितं बुद्धधर्मप्रवृत्तिः
कृत् त्रेता द्वापरं वै वहति कलियुगं शक्तिमानेन भूम्यां ॥१६८॥

1. D. मध्ये सुरेन्द्रा ; de rnams dbus su lha min dbaṅ po
2. CL. पृष्ठतश्चा तद्वत् D °श्चात्र तद्वत् ; rgyab daṅ mdun du ste
3 D °वंशाः
4. CLD. त्रिविध ; sna ts'ogs sa yi steṅ du
5. CL ब्रह्माब्दौ
6. D. चासुरेत°
7. D. कल्पान्तं
8. D. drops
9. CLD. सर्वं ; de ltar dum bu t'ams čad du yaṅ
10. D. °वर्षास्वैकं ; lo ni brgyad daṅ gčig gi
11. CL. सहितं ; lag pa brgya daṅ bral ba

उत्पत्ति र्लोकधातो ग्र्ह्वरणसमा सम्भवश्चक्रिणश्च
म्लेच्छानां धर्मनाशः परमसुखपदे कल्किनो[1] मार्गदानं ।
एतत् सर्वं यथार्थं कथितमपि मया ते सुचन्द्र त्रिकालाद्
भूयः किं पृच्छसि त्वं सकल जनहितार्थश्च मां मोक्षहेतोः ॥१६९॥*

इति श्रीमदादिबुद्धोद्धृते श्रीकालचक्रे[2] लोकधातुविन्यासः पटलः[3]
प्रथमः

1. D. कल्किना
2. P. °महाकालचक्रे
3. P. प्रथमः पटलः
* The Patna Ms. has 179 verses. see p. 23 above

द्वितीयः पटलः

न ज्ञातं विश्वमानं जिनजनक मयायत् त्वया देशितञ्च
भूयोहं श्रोतुकामस्त्रिभुवनसकलं देहमध्ये कथं स्यात् ।
श्रुत्वा सौचन्द्रवाक्यं प्रवदति सुगतः साधुकारं प्रदाय
सत्त्वानां मोक्षहेतोः परमकरुणया विश्वमानं च[1] देहे ॥१॥

पृथ्वी तोयाग्निवाताः कुलिशसुरधनु र्वायवो राशिचक्रं
चन्द्रार्कौ राहुमेरुः फणिमनुजसुराः वासवक्राः[2] सताराः ।
संक्रान्तिर्मासपक्षा दिननिशितिथयो देहमध्ये समस्तं
ज्ञातव्यं स्व स्व वर्णै स्त्रिविध [a]विभुगति र्योगिना शून्यभेदैः ॥२॥

देहेऽस्मिन् धातुवृन्दं भवति हि सकलं [b]षड्रसाहारपानात्
भूतेभ्यः षड्रसाश्च प्रकटितनियतं भूतवृन्दं खधातोः ।
[c]शून्ये ज्ञाने विमिश्रं भवति समरसं चाक्षरं शाश्वतञ्च
[d]एवं भूतस्य शान्तं त्रिविधभवगतं वेदितव्यं स्वकाये ॥३॥

[e]बीजं धत्ते धरित्री कमलगतमतो रोहयत्यम्बुपश्चात्
[f]तेजो बोधं करोति ग्रसति रसरसं मारुतो वृद्धिमस्य[3] ।
वृद्धेः खं चावकाशं ददति नरपते कालतः [4]सिद्धिरेवं
दिव्याः कुर्वन्त्यवस्थाः[5] प्रसवनसमये बालकादौ च काले ॥४॥

---

1. CD. °मानं स्व देह ; sna c'ogs c'an rnams dag kyan lus la'o
2. CLD °चक्रा ; gnas dan 'k'yog po
3. CLD. वृद्धिमेव
4. CLD. °रेव
5. D. °वस्थां

a. k'yab bdag bgrod pa rnal 'byor pa yis ston pa'i dbye bas so

b. ro drug zos śin 'tuṅs pa

c. stoṅ pa la ni ye śes rnam par bsres pa ro mñam 'gyur med rtag par yaṅ ni 'gyur ba ste.

d. de ltar 'byuṅ ba la gnas pa rnam gsum srid pa la gnas raṅ gi lus la rig par bya.

e. sa bon pa dmar gnas pa dag ni 'jin mas 'jin te de las č'u yis sdud do p'yi nas ni

f. me yis smin par byed čiṅ ro daṅ ro ni za bar byed de 'di 'p'el ba rluṅ gis so

बीजस्य क्ष्मा करोति स्फुटगुरुघनतां तोयमेव द्रवत्वं
तेजः पाकं करोति प्रवरदशविधो मारुतो वृद्धिमस्य ।
वृद्धे भूयोऽवकाशं ददति हि गगनं कालतः [1]सृष्टिरेवं
नानाभावैरनेकैः सतनुरवमनः शक्तयः स्फारयन्ति ॥५॥

गुह्याब्जे रक्तमध्ये पतितमपि यदा [a]बोधिबीजं सबीजं
मत्स्यः कूर्मो वराहो भवति नरहरि र्वामनो [2]रामरामौ ।
कृष्णो बुद्धो नरेन्द्रो भवति दशविधं चाप्यवस्था दशैता
गर्भे तिस्रस्तथैका प्रसवनसमये बालकाले पि च द्वे ॥ ६ ॥

कौमारे यौवनेन्या प्रभवति विपुलैका च सम्यक् तथैका
वृद्धत्वेप्येकशान्ता [3]भवति निधनता चान्तिमा गर्भजानां ।
मत्स्याकारस्तु [4]मात्स्ये भवति कतिदिनं कूर्मभावस्तु[5] कौर्मे
वाराह्येतस्य सूर्यायतनमपि भवेन् नारसैंह्ये[6] प्रसूतिः ॥७॥

वामन्ये बालभावो[7] द्वि नृपति दशनान्युद्भवं यान्ति राम्ये
[b]भूयो राम्ये पतन्ति स्फुटमपि कपटं कारयेत् सैव काष्र्ण्ये ।
बौद्धे शान्तिं करोति व्रतमपि [10]नियमं याति मृत्युञ्च कल्क्ये
शुक्रे[8] मज्जास्थि नाडी भवति रजसि वै चर्मरक्तञ्च मांसं ॥८॥

---

1. OLD पुष्टिरेव ; de ltar bskyed pa ste
2. CLD. वामरामौ
3. CLD. भुवन° ; srid pa 'č'i ba ñid ni t'a ma'o
4. P. मांस्ये ; ña la ña yi rnam par 'gyur ba
5. P. °भावश्च
6. P. नारसिंहे
7. P. बालता च
8. D. शुर्क्रैर्

a. byaṅ č'ub sa bon srog daṅ bčas pa da
b. slar yaṅ rā ma la ni l'uṅ bar 'gyur te de ñid nag po la ni gsal bar sgyu dag byed

रक्तं बीजं प्ररोहत्यमृतरसगतं गर्भमध्यैकमासे
पश्चाद्बीजांकुरस्य [1]स्वहृदि दशविधा नाडिकात्यन्तसूक्ष्मा: ।
[a]नाभौ चाष्टाष्टकान्याः करचरणमुखेषूर्ध्वत: सर्प्यमाणाः
मासे पूर्णे द्वितीये करचरणमुखोद्भेदनं किञ्चिदत्र ॥९॥

हस्तौ पादौ च कण्ठो भवति समशिरः पूर्णमासे तृतीये
सूक्ष्मा मासे चतुर्थे करचरणमुखे नाडिकाः कण्ठदेशे ।
[b]मांसान्यसृक्[2] चास्थीनि खरसशिखिनः पञ्चमे सन्धयश्च
षष्ठे मासे च मांसं भवति च [3]रुधिरं वेदनासौख्यदुःखं ॥१०॥

भ्रू केशा रन्ध्र रोमाण्यपि च मुनिवरे नाडिकाः सावशेषाः
मासादूर्ध्वं हि जाताः प्रतिदिवसवशाच्छून्यशून्याक्षि संख्याः ।
मर्माण्यस्थीनि मज्जा भवति च रसना [c]मूत्रगूथेष्टमे च
रन्ध्राख्ये घोरदुःखं प्रसवनसमये योनिना पीडितस्य ॥११॥

गर्भे गर्भस्थदुःखं प्रसवनसमये बालभावोपि दुःखं
कौमारे यौवने [d]स्त्रीधनविभवहतं क्लेशदुःखं महद् यत् ।
वृद्धत्वे मृत्युदुःखं पुनरपि भयदं षड्गतौ रौरवाद्यं
दुःखाद् गृह्णाति दुःखं सकलजगदिदं मोहितं मायया च ॥१२॥

---

1. D- सुहृदि
2. LP. मांसान्याश्रित्य
3. D. धिरं

a. lte ba la yan brgyad pa brgyad ni gžan te rkan lag gdon rnams la ni gyen du skyod par byed.

b. lṅa pa la ni ša daṅ grag daṅ rdus pa mk'a' ro bsreg za dag ste c'ig rnams dag kyaṅ ṅo

c. gčl ba bšaṅ ba brgyad pa dag la yaṅ

d. gžon nu daṅ ni laṅ c'o dag la bud med nor daṅ 'byor ñams ñon moṅs sdug bsṅal č'en po gaṅ

संसारे मानुषत्वं क्वचिदिति[1] हि भवेद् धर्मबुद्धिः कदाचित्
तस्माद् बुद्धेऽनुरागो[2] भवति शुभवशादादियाने प्रवृत्तिः ।
[a]तस्मात् श्रो वज्रयाने क्वचिदखिलमति वर्तते भावनायां
तस्माद् बुद्धत्वमिष्टं परमसुखपदेऽह्नो[3] प्रवेशोतिकष्टं ॥१३॥

गर्भे संशुद्धकायः प्रसवनसमयाद् दन्तभावाच्[4] च धर्मः
दन्तानां वै प्रपातः प्रभवति नृप संभोगकायो जिनस्य ।
तस्मान् निर्माणकायः प्रकटितनियतो मृत्युसोम्ना नराणां
गर्भे बाह्ये चतुर्धा भवति पुनरसौ ज्ञानविज्ञानभेदात् ॥१४॥

विज्ञानं चन्द्रसूर्यावपि कमलगताः शुद्धकायः [5]सगर्भे
धातुस्कन्धोद्भवो यो भवति दशविधो धर्मकायो जिनस्य ।
तस्मात् संभोगकायो भवति गुणवशाच् छ्रोत्रशब्दादि [6]जाते
[b]तस्मात् केशादि[7] जाते प्रसवनसमयश्चात्र निर्माणकायः ॥१५॥

जाते श्वासाद्भवो यः प्रभवति नियतः शुद्धकायः स एव
[c]तस्माद् दन्तोद्भवो यः [8]स्फुटमिति वचनं धर्मकाय[9]स्तथैव ।
तस्मात् पाते[10] द्विजानां प्रभवति नृप संभोगकायो जिनस्य
दन्तेभ्यो मृत्युसीम्नो भवति जिनपते र्बाह्य निर्माणकायः ॥१६॥

---

1 P क्वाचिदपि
2 P. बुद्धानुरागो
3 D. °सुखपदे ह्रा
4 LD °भावार्थ
5. D स गर्भे
6. P. °जातिः
7. P. °जातिः
8 P. स्फुटमपि
9. LD. °धर्मकायं
10. P. पातो

a. de bas dpal ldan rdo rje t'eg pa sgom pa la ni blo gros ma lus brgya lam dag ni 'jug//de las sans rgyas ñid 'dod mc'og gi bde ba'i go 'p'an dag la 'jug pa e ma šin tu dka'

b de nas skra la sogs pa skyes te rab tu bca' ba'i dus kyan 'dir ni sprul pa dag gi sku.

c. de nas so ni rab 'byun gan žig c'ig ni gsal min dag kyan de bžin ñid du č'os kyi sku.

ᵃगर्भे श्रीकायवज्रं प्रथममिह भवेद् वाक्स्वरूपं [1]प्रसूतेश्
चित्तं दन्तोद्भवे स्यात् पुनरपि पतनादुद्भवे ज्ञानवज्रं ।
ज्ञानं विज्ञानमिश्रं रविशशिसहितं ज्ञानवज्रादि सर्वं
गर्भे रूढंᵇ क्रमेण प्रभवति बलवत् कायवज्रादिना च ॥१७॥

ᶜपृथ्वीगर्भो[2] हुताशो भवति च धरणी मारुतः शून्यगर्भो
वायो र्भूमेश्च[3] गर्भं भवति हि सलिलं निःस्वभावः स्वभावं ।
ᵈभूमेराधारमम्बुज्वलनमपि[4] जलस्यानिलः पावकस्य
वायोः शून्यं नरेन्द्र प्रभवति हि यथाधार आधेयभूतः ॥१८॥

स्कन्धाधारो हि भूतं भवति वरतनौ भूतवृन्दस्य नाड्यो
नाडीनां प्राणवायु र्भवति दशविधश्चेतना प्राणवायोः ।
तच्चित्तं द्विस्वभावं भवति गुणवशात् [5]सस्वभावास्वभावं
भर्त्ताधारस्तयोश्च त्रिभुवननमितोऽनाहतः सर्वगो यः ॥१९॥

गन्धोत्पत्ति र्धरण्यामपि शिखिनि रसस्योदके रूपधातो
र्वायोः[6] स्पर्शस्य शान्ते त्वपि भवति [7]खस्याम्बरे धर्मधातोः ।
शून्यं गृह्णाति शब्दं खलु जिनजनको धर्मधातुं च वायु
र्गन्धं वह्निस्वरूपं रसमपि सलिलं स्पर्शमेवं धरित्री ॥२०॥

1. CD, प्रसूते
2. CLD, °गर्भे
3. CLD, °भ्ॅमे सगर्भो D, °स गर्भो ; rluṅ daṅ sa yi sñiṅ po
4. CD. °राधार आपो ज्वलन इह
5. D, स स्वभावा° ; raṅ bžin čan daṅ raṅ bžin med pa'o
6. CLD, वायो
7. D. खस्या° ; sgra daṅ č'os kyi k'ams ni nam mk'a' dag las so

a. mṅal du 'dir ni daṅ po dpal ldan sku yi rdo rjer 'gyur te gsuṅ gi raṅ bžin sk'yes pa na'o

b. mṅal na gnas pa dag ni

c. sa yi sñiṅ po dag ni tsreg sar 'gyur te 'jia ma daṅ ni rluṅ dag stoṅ pa'i sñiṅ po'o

d. sa yi rten ni č'u ste 'bar byed dag kyaṅ č'u yi rluṅ ni dag par byed pa dag gi'o//rluṅ gi stoṅ par rab tu 'gyur te mi yi dbaṅ por 'byuṅ ba'i rten daṅ brten pa ji lta bžin.

'सिद्ध' रूपं धरण्यां त्रिभुवननिलये चोदके सिद्धसंज्ञा
वह्नौ वे[1] वेदना च प्रभवति पवने स्कन्ध[2] संस्कार एव[3] ।
विज्ञानं ज्ञानमिश्रं [4]सगगनकुलिशे सिद्धमेवात्र काये
धातुस्कन्धादि सर्वं भवति च रजसा बोधिचित्तादि[5] योगात् ॥ २१ ॥

श्रोत्रं वज्रस्वभावं भवति नरपते चित्तमाकाशभावं
घ्राणो भूमिस्वभावो भवति च रसना वह्निभावा तथैव ।
चक्षुस्तोयस्वभावं त्रिभुवननिलये वायुभावश्च कायः
एवं श्रोत्रादि सर्वं भवति गुणवशात् ज्ञानविज्ञानयोगात् ॥ २२ ॥

[a]मात्सर्यं ज्ञानधातौ भवति वरतनौ चाम्बरे द्वेषवज्रं
ईर्ष्यावज्रं हि वायौ प्रकटितमनले रागवज्रं तथैव ।
तोये [b]श्रीमान् वज्रोऽहं प्रकृतिगुणवशान् मोहवज्रं धरण्यां
वाग् हस्तौ पादपायू मरुदनल जलक्ष्मासु सर्वे बभूवुः ॥ २३ ॥

आपानो ज्ञानधातौ त्रिविध इति भवेत् प्राणवायुश्च शून्ये
वायौ मध्ये समानः शिखिनि पुनरुदानोऽम्भसि व्यान एव ।
भूम्यां नागोऽथ कूर्मोपि कृकरपवनो देवदत्तो धनञ्जः[6]
चत्वारो वायुवह्न्यारवि पयसि मही संभवन्ति क्रमेण ॥ २४ ॥

---

1. D. वा
2. CD. सिद्ध संस्कार ; p'uṅ po 'du byed k'o na'o
3. P. एक
4. D. स गगन°
5. LD. °चित्तस्य, byaṅ č'ub sems sogs sbyor bas so
6. Perhaps for metrical necessity धनञ्जयः has been shortened.

a. ser sna ye šes k'ams la 'gyur te lus mč'og dag la nam mk'a' la ni že sdaṅ rdo rje'o

b. According to Tibetan version : č'u la dpal ldan ṅa rgyal rdo rje—the reading should be तोये श्रीमान्नहं etc., but it disturbs the metre. All the Mss. drop अहं. The reading in the text is not happy either.

उष्णीषं[1] शून्यधातौ भवति सुरनृणां ज्ञानधातौ च गुह्यं
हृत्पद्मं वायुधातौ प्रकटितशिखिनि वै कण्ठचक्रं स्फुरद्धि[2] ।
तोये भ्रूमध्यपद्मं वसुवसुदलकं नाभिपद्मञ्च भूम्यां
षट्सन्धिः पादपाण्यो[a] र्महिजलहुतभुग् मारुतेषु त्रिसंख्याः ॥ २५ ॥

भूम्यादौ पञ्चधातौ त्रिविधगुणवशात् पादपाण्यो र्बभूवु-
[b]रङ्गुल्योङ्गुष्ठकाद्या स्त्रिगुणितदशकाः पर्वरूपाः[3] समस्ताः ।
संग्राह्यास्ता नखान्ताः पुनरपि दशनान्येव तत्त्वप्रभेदैर्
अन्यद् यल्लोमकान्तं भवति वरतनौ तत् तदेवञ्च धातौ ॥ २६ ॥

गुह्योष्णीषे च नाभौ सहज जिनतनु निःस्वभावा स्वभावा
[c]हृच्चक्रे धर्मकायो भवति च[4] कण्ठचक्रेऽपि संभोगकायः ।
बिन्दौ निर्माणकायो[5] भवति गुणवशाच्चाधिदेव क्रमेण
हृच्चक्रं कण्ठचक्रं शिरसि च कमलं धर्मसंभोगशुद्धं ॥ २७ ॥

नाभौ कण्ठे च गुह्ये शिरसि च हृदये तद्वदुष्णीषमध्ये
[d]मातुर्भर्त्तुः क्रमेण त्रिविधमपि भवेत् कायवाक्चित्तवज्रं ।
चक्रं रत्नं खपद्मं जलजमतिवरं षट्कुलं वज्रयुक्तं
तान्यूर्ध्वाधस्त्रिनाड्य स्त्रिविधपथगता श्चन्द्रसूर्याग्निभेदैः ॥ २८ ॥

1. CD. उष्णीषः 2. D. स्फुरद् वै 3. C. पञ्च°

4. The Mss. differ here with the Tibetan. C and D read...... भवति हि नृप संभोगचक्रे च भोगः ; P has...भवति च शिरसोऽब्जे च निर्माणकायः and V. reads भवति हि नृप संभोगचक्रे जिनस्य. The reading has been changed here according to the Tibetan version which is given in *c* below.

5. P. कण्ठे संभोगकायो

a. rkaṅ pa lag pa dag gi c'ig drug.

b. mt'e boṅ la sogs sor mo bcu ni gsum gyis bsgyur ba'i c'igs kyi gzugs daṅ ldan pa mt'a' dag ste

c. sñiṅ ga'i č'u skyes la ni č'os skur 'gyur te mgrin pa'i č'u skyes la yaṅ loṅs spyod rjogs pa'i sku// t'ig le la yaṅ sprul pa'i sku ni yon tan dbaṅ gis lhag pa'i lha ru 'rim pa dag gis 'gyur

d. yum daṅ gco bo'i sku daṅ gsuṅ daṅ t'ugs kyi rdo rje rnam pa gsum po dag kyaṅ rim pas 'gyur

कायै भावप्रवेशः खमिव समरसो भावमध्ये च कायः
ज्ञातव्यो योगयुक्तैः प्रकृतिगुणवशाद्धातुवर्णादिभेदैः ।
पीतः कृष्णश्च वर्णस्त्वरुण[1] इति सितो भूमिवाताग्नितोये
ज्ञानाकाशे च नीलो भवति हि हरितः कायभावप्रभेदैः[2] ॥ २९ ॥

प्रज्ञोपायोस्थिमांसं ससलिलरुधिरं पावको मूत्रमेव
वातो विट् शून्यशुक्रं भवति वरतनो श्रीरजश्चित्तमेव ।
श्रोत्राच्छब्दादयोन्ये[3] स्वजिनकुलवशात् वाक्स्वरूपादयश्च
एवं देव्यः सबुद्धाः विषयविषयिणो मण्डले वेदितव्याः ॥ ३० ॥

नाडीनां षट्सहस्रं दिनकरगुणितं गर्भमध्ये च[4] हृत्वा
वर्षे पुर्णे च वृद्धिं त्यजति शशवरोर्कश्च वृद्धिं करोति ।
वर्षेषु द्वादशेषु त्यजति दिनकरो धातुवृद्धिं स्वदेहे
नाडीच्छेदः[5] प्रसूते[6] भवति दिनदिने युग्मसंख्या क्रमेण ॥ ३१ ॥

श्रीभूतानीन्द्रियाणि प्रभवति दशकं पञ्चकर्मेन्द्रियाणि
तन्मात्राः पञ्च चोक्ताः सगुणमपि मनोबुद्ध्यहंकार दिव्याः ।
तत्त्वान्येतानि देहे त्रिभुवननिलये भुक्तिरेषा विमोक्षच
पञ्चस्कन्धात्मकस्य त्रिविधभवगतस्यात्मकर्मार्जितस्य ॥ ३२ ॥

---

1. P. वर्णोऽरुण
2. CLD °प्रभेदात्
3. D. श्रोत्राच्छन्दादयो° ; rna ba sgra sogs gžan rnams
4. CLDV. प्रहृत्य ; 'p'el ba ni
5. CLDV. °च्छेदं
6. D. प्रसूते भवति

पृथ्वीकाठिन्यमम्बुद्रवमपि हविरुष्णञ्च वायुर्लघुत्वं
छिद्रं शून्यं दृढास्थि त्वमरगिरिवरो वृष्टिरत्रामृतं स्यात् ।
वज्रः शब्दश्च चापं विडपि च घटिका श्वासनिःश्वासयुग्मं
युग्मैः संक्रान्तिरेका द्विगुणनवशतैर्ज्योतिषो रन्ध्रभेदाः ॥ ३३ ॥

नक्षत्रं दन्तपंक्ति स्त्वनुदिनघटिकाः सन्धिभेदाः भवन्ति
नाड्या नाड्यन्त्र[1] मेघास्त्वपरशशिकला धातवो द्विस्वभावाः ।
लोमा यूका च शुक्रं कृमिकुलसहितं भूतयोनिश्चतुर्धा
"नन्दाद्यङ्गुष्टपर्व[2] कमलमपि[3] शिरो नाभिपद्मञ्च[4] शक्तिः ॥ ३४ ॥

ब्रह्माण्डं[b] स्वर्गलोको वरकरचरणौ मर्त्यपातालालोकौ
अब्धि द्वीपाश्च शैला द्रवमृदुकठिना धातवस्त्रिस्वभावाः ।
क्षाराब्धि र्मूत्रमेषां शिखिचलवलयं[c] रक्तचर्माणि राजन्
केशाः सिद्धाः समस्ता स्त्रिभुवननिलयेऽनेकभेदैश्च सिद्धाः ॥ ३५

हृत्कण्ठे नाभिपद्मे पविरविशिखिनः प्रस्फुरन्ति[5] क्रमेण
धन्वाकारे च वृत्ते त्वनुदिन हवने[6] चाब्धिकोणे च कुण्डे ।
तेषामूर्ध्वेऽपरोगिनः[7] स्फुरदमलकरो ज्ञानमूर्तिस्तमोन्ते
यस्मिन् सूर्यो न विद्युत् तपति शशधरो न ग्रहास्तारकाद्याः ॥ ३६ ॥

---

1. CLD. नाड्यान्त्र ; roa rnams č'u bo rgyu ma
2. CLD. नन्दाद्य गुल्फपर्वं ; dga' ba la sogs mt'e boṅ c'igs rnams
3. CLD. हृदयमपि
4. CD. गुह्य°
5. CLD. स्फुरयन्ति
6. CL. वहने
7. CD. °ऽपराग्निः
a. dga' ba la sogs mt'e boṅ c'igs rnams spyi bo'i pa dma lte ba'i pa dma dag kyaṅ nus pa'o
b. c'aṅs pa'i yul sa
c. me rluṅ dkyil 'k'or

वारा हृत्पद्मपत्रे प्रकटितघटिका नाभिपद्मे च षष्टि-
र्मध्येऽह्नः पदं वै मनुरपि,नृपसंभोगचक्रेपि चर्क्षं ।
ऋक्षाणां नाभिपद्मं पुनरपि घटिका योगिना वेदितव्या
नाड्यः पाणीपलानि स्फुटसकलतनौ हस्तपादादिसन्धौ ॥ ३७ ॥

"नाभ्यब्जे[1] सूर्यपत्रे भ्रमति परकला संक्रमन्ती क्रमेण
संक्रान्तिः प्राणयुग्मै द्विगुणनवशतैः कर्किलग्नै[2] नरेन्द्र[3] ।
यस्मिन् लग्ने स्थितोऽर्को भ्रमति दिननिशं तत्र सा वेदितव्या
ज्ञातव्यं लग्नमानं धनमृणविषुवच्छायनं सव्यवामं ॥ ३८ ॥

एकैके पद्मपत्रे प्रवहति धरणी पश्चिमे चोत्तरेम्बु
वह्निः सव्ये च पूर्वे प्रवहति पवनः पत्रमध्ये च शून्यं ।
संक्रान्तिः पञ्चभेदैः प्रवहति विषुवं हीननिश्वासषष्टिर्
एवं संक्रान्तिभेदाः प्रतिदिन समये लग्नभेदै र्भवन्ति ॥ ३९ ॥

शून्याद्यं पञ्चतत्त्वं प्रवहति नियतं चोत्तरे क्ष्मादिसव्ये
राहुश्चा चन्द्रसूर्यौ बुधमहितनयौ दैत्यमन्त्री गुरुश्च ।
केतुर्मन्दश्च खादिष्विति दशपतयः क्षेत्रिणो मण्डलेषु
षण्मासं चन्द्र ईशो भवति नरपते चोत्तरे दक्षिणेऽर्कः ॥ ४० ॥

---

1. CD. नाड्यब्जे

2. P. °लग्ने ; dus sbyor karka ṭa nas mi yi dbaṅ

3. CL. नरेन्द्रः

lte ba'i č'u skyes ñi ma'i 'dab ma dag la 'k'or te mč'og gi č'a ni 'p'o ba rim pas so.

dus sbyor c'ad daṅ nor daṅ bu lon mñam pa dag kyaṅ bgrod pa Gyas daṅ Gyon la šes par bya

sgra gčan dus me

तस्याऽर्ध्वं हृत्प्रदेशे वसुदलकमले संस्थितं नाभिचक्रं
प्राणाद्यं वायुवृन्दं रविशशिशिखिनो वामसव्ये च मध्ये ।
वामे नाडी शशाङ्को वहति खलु सिता दक्षिणे रक्तसूर्यो
मध्ये कालाग्निरूपा प्रवहति विषुवे हीननिश्वास षष्टिः ॥ ४१ ॥

प्राणोऽपानः समानः कमलवसुदले मारुतश्चाप्युदानो
व्यानो नागश्च कूर्मः सकृकर[1] पवनो देवदत्तो धनञ्जः ।
इत्येते नाभिचक्रे दशविधपवनाः संस्थिताः कर्मभेदैः
[a]शंखिन्यन्तं त्विडाद्यं स्वहृदयकमलं नाडि[2]चक्रं समस्तं ॥ ४२ ॥

प्राणः प्राणं करोत्यर्क शशिपथगतस्त्वन्नपानं समस्तं
आपानो नेत्यधस्तात् सकलरससमं[3] नेति काये समानः ।
काये स्पन्दत्युदानो मुखकरचरणे गीतनाट्यं करोति
व्यानो व्याधिं करोति[b] प्रकृतिगुणवशाद् गात्रभङ्गस्तथैव ॥ ४३ ॥

नागोप्युद्गारमेव स्फुटकरचरणात् संकुचत् कूर्मवायुः
क्रोधक्षोभं समस्तं सकृकरपवनो [c]जृम्भिकां देवदत्तः ।
कायं पञ्चत्व[4]गतं त्यजति न नृपते वायुरेको धनञ्जः
[d]एवं प्राणादि सर्वे प्रकृतिगत[5]गुणान् वायवो न त्यजन्ति ॥ ४४

1. P. कूर्मोऽपि कृकरः
2. D. नाभि°
3. P. °समरसं
4. CL. °गन्तुं
5. CLD. प्रकृति गुणगणान्

a. duṅ čan mt'a' yaṅ ida la sogs raṅ gi sñiṅ ga'i pa dma rða yi 'k'or lo mt'a' dag go

b. k'yab ḅyed kyis ni nad dag

c. glal ba dag kyaṅ lha sbyin gyis

d. de ltar srog la sogs pa'i rluṅ rnams t'ams čad raṅ bžin gyis gnas yon tan dag nf gtoṅ mi byed

पिङ्गा सूक्ष्मास्त्विडाद्यास्त्रिविधपथगता रोहिनी हस्तिजिह्वा
पूषा षष्ठी जयोऽगापि[a] च वसुनवमेऽलम्बुषा श्रीकुहे च ।
दिक्संख्या शंखिनी या [b]स्त्रवति नरपते बोधिबीजं सुखान्ते
एतच्छ्रीनाडिचक्रं भवति बहुविधं सन्धिभेदैरनेकैः ॥ ४५ ॥

इन्द्रेऽग्नौ याम्य[1]दैत्ये सवरुणपवने यक्षरुद्रे च मध्ये
[c]एषु स्थानेषु[2] शक्ति र्भवति[3] दिननिशं तत्स्वरूपं भजन्ती ।
तस्योर्ध्वं कण्टदेशे ग्रहगणसहितं संस्थितं चर्क्षचक्रं
ब्रह्माण्डे श्रीललाटे [4]स्वरपरिकरितं श्वेतबिन्दुं स्त्रवन् वै ॥ ४६ ॥

मूले पृथ्व्यम्बु वामे प्रभवति हुतभुग् दक्षिणे मूर्ध्नि वायु
र्मध्ये व्योमद्वयोश्च प्रवहति[5] विषुवं नास[6]रन्ध्रे क्रमेण ।
भिन्दन्तेरतानि शक्ति र्व्रजति वरपदं[7] द्वादशान्तं कलान्तं
क्षेत्राद्या हस्तपादे करकमलपुटेऽङ्गुष्ठकान्ताः समस्ताः ॥ ४७ ॥

चक्री वज्री स्वदेहे सुरवरपतयो द्वादशाङ्गाः निरुद्धाः[8]
सम्यग्ज्ञानं हि कल्की गजतुरगरथाः [9]किंकरार्यप्रमाणाः ।
प्रत्येकं रुद्रसंज्ञा[10]प्रभवति हनूमान् श्रावकं प्राणिनाञ्च
पापं म्लेच्छेन्द्रदुष्ट[11]न्त्वकुशलपथि यः[12]कृन्मतिदुःखदाता ॥ ४८ ॥

1. CLD. यस्य
2. CD. स्थाने च
3. CLD. °भ्रमति
4. CLD. सुरपरिकरितः ; dbyaṅs kyis yoṅs su bskor ba'i
5. CLD. प्रभवति ; rab tu 'bab ste
6. CLD. नाश°
7. P. परपदं ; mč'og gi gnas
8. CLD. प्रसिद्धाः ; yan lag bču gñis 'gog
9. CD. किंकरा आर्यमाणा ; mṅag gžug 'p'ags pa'i č'ad med rnams
10. P. रुद्रः प्रत्येकसंज्ञी 11. CLD. °दुष्टस्त्व° 12. CLD. यत्

a. drug pa rgyal daṅ ri yaṅ
b. zag byed
c. gnas ni 'di)dag rnams su de yi raṅ bžin brten žiṅ nus pa ñin daṅ mc'an mor 'k'or bar byed

अश्वत्थामा त्वविद्या दनुबलसकलं मारपक्षश्चतुर्धा
संहारस्तत्र युद्धे भवभयनिधनं श्रीजयो मोक्षमार्गः ।
कैलासे धर्मदानं भवभयहरणं द्रव्यपूर्णा च पृथ्वी
पुत्रो ब्रह्मासुरेश स्त्रिदशनरगुरोः [a]पृष्ठतश्चाग्रणी यः ॥ ४९ ॥

मञ्जुश्री र्लोकनाथ स्त्रिभुवनविजयी [b]श्रीरजो बोधिचित्तं[1]
पृष्ठे ब्रह्मादिवंशा विविधमहितलेऽनेकबुद्धाः विशुद्धाः ।
एवं म्लेच्छेन्द्रयुद्धं भवति हि नियतं देहिनां देहमध्ये
मायारूपन्तु बाह्ये खलु मखविषये म्लेच्छयुद्धं न[2] युद्धं ॥ ५० ॥

कालाब्दे वह्निसंख्येऽब्ददिनगणहृते षट् कुलं चायनाङ्गात्
षड्त्रिंशन् मासभेदाद् रसगुणितरसाद् योगिनीनां कुलानि ।
वारच्छेदेन[3] लब्धाः प्रकटितनियता देवताः कालचक्रे
पक्षच्छेदेभिधानं भवति नरपते देवता दैवतीभिः[4] ॥ ५१ ॥

मायाजालं दिनाङ्गात्[5] त्रिविधमपि भवेद् रन्ध्रभेदैश्च सम्यक्
[c]भूयो भूतार्णवैः स्यात् शिखिजलनिधिभिः [6]श्रीसमाजस्तु भेदः ।
तत्त्वाख्यं षड्विहीनं त्वपरमपि तयोरर्धभेदै र्विभिन्नै-
र्भूयो मिश्रा द्विभेदस्त्रिदश नवदिशाभिश्च रन्ध्रैः सतत्त्वैः ॥ ५२ ॥

---

1. CLD. °बीजं
2. CL. सुयुद्धं ; kla klo 'k'rug pa min
3. D. वारच्छेदे न
4. CLD. देवतीभिः
5. CD. दिनाङ्गा° ; ñin žag yan lag las
6. CLD. °समाजोऽत्तं भेदाः

a. rgyab daṅ mdun du gaṅ
b. rgyal ba dpal ldan rdul daṅ byaṅ č'ub sems
c. slar yaṅ 'byuṅ ba rgya mc'o me daṅ č'u gter gyis 'gyur dpal ldan 'dus pa dus kyi dbye ba ni

चन्द्रांशे[1] षट्दिना ये खलु दिवसगणे वारभागेन लब्धाः
षण्मुद्रा वज्रिणस्तास्त्वपरदिनगणः कायवाक्चित्तमुद्राः ।
प्रज्ञा काये त्रिलग्नाः प्रकटितनियता योगिनो योगतन्त्रे[2]
[a]शक्तिः क्रोधाः क्रमेण प्रभवति दशकं पञ्चकं बुद्धदेव्यः ॥ ५३ ॥

रूपाद्यक्षयादि[3] षट्कं पुनरपि नृपते देववृन्दं द्विषट्कं
योगिन्यो नागचण्डाष्टकमिति भुवने[4] सर्वमेतद् द्विगुण्यं ।
एतत् श्रीकालचक्रं चतुरधिकशतं तस्य चार्धं त्रिधातौ
सूर्यांशे या च षष्टिः प्रतिदिन घटिका निर्गता मासमध्ये ॥ ५४ ॥

योगिन्यस्ताः समस्ता स्त्रिभुवननिलये लग्नमिश्रा द्विगुण्याः
सूर्यांशेऽङ्गः[5] प्रभिन्नं द्विगुणितमपि यद् योगिनीवृन्दमत्र ।
पिण्डीभूताः समस्ता स्त्रिगुणरविदिनाः [b]साभिधाना भवन्ति
[c]चन्द्रे पक्षप्रभेदो भवति दिनकरे वर्षभेदः समस्तः ॥ ५५ ॥

एवं तन्त्रादिबुद्धे खकरनृपतमो देवता दैवतीनां[6]
प्रज्ञोपायं निशाहं भवति समविभागोऽर्धरात्रे दिनार्धे ।
येन ज्ञातं स्वदेहे दिननिशिसमये मासंक्रान्तिभेदैः
सः श्रीमान् मञ्जुवज्रो भवभयमथनो जन्मनीहैव बुद्धः ॥ ५६ ॥

1. CLD. चक्रांशे ; zla ba'i č'a šas
2. CL. योगचन्द्रे
3. CLD. °यक्षादि° ; gzugs sogs mig la sogs pa drug ste
4. CLD. भवने ; srid pa
5. CLD. सूर्याङ्गेऽङ्गः ; ñi ma'i č'a las ñin žag rab p'ye
6. CLD. देवतीनां

a. nus ma k'ro bo rnams ni rim pas bču ru rab tu 'gyur te lha ni saṅs rgyas lha mo rnams
b. mṅon brjod rnams daṅ bčas pa
c. ñi ma lo yi rab dbyer 'gyur te ri boṅ 'jin pa la ni mt'a' dag p'yogs kyi dbye ba'o

त्रिंशद्भागेन तस्मात् त्रिगुणितनियता देवताः कालचक्रे
मुद्रा षट्कं च बाह्यं पुनरपि[1] च ततश्चक्रनाड्यस्तथैव ।
ऊष्णीषेऽब्धिवह्निदोष्टौ शिरसि नृपतयो दन्तसंख्या च कण्ठे
नाभौ चाष्टाष्टगुण्या द्विगुण नृपतयो गुह्यमध्ये प्रसिद्धाः ॥ ५७ ॥

षण्नाड्यश्चक्ररोधा[2]दशविषयहराः सन्निपातस्वभावाः
भूयो भूयो द्विगुण्याः पुनरपि गुणिताः श्लेष्मपित्तानिलाङ्गाः ।
एता वै मृत्युदात्र्यो गुरुनियमवशादायुरारोग्यदाश्च[3]
षट्चक्रे कालनाड्यो मरणभयहरा योगिनां नात्रचित्रं ॥ ५८ ॥

ऊष्णीषेऽब्धिर्ललाटे ऽनलचिह्नतयुगाः श्लेष्मधातुप्रकोपाः
कण्ठे दन्ता हृदब्जे नयनहतयुगाः[4] पित्तधातुप्रकोपाः ।
नाभौ गुह्येऽब्धि[5] षष्टि नृपतिरपि तथा वायुधातुप्रकोपाः
[a]गुह्येऽन्यादिक् च षट्कं प्रकटितनियताः सन्निपाता निरोधाः ॥ ५९

षण्नाड्यश्चक्ररोधात् त्रिविधपथगता श्चन्द्रसूर्याग्निभेदे-
र्देहे ता रक्षणीया गुरुनियमवशान् मृत्युदाः प्राणिनां याः ।
षट्सु प्राणप्रवेशो यदि भवति[6] नृणां मृत्युहानिस्तदा वै
सूक्ष्मायां न प्रविष्टे क्व मरणविषय[7]श्छिद्यते योगिभिश्च ॥ ६० ॥

---

1. CLD. पुनरपि नियताश्च° ; de las 'k'or lo dag gi rca rnams de bžin ñid
2. CLD. °रोधाद् दश
3. CLD. °रारोगदाश्च
4. D. °युताः ; mig gis bsgyur ba'i dus rnams
5. D. °गुह्यो°
6. P. भवति यदि
7. D. क्रमरणविषय° ; 'č'i ba'i yul ni gaṅ du gčod par byed

a. gsaṅ bar gžan ni p'yogs daṅ drug kyaṅ rab tu gsal byas ṅes par 'dus pa dag ste 'gog pa'o

प्राणो यद्येकनाड्यां वहति दिननिशं जीवितं कालवर्षं
अव्युच्छिन्नैकपक्षं वहति यदि नृणां जीवितं सार्धवर्षं ।
अव्युच्छिन्नैकमासं वहति नरपते जीवितञ्च त्रिमासं
एवं योगी स्वदेहे शशिगतिमरणं ज्ञायते कालचक्रे ॥ ६१ ॥

पञ्चभ्यः पञ्चविंशद् दिवसगतिरुहा रोहते पञ्चवृद्ध्या
तस्मादेकोत्तरेण त्रिगुणितदशकं त्र्युत्तरं यावदेव ।
काले पौष्णे समस्तास्त्रिनयनशशिनः षट्त्रियुग्मेन्दवो ये
[a]मासास्तेऽह्नानि शेषास्तिथिदिगिषु[1]गुणाद्बीन्दवो जीवितस्य ॥ ६२ ॥

स्वस्थानाद् राशिचक्रं त्यजति परकला हानिशेषैश्च तुल्यै-
र्वर्षैर्मासैर्दिनैश्च त्रिनयनशशिभिः षट्त्रियुग्मेन्दुभिश्च ।
पौष्णाद्ये[2] हानितुल्यैस्तिथिदिगिषु[3] गुणैः कर्णिकायां प्रविष्टैः
षट्त्रिंशद्भिर्दिनान्ते भवति दिनकरारिष्टयोगेन मृत्युः ॥ ६३ ॥

पूर्वे बाणाग्निलोकं त्यजति दिनगणं सूर्यवर्षत्रयस्य
तस्मात् सारोहणं वै शरयुगशिखिनं खाद्रिचन्द्रं तुलोये ।
नेत्राह्नि[4] शैलवाणं वसुकरमपरं[5] सप्तमे रोहणं च
[b]तस्मात् तिथ्यादि सर्वं दिनगणमपि यत् कर्णिका यावदेव ॥ ६४ ॥

---

1. CD. गुणाद्बीन्दवो
2. P. पौष्णाद्यैर्
3. CLD. °दिशिषु
4. P. नेत्राहिं
5. P. वरसुरमपरं ; nor dan lag pa gžan te

a. zla ba de dag rnams daṅ ñin žag c'es p'yogs mda' daṅ yon tan gñis zla 'o'o ba'i lhag ma'o

b. de nas c'es la sogs pa'i ñin žag c'ogs pa t'ams čad dag kyaṅ gaṅ žig lte ba ǰi srid ñid.

कालाब्दं यावदेका दिवसगतिवशात् रोहते संक्रमन्ती[1]
चन्द्राख्ये सूर्यभाग विषमसमदिनैरेकवृद्ध्या क्रमेण ।
भूयः संक्रान्तिभेदं[2] विषमसमदिने द्वादशारे करोति
सार्धं मासं हि यावत् त्रिगुणितदशकं जीवितञ्च[3] त्रिरात्रं ॥ ६५ ॥

श्वासान्[4] लिप्तांश्च नाडी दिननिशिसमयाद् रोहते संक्रमेण
सप्ताब्दैश्चायनांशादयनगतिवशात् षष्टिसम्वत्सरैश्च ।
त्रिंशद्वर्षस्त्रिमासाद् दिवसगतिवशात् कालवर्षैश्च पक्षे-[5]
द्वात्रिंशत् सार्धभक्ते भवति दिनगणे रोहणं कालचक्रात्[6] ॥ ६६ ॥

पक्षे पक्षे च नाडी नवहृतभुजगश्छिद्यते नाभिचक्रे
[a]सन्धावेकैकं[7] नाडीं त्यजति शिखिदिनैः कर्मचक्रे क्रियाख्ये ।
कण्ठे[b] नक्षत्रनाडीं[8] त्यजति दिनदिने[9] मासमध्ये क्रमेण
बिन्दुस्थं[10] पक्षमध्ये त्यजति शशिपदं [c]वारनाडी हृदिस्थः ॥ ६७ ॥

वर्गेभ्यः सस्वरेभ्यः क्रमति दिनकरश्चायनं[11] राशिभेदैः
पश्चादेकोत्तरेणोत्क्रमति दिनदिने कालवर्षं हि यावत् ।
छिन्नेऽब्दे पक्षमध्ये स्वरदिवसवशाद् रोहणञ्च क्षयश्च[12]
निश्वासोच्छ्वासहानि दिननिशिसमये जीवितस्यैकरात्रं[13] ॥ ६८ ॥

---

1. LD. संभ्रमन्तो
2. CLD. °भेदाद्
3. CP. जीवितस्य
4. CD. श्वासालिप्तांश्च°
5. CLD. कालवर्षैश्चस्त्रिपक्षे° ; dus kyi lo daṅ p'yogs kyis kyaṅ
6. CLD. बालचक्रात् ; dus kyi 'k'or lo dag las
7. CLD °एकैकनाडी
8. CLD. नक्षत्रनाडी
9. CD. दिनदिनै°
10. CLD. बिन्दुस्थः
11. CD. दिनवशाच्चायन° L. °श्चापरं ; ñin mor byed pa
12. CD. क्रमश्च
13. CLD. जीवितं चैक° , 'c'o ba dag gi mo'an mo gčig

a. rca ni re re 'dor
b. mgrin pa dag las
c. gza' yi rca daṅ gsaṅ bar gnas

नाभौ कण्ठे ललाटे स्वहृदयकमले नाडिकाः सावशेषास्
तिष्ठत्यर्को रसोऽग्निः स्वहृदयकमले सार्धनाडी तथैव ।
प्राणैः पादस्य सन्धौ तिथिगुणितयुगाः[a] षट् दिनं[1] यावदेव
अन्ते सर्वत्र सूक्ष्मा प्रवहति दिवसं च त्यजन्ती हृदब्जं ॥ ६९ ॥

षट्त्रिंशद्भिः सहस्रै[2]र्ध्रुशतदिनगणै रोहते कालनाडी
यां यां सूर्येन्दुशक्ति दिननिशिसमये पूरितं स्व स्व चारैः ।
सूर्याहः[3] सूर्यचारे त्वृणमपि च भवेच्चन्द्रचारे[4]तदर्धं
नक्षत्राहःप्रभेदै रविशशिचरणं शून्यमासे च मृत्योः ॥ ७० ॥

प्राणाः देहेऽधिका[5] ये प्रकटितविषुवे[6] [b]वेदपादोनषष्टिः
सर्वे संक्रान्तिभेदैः प्रतिदिनसमये नाडियुग्मं निहन्ति ।
भूयोभूयोऽब्दमध्ये रविशशिचरणात् शून्यनेत्राद्रिसंख्या
[c]एवं कालः शताब्दैः क्रमति सुरनृणां स्वायुषं स्व स्व मानैः ॥ ७१ ॥

दष्टं[7] व्याधिप्रहारो[d] यदि भवति नृणां कालनाड्यां कदाचित्
शीघ्रं तेनाश्रयेण प्रविशति सहसा मूलचक्रेषु कालः ।
रुद्ध्वा चक्रेषु नाडी रविशशिगमनं छेदयित्वा क्रमेण
मध्ये सूक्ष्माश्रितं[e] यद्धरति नरपते जीवितं प्राणिनाञ्च ॥ ७२ ॥

1. D यद्दिनं ; ñin žag drug ni
2. CDV. सहस्रै र्वसति ; dhu brgya'i ñin žag c'ogs rnams dag gis
3. CLDV. शुक्रोऽहः ; ñi ma'i ñin žag ñi ma'i rgyu ba la
4. CLDV. °चन्द्रमध्ये ; zla ba'i rgyu ba la
5. CD. प्राणा देहे वि काये ; srog ni lus la lhag pa gaṅ žig
6. L. °विभवे
7. CL. दुष्टं

a. c'es kyis bsgyur ba'i dus rnams
b. rig byed rkaṅ č'ad kyis dmaṇ drug ču ste
c. de ltar raṅ raṅ c'ad kyi lo brgya dag gis lha mi rnams kyi raṅ gi c'e la dus bgrod do
d. zos daṅ nad daṅ bsnun pa
e. dbu mar p'ra mo la ni

हृत्पद्मे श्रीललाटे चरति शशिपदं भूतदिग्वासराख्यं
संभोगे नाभिचक्रे नवदशसहितं रुद्रयुग्मं जिनाख्यं ।
तत्त्वाख्यं सप्तरात्रात् त्यजति पुनरसावुत्क्रमन्यः शशाङ्कः
"बिन्दौ पूर्णां प्रकृत्य[1] प्रविशति हृदये शुक्लपक्षे [2]घनाद्वा ॥ ७३ ॥

भूयः कृष्णे च तद्वद् व्रजति पदपदान् नाभिपद्मञ्च यावद्
अष्टारे षोडशारे हृदि शिरसि तथा कृष्णशुक्लाब्ज[3]संज्ञं ।
कण्ठे द्वात्रिंशदारं द्विगुणितमपरं रक्तपीतञ्च नाभौ
द्व्यष्टम्यौ नाभिकण्ठे शिरसि च हृदये श्वेतकृष्णा च पूर्णा ॥ ७४ ॥

आद्या स्त्रिंशत्स्वरा ये हयरवल युता बिन्दुभिः श्रीविसर्गै-
"भिन्ना षष्टि र्बभूवु र्युगवसुनृप[4] दन्ताश्च ते केशराग्रे ।
बिन्द्वाकारे विसर्गे वरकमलदले कादिवर्गा[5] विभिन्ना
विंशत्येकं शतञ्च प्रहरगतिवशाद्रोहते क्षीयतेऽर्कः ॥ ७५ ॥

पक्षे चन्द्रः स्वचारैः ऋणमपि कुरुते वासराख्यं पदञ्च
"भूयो मासद्वयेन[6] त्वपरमपि दिनं वर्धते वर्षयोगात् ।
पूर्णेऽब्दे षड्दिनं स्यादपरमपि तथा वर्धते मृत्युसोम्नः
एवं सूर्यस्य राजन् द्विगुणमृणमिदं वर्धते वर्षयोगात्[7] ॥ ७६ ॥

---

1. D. प्रकृत्या
2. CD. क्रमेण V. त्वृणंच ; nor gyi slad du'o
3. D. °शुक्लाब्ध° ; č'u skyes min
4. P. °नृपवसु
5. CLD. कादिवर्गादि भिन्ना ; ka sogs sde rnams rnam p'ye ba
6. P. मासद्वयेनापरमपि
7. D. वर्षवर्षात् ; lo yi sbyor ba dag gis 'p'el bar byed

t'ig le dag la rjogs par byas nas sñiṅ gar rab 'jug dkar po'i 'pyogs la nor gyi slad du'o
p'ye ba drug čur 'gyur te de dag dus daṅ mi bdag nor daṅ so rnams ge sar rce mo la'o
zla ba raṅ gi rgyu bas
slar yaṅ zla ba gñis kyis gžan pa dag kyaṅ

षट्श्वासैरेकलिप्ता प्रभवति घटिका षष्टिपानीपलैश्च
षष्टिर्नाड्यो दिनं[1] स्यात्[a] त्रिगुणितदशभि र्वासरै र्मासमेकं ।
षण्मासैश्चायनं स्याद् द्विगुणितमयनं वर्षमेकं प्रसिद्धं
[b]आयुः पुंसां शताब्दात्गणगतिषु गतं कालनाडीवशेन ॥ ७७ ॥

त्रैलोक्ये नास्ति योगी त्वसुरसुरनृणां (रितुं यः समर्थः
चन्द्रादित्यौ स्वदेहे चरति दिनगणं च चन्द्रः स्वचारैः ।
सूर्यश्चर्क्षाणि सर्वाणि चरति भुवने वर्षमध्ये क्रमेण
वर्षे वर्षे त्वृणेन ग्रसति स भुवनं कालचक्रैकवीरः ॥ ७८ ॥

छिन्ना यद्येकनाडी भवति नरपते मूत्रमम्लत्वमेति[2]
तन्मात्रात्[3] पञ्चरात्रात् त्यजति परकला [c]पिण्डविच्छेदकाले ।
शब्दं कर्णे रसञ्च त्यजति खलु मुखे तारकामक्षिमध्ये
गन्धं घ्राणे नराणां करचरणतलौ[4] चोष्णभावं क्रमेण ॥ ७९ ॥

नासाग्रं लम्बमानं शिरसि धृतभुजो दृश्यते तत्स्वरूपः
लाक्षारागप्रघृष्टेप्युभयकरतले नैव रागं करोति ।
आदित्यः कृष्णवर्णः [d]परिणतः शशभृद् दृश्यते पीतवर्णः[5]
मूत्रं देहश्च शीतो भवति नरपते तद्दिने मृत्युरेव ॥ ८० ॥

1. CLD. °नाड्यो दिनस्य त्रिगुणित
2. CLDV. मूत्रमम्बुत्व° ; gči ba dag ni skyur ba ñid du 'gyur
3. CLDV. °मात्रां
4. DV. °चरणतनौ
5. D. पीतवर्णं

a. č'u o'od drug ču ñin žag tu 'gyur
b. skyes bu rnams kyi c'e lo brgya las bu lon bgrod par son pa dus kyi rca yi dbaṅ gis so
c. 'dor te goṅ bu 'č'ad pa'i dus su 'o
d. yoṅs su gyur pa'i ri boṅ 'jin pa k'a tog ser po mt'oṅ

जिह्वाधः कालसूत्रं प्रभवति नयने ब्रह्मरेखातिसूक्ष्मा
श्वासश्चन्द्रार्कमार्गे स्फुरति नरपते द्वे कपोले तथैव ।
कक्षाविष्टं स्तनोर्ध्वं ग्रहगणसकलं दृश्यते सस्फुलिङ्गं[1]
स्तब्धग्रीवा सगात्रा भ्रमणमपि तनौ लक्षणं चेष्टमृत्योः[2] ॥ ८१ ॥

उत्पत्तिं यः करोति प्रसवनसमयं बालकौमाररूपं
संहारं सैव लोके पुनरपि कुरुते कालचक्री न सूर्यः ।
"चन्द्रादित्यादि देवान् ग्रसति स भगवान् रात्रिभागे सभूतान्[3]
भूयो मुञ्चत्यनन्तानपि[4] दिनसमये सृष्टिहेतोः क्रमेण ॥ ८२ ॥

शब्दाद्यं कर्मषट्कं भवति हि करणं त्विन्द्रियाणाञ्च षट्कं
वर्षा मासाश्च पक्षा दिननिशितिथयश्चन्द्रसूर्यौ च कर्त्ता ।
तेषां संहारकर्त्ता त्वपर इति भवेत् सृष्टिकर्त्ता न कर्त्ता
व्योमव्यापी खवज्री विषयविरहितो निर्गुणो निःस्वभावः ॥ ८३ ॥

गन्धो वर्णो रसं स्पर्श इति च धरणी तोय वह्निश्च वायुः
अष्टौ वै रूपिनः स्युः समुदितविषया एकमुख्याः समस्ताः ।
एतत् त्रैलोक्यकृत्स्नं [b]स्फुरणनिधनतां याति कालप्रभावात्
शब्दः शून्यं ह्यरूपं भवति नरपते धर्मधातु र्मनश्च ॥ ८४ ॥

---

1. D. स स्फुलिङ्गं ; me stag dag daṅ bčas par mt'oṅ
2. CD. दृष्ट° ; 'č'i ba'i mo'an ñid dag tu 'dod
3. D. स भूतान् ; 'byuṅ ba daṅ bčas
4. CLD. °त्यनन्तामपि

a. zla ba ñi ma la sogs lha rnams 'byuṅ ba daṅ bčas mo'an mo'i
č'a la bčom ldan de yis zos

b. spro ba dag daṅ sdud par 'gyur te

वध्नात्यात्मा विकल्पैः प्रकृतिगतगुणैः कोषकीटो[1] यथैव
आत्मानं चात्मना वै पुनरपि मनसा मुञ्चते निर्विकल्पात् ।
तस्माद् राजन् स्वकर्मप्रकृतिगुणगतं[2] दुःखसौख्यं करोति
कः कर्त्ता किं करोति प्रकृतिविरहितो ᵃमुह्यतेऽज्ञानलोकः ॥ ८५ ॥

पृथ्वी तोयाग्नि वाता गगनमपि मनो[3] बुद्ध्यहंकारचित्तं
स्थूला सूक्ष्मा परा च त्रिविधगुणगता वर्णबिन्द्वादिभेदैः ।
स्थूला स्थूलेन्द्रियेषु प्रकृतिरपि[4]गता सूक्ष्मचित्ते[5] च सूक्ष्मा
ज्ञाने च ज्ञानमूर्त्तिः प्रकृतिरविकृति जीवभूता न भूताः ॥ ८६ ॥

आद्याः शून्यानि पञ्चᵇप्रकृतिरविकृतिः श्रोकलाबिन्दुनादं
काल[6]श्चित्तं च बुद्धिः प्रकृतिरपि तथान्ये स्वरा मारुताद्याः ।
स्थूला वर्गाक्षराणि त्रिगुणितदशकं षोडशान्ये विकारा-
स्तेषां मध्ये न वज्री प्रकृतिरविकृति र्व्यापको निःस्वभावः ॥ ८७ ॥

संसारे सौख्यदुःखं प्रकृतिगुणगतं ᶜचास्ति तत् कर्मजञ्च
स्थूलं सूक्ष्मञ्च शान्तं त्रिविधमपि भवेत् कर्म चेतन्नराणां ।
कर्ता चाहं विकर्म त्वपर पशुपतिश्चास्ति कर्त्तेति कर्म
नाहं कर्त्ता परो वा प्रकृतिविरहितो ज्ञायते तन्न[7] कर्म ॥ ८८ ॥

1. CLD. कोषकारेव कीट, dar gyi srin bu ʼji bžin ñid
2. CLD. °प्रकृतिगुणवशाद्, raṅ las raṅ bžin yon tan la gnas
3. CLD. गुणा
4. CLD. °रधिगता
5. P. चित्तेन सुक्ष्मा, pʼra moʼi sems la pʼra mo yaṅ
6. CLDV. कालं
7. CDV. तच्च, de ni las ma yin

a. mi šes ʼjig rten rmoṅs par byed
b. a sogs stoṅ pa lṅa ni
c. las las skyes pa de ni za ba ste

तस्मात् कर्त्ता न कश्चिद् ददाति न हरति प्राणिनां सौख्यदुःखं
संसारे पूर्वकर्म प्रभवति फलदं यत्कृतं त्रिःप्रकारं ।
मूर्खानां बुद्धिरेषा ददाति स हरते सृष्टिसंहारकर्त्ता
देहे छिद्रं न पश्यन्त्य[1]परमिति शुभं [a]ह्रार्यमाणं स्वकाक्षैः ॥ ८९ ॥

इच्छाशक्तिः क्रियायाः स्वमनसि जगतो ज्ञानशक्तिस्तृतीया
भावालोकं प्रवेशं [b]समरसकरणेऽर्थोपलब्धिं करोति ।
भूयस्त्यागं चतुर्थो त्रिभुवननमिताप्यद्वया[2] वै क्रमेण
तासां मध्ये न किञ्चिद् प्रसति नरपते मुञ्चते नैव वज्री ॥ ९० ॥

आत्मा कर्त्ता न तत्र प्रभवति नृपते दुःखसौख्यप्रदाता
बन्धो मोक्षो न कश्चिद् भवति नरपते चित्तशक्तिं विवर्ज्य ।
आकाशं कुम्भमध्ये व्रजति न च जलं नीयमाने[3] च यद्वत्
व्योमव्यापी खवज्री विषयविरहितो देहमध्ये च तद्वत् ॥ ९१ ॥

एवं कर्मास्तिवादी भवति स भगवानेकशास्ता न कर्त्ता
सर्वज्ञश्चादिबुद्धस्त्रिभुवननमितः कालचक्री न चक्री ।
ब्रह्मा विष्णुश्च रुद्रः शरणमधिगतो यस्य पादाब्जमूले
तं वन्दे कालचक्रं जिनवरजननं निर्गुणं निर्विकल्पं ॥ ९२ ॥

---

1. CLD. पश्यत्य°
2. CLD. °नमिता अद्वया V. नमिता चाद्वया
3. CV. नीयमानेन यद्वद्

a. raṅ gi dbaṅ po dag gis mtʻoṅ ma yin
b. ro mñam rgyur ni don la ñe bar dmigs par byed.

शान्ते भावेऽमरत्वं भवति नरपते तामसे नारकत्वं
तिर्यक्त्वं राजसे च प्रवरभुवितले मानुषत्वं च मिश्रे ।
भूतत्वं त्रिप्रकारं रजसि तमसि वै सात्त्विकोऽन्योन्यमिश्रे-
यद् भावं मृत्युकाले स्मरति च मनसा सम्भवस्तत्र जन्तोः ॥ ९३ ॥

देवत्वं चाष्टभेदैः सुरवरनिलये मानुषत्वं यथैकं
तिर्यञ्चोऽब्धिप्रकाराः खलु नरकगतौ नारकत्वं तथैकं ।
एषु स्थानेषु जन्तु भ्रमति रसगतौ कर्मपाशै निबद्धो
नामुक्तो याति मोक्षं[a] परमसुखपदं जन्मलक्षैरनेकैः ॥ ९४ ॥

स्कन्धै र्धात्विन्द्रियैश्च त्रिविधभवमयैः पञ्चकर्मेन्द्रियैश्च
तन्मात्रैः कर्मदोषैः सहगुणमनसा बुद्ध्यहंकारकाद्यैः ।
एतै र्बद्धो हि जीवो भ्रमति रसगतौ सूक्ष्मभावेन भूयः[1]
भावे त्यक्ते प्रयात्यक्षयपरमपदं यत्र जन्मो न भूयः ॥ ९५ ॥

[b]साङ्गो वेदो[2] न विद्या स्मृतिमतसहितस्तर्कसिद्धान्तयुक्तः
शास्त्रं चान्यद्धि लोके[3] कृतमपि कविभि र्व्यास वैश्वानराद्यैः ।
विद्येत्यध्यात्मविद्याक्षरमपि मुनिभिः प्रोक्तमेवात्रलोके
त्रैलोक्यं यत्र कृत्स्नं भवति नरपते लीयते यत्र भूयः ॥ ९६ ॥

---

1. OLD. रूपः , slar yaṅ
2. OLDV. वेदः साङ्गो
3. OLDV. तद्वत्

a. t'ar pa mč'og gi bde ba'i go 'p'aṅ du ni grol ba min

b. yan lag daṅ bčas rig byed dran pa'i gžuṅ daṅ bčas daṅ rtog ge grub pa'i mt'ar ldan 'jig rten du//sñan dṅags mk'an po rgyas pa me la sogs pa rnams kyis byas pa'i bstan bčos gžan yaṅ rig pa min.

योगीन्द्रोऽप्राप्तयोगः प्रचलितमनसा याति मृत्युं कदाचित्
श्रीमान् मानुष्यलोके प्रवरमुनिकुले जायते योगयुक्तः ।
पूर्वाभ्यासेन तेनाहरति पुनरपि ज्ञानयोगं विशालं
प्राप्ते[1] ज्ञाने प्रयात्यक्षयपरमपदं यत्र जन्मो न भूयः ॥ ९७ ॥

ज्ञानोत्पत्ति जिनानां रविदिनसमये चार्धरात्रे निशान्ते
मध्याह्ने चासुराणां शशिनिशिसमये निर्गमे वासरस्य ।
aसम्यग् ज्ञाने विभङ्गे प्रभवति[2] वचनं संस्कृतं प्राकृतञ्च
शान्तं रौद्रञ्च कर्म त्रिभुवननिलये पौरुषं प्राकृतञ्च ॥ ९८ ॥

मध्याह्नादर्धरात्रिं[3] दिननिशिसमये भुक्तिकालस्तयोश्च
अन्नं गोमांसभोज्यं बहुविधरसदं पानमण्डस्य शुक्रं ।
रक्तं श्वेतञ्च वस्त्रं[4] रविशशिगतिवत् स्वर्गपातालवासः
धर्मोऽहिंसा[5] च हिंसा गुरुनियमवशाद् वज्रदेत्यासनञ्च ॥ ९९ ॥

भूतानां मिश्रकर्म प्रभवति वचनं मिश्रपैशाचिकञ्च
धर्मोऽहिंसा च हिंसा खलु गुरुनियमाज्जीवघातादि दोषः ।
यागाद्यर्थं[6] प्रवृत्ति र्भवति नरपते वा निवृत्तिः कदाचित्
खाद्यं पेयञ्च मिश्रं रविशशिगमनं[7] मिश्रमार्गः परत्र ॥ १०० ॥

---

1. PV. लब्धे
2. CLDV. भवति च
3. P. मध्याह्नादर्धरात्राद्दिन° , ñi ma guṅ daṅ mo'an mo p'yed nas
4. D. वक्तं , gos ni
5. D. धर्मो हिंसा च हिंसा V. धर्म्माहिंसा , č'os ni 'o'e med 'o'e ba yaṅ ste
6. CLD. योगार्थं वा V. योगार्थे वा , mč'od sbyin la sogs don du
7. P. °गमनान्मिश्र°

a. yaṅ dag ye šes rnams ñams dag la o'ig ni legs sbyar t'a mal dag tu rab tu 'gyur ba ste

ज्योतिः सूर्याग्निरश्मौ[1] सितदिनमयनं चोत्तरं चार्धवर्षं
चन्द्रो ज्योतिर्निशावासित[2]मयनमिदं दक्षिणे धूममार्गे ।
[a]अर्चिः स्वर्गे सुराणामसितमपि तथा[3] नागलोकेऽसुराणां
व्यामिश्रं मर्त्यलोके भवति नरपते प्रेततिर्यङ्नराणां ॥ १०१ ॥

यो यन् मध्ये प्रविष्टो व्रतनियमरतः कर्मपाशै र्निबद्ध-
स्तन् मध्ये स्वस्वभावाद् भवति नरपते [b]तत्कुले तद्ग्रहेण ।
यावच्चित्तस्य[4] भावस्त्रिविधभववशाद् वेदना सौख्यदुःखं
तावत् संसारघोरे भ्रमनमिह नृप स्वर्गमर्त्ये त्वधश्च ॥ १०२ ॥

काद्यान् वर्गान् समात्रानपि गुणगुणितान्यान् त्रिपक्षस्वरांश्च
त्रिंशद् वै व्यञ्जनानि त्रिविधगतिवशाद् रोहते तानि मृत्युः ।
वारान्[5] पञ्च ग्रहाणां रविशशिचरणं राहुकेतोः परञ्च
द्वात्रिंशद् वर्षरक्षानपि गुणगुणितांश्चन्द्रसूर्याग्निभिन्नान् ॥ १०३ ॥

पक्षा वर्षत्रयाणामपि शशिनि गुणाः काल वह्नि[6] द्विपक्षौ
ऊनीभूताः शताब्दे समविषमगतौ शेषपक्षा रवीन्दोः ।
लोकाक्ष्यग्न्यक्षिसंख्या दिननिशिसमयान्[7] भर्तृहीनान् समस्तान्
[c]वर्गान्मात्रान्[8] रवीन्दो ग्रसति[9] गतिवशाद् व्यञ्जनादीनि मृत्युः ॥१०४॥

1. P. सूर्योऽग्निरब्धे, 'od zer lam ni ñi ma'i snaṅ ba. The reading अब्धे or अब्धौ cannot be construed with the meaning given in the Tibetan (lam ni).

2. CLD. °निशा का सितम° V. °निशाकाशित° 3. CLD. तमो

4. CLDV. यावज्जीवस्य ; ji srid sems kyi raṅ bžin dag ni

5. CLD. चारान् ; gza' lha'i

6. CD. वह्न्यब्धिपक्षौ ; dus kyi me yi p'yogs gñis dag

7. CLD. °समये भर्तृहीनाः समस्ताः

8. P. °मात्राद् 9. LD. °भ्रमति

a. 'od zer lha rnams mt'o ris su ste dkar min bgrod pa de bžin lha min klu yi 'jig rten du

b. de yi rigs su de yis 'jin pa dag gir 'gyur

c. gsal byed la sogs sde pa dbyaṅs rnams dag ni ñi ma zla ba'i bya'i bgrod dbaṅ gis 'c'i bas zos

सार्धा[1] वै चक्रनाडी शशिपदरहिता वार[2]नाडीविहीनाः
प्रज्ञोपायप्रभेदे दिननिशिसमये[3] भक्ष्यते तांश्च[4] मृत्युः ।
एवं वर्गान् समात्रान्[5] स्वरगणसहितान् व्यञ्जनान्येव चारान्
हीने वा मध्यमेऽष्टे शशिरविमरणे व्यञ्जने चाधिदेवे ॥ १०५ ॥

द्वात्रिंशच्चैकनक्तं स शशिरविगतो[6] नाडिकाच्छेद एष
भूयस्त्रिंशत् त्रिरात्रैस्त्यजति सकुलिशान्[7] स्कन्धधात्विन्द्रियादीन् ।
[a]त्यक्त्वा चन्द्रार्कनाडीं प्रविशति शिखिनीं प्राणवायु दिनैकं
विच्छेदं यावदेवं क्षितिजलहुतभुग्मारुताकाशधातोः ॥ १०६ ॥

आदौ संरक्षणीया सकलजिनतनु र्मन्त्रिणा[8] सिद्धिहेतोः
कायाभावेन[9] सिद्धि र्न च परमसुखं प्राप्यते जन्मनीह ।
तस्मात् कायार्थहेतोः प्रतिदिनसमये भावयेन् नाडियोगं
काये सिद्धेऽन्यसिद्धि स्त्रिभुवननिलये किंकरत्वं प्रयाति ॥ १०७ ॥

शून्ये धूमादिमार्गं गुरुनियमवशाद् भावयेद् बिम्बसीम्नो
नाडीचक्रेषु तस्मात्[10] स्थिरमपि कुरुते प्राणमापानवायुं ।
[b]पश्चादिन्दोर्निरोधं ग्रह इव कुरुते बोधिचित्तस्य योगी
तस्माद् यत्किञ्चिदिष्टं कतिपयदिवसैः प्राप्यते जन्मनीह ॥ १०८ ॥

---

1. C. मार्ग LD. सार्धं
2. CLDV. गुह्य ; gza' yi c'u c'od rnams dman pa
3. CLD. °समये 4. CLD. ताश्च
5. D. स्वमात्रान् ; dbyaṅs bčas dbyaṅs kyi c'ogs daṅ
6. D. स रविशशि° 7. D. स कुलिशान् ; rdo rje daṅ bčas
8. D. °मन्त्रिणां 9. D. कायाभावे न
10. CLD. पश्चात् ; de nas rca yi 'k'or lo rnams

a. zla ba ñi ma'i rca dag dor nas duṅ čan mar ni srog gi rluṅ dag ñin gčig rab 'jug ste
b. p'yi nas zla ba ṅes par 'gog pa gza' bžin byed te byaṅ č'ub sems ni rnal 'byor pa yis so

मार्त्तण्डेन्दो निरोधः समविषमगतौ मध्यमेऽग्नौ प्रवेशः
प्राणापानद्वयोश्च प्रथमदिनगतौ वञ्चना[a]ऽकालमृत्योः ।
प्राणेनापूरयित्वा सहकरचरणाङ्गुष्ठपर्वान् नखान्तात्
षट्चक्रं बुद्धदेव्यो[1]ऽभयकरकमला योगिना भावनीयाः ॥ १०९ ॥

आपानाकुञ्चनेष्टं भवति वरतनौ वातरोगे समस्ते
प्राणायामः कफे स्यात् पुनरपि च तयोर्मञ्चनं पित्तदोषे ।
ऊर्ध्वाधः सन्निरोधो भवति सुखकरः सन्निपाते ज्वरे च
नाड्यूर्ध्वं प्राणवायुः सकलरुजहरो नाभिमूलेऽपरश्च ॥ ११० ॥

आकुञ्च्यापानवायुं त्रिविधपथगतं प्राणमेवोर्ध्वतश्च[2]
संघट्टे यावदग्निः प्रभवति बलवान् व्याप्नुवन्[3] सर्वकाये ।
[b]अग्नी [c]प्लीहार्श रोगानपि जठरगतान् मासयोगान् निहन्ति
ऊर्ध्वश्वासं च काशं[c] त्रिविधमपि विषं नेत्ररोगादिकञ्च ॥ १११ ॥

कक्षा सव्यावसव्यं स्तनमपि बलवत् पीडितं प्राणरोधात्
सव्याद् वामासु नाडी प्रवहति सहसा वामकक्षा च सव्या ।
मासार्धेनाप्यरिष्टं हरति मरणदं योगयुक्तश्च योगी
[d]पादौ वज्रासनस्थौ धृतकरकमलौ पृष्ठशृङ्गस्य नाशः ॥ ११२ ॥

---

1. D. बुद्धदेव्यो भयकरकमला
2. D. प्राणमेवार्धतश्च
3. D. व्याप्नुवत्

a. dus min 'o'i ba slu ba ste
b. dmu o'u skran dan gźan 'brum nad rnams dag kyan lto bar son pa zla ba'i sbyor bas 'joms pa ste
c. dbugs lun ni glo dan rnam pa
d. rdo rje skyil krun du, gnas rkan pa gzun ba lag pa'i padmo dag ni rgyab kyi sug rnu 'joms.

ऊर्ध्वौ पादौ शिरोऽधो व्यपहरति तनौ श्लेष्मरोगं समस्तं
[a]प्रस्रावः प्राणरोधात् कतिपयदिवसे मूत्रकृच्छ्रं निहन्ति ।
प्रत्युषेऽनामिकाभ्यां जलविगतमुखे दन्तपंक्ति प्रघृष्य
नेत्राणामञ्जनं स्यान् नयनरुजहरं तालनं वा जलेन ॥ ११३ ॥

[b]सुप्तेनोत्तान नाभि धृतकरकमलाजीर्णशूलं निहन्ति
गण्डानामुद्भवं वै सहघृतलवणैः स्वेदनं वृद्धिनाशि ।
[c]अर्कक्षीरप्रलेपस्त्वथ भवति कदा[1] दन्तकीटः सशूलो[2]
व्याघ्री बीजस्य धूमो[d] धृतमिह नलिकाद्यैश्च कीटादिनाशः ॥ ११४ ॥

वर्षार्धं श्वेतकुष्ठं हरति व तनौ मन्त्रिणां किं तदन्यत्
[e]प्रज्ञासङ्गे स्वचित्तं स्खलितमपि सदा प्राणवायो निरोधात् ।
सप्तत्यब्दां जरां वै हरति सपलितां[3] च[4] द्विवर्षप्रपूर्णे
मुद्रासिद्धिस्तदूर्ध्वं भवति कतिदिने मार्गचित्तप्रसङ्गात् ॥ ११५ ॥ **

---

1. CP. कदाचिद्
2. LD. समूलो
3. D. स पलितां , skra dkar bcas pa
4. CLD. चार्धवर्ष , lo gñis rab tu rjogs na

a. srog 'gog pa las ñin žag 'ga' žig gis ni rab 'k'ru gci bal nad dag ńes par 'joms par byed

b. gan rgyal ñal nas lte ba lag pa'i pa dmas gzuń ba dag ni ma žu ba yi sug rńu 'joms

c. de nas a rka'i 'o ma byugs pas kyań no 'ga' žig c'e na so srin zug rńu bcas 'gyur na

d. stag ldan gyi ni sa bon du ba sbubs la sogs pa dag gis

e. šes rab 'dus la, rań sems lhuń ba dag kyań rtag tu srog gi rluń gis 'gog pa dag las te

** The following six verses (116-121) are not found in the Patna Mss. of the text. The Tibetan versions of Derge, Narthang, and the Peking (Japanese) edition also do not include the verses.

यच्छब्दो ह्नृत्प्रदेशे भवति वरतनो श्रूयते श्रोत्ररन्ध्रे
तस्मादूर्ध्वं हि मूर्ध्नि व्रजति समरसं त्याजितं चैकभूतं[1] ।
यच्छब्दं जीवलोके वदति च भवजं तु तदेव शृणोति
विज्ञानं चैव दूरात् श्रवणमपि विभो योगिना भावनीयं ॥ ११६ ॥

कृत्वा पर्यङ्कबन्धं विकसितवदनोऽन्योन्यदन्तं स्पृशेन्न
आकृष्टो बाह्यवातस्त्वमृतरससमो नाभिचक्रे प्रविष्टः ।
सन्तापं क्षुत्पिपासां हरति वरतनो सन्निरुद्धो विषघ्न
श्वेतो बिन्दुर्ललाटे स्वरपरिकरितो मुच्यमानोऽमृतं वा ॥ ११७ ॥

घ्राणे रन्ध्रद्वयेन त्वपि पिहितमुखे बाह्यवातः समस्तः
प्राणेनाकृष्य वेगात्तलिदनलनिभो घट्टिताऽपानवायुः ।
काले नाड्या[2] संयोगाद् व्रजति समरसं चन्द्रसूर्याग्निमध्ये
अन्नाद्यं क्षुत्पिपासामपहरति तनो चामरत्वं ददाति ॥ ११८ ॥

स्वच्छायामातपस्थामपरमुखरवे स्तब्ध[3]दृष्ट्यावलोक्य
पश्चाद् व्योमाभिवीक्षेत् समरसपुरुषा दृश्यते धूम्रवर्णः ।
षण्मासाभ्यासयोगादवनिगतनिधिं दर्शयेद् भूमिछिद्रं
वृक्षच्छायां प्रविश्य त्वपि गगनतले भाविता बिन्दुमाला ॥ ११९ ॥

1. L. °सूत्र°
2. D. नाभ्यां स योगाद्
3. L. सुप्त

या शक्ति र्नाभिमध्याद् व्रजति वरपदं द्वादशान्तं कलान्तं
सा नाभौ सन्निरुद्धात् तलिदनलनिभा दण्डरूपोत्थिता च ।
चक्राच्चक्रान्तरं वै मृदु ललितगतिश्चालिता मध्यनाड्यां
यावच्चोष्णीषरन्ध्रं स्पृशति हठतया सूचिबद्धा[1] ह्यचर्म ॥ १२० ॥

आपानं तत्र काले परमहठतया प्रेरयेदूर्ध्वमार्गे
उष्णीषं भेदयित्वा व्रजति वरपुरं वायुयुग्मे निरुद्धे ।
एवं वज्रप्रबोधान् मनसि स विषयात् खेचरत्वं प्रयाति
पञ्चाभिज्ञास्वभावा भवति पुनरियं योगिनां विश्वमाता ॥ १२१ ॥

*प्राणायामं प्रकुर्याद् हृदि शिरसि तथा यावदग्निर्व्यथाभूत्[a]
तस्माद् ऊर्ध्वं हि मूर्च्छां व्रजति सुकमलेऽयन्त्रितो[2] वा बलेन[b] ।
उष्णीषं भेदयित्वा व्रजति हि मरणं स्कन्धघातून् विहाय
मुद्रासङ्ग प्रणष्टो न हि सुखफलदो[3] जन्मनोहैव पुंसां ॥ १२२ ॥

---

* [This portion in the Mss. is very fade and at some places letters are practically efaced.]

1. L. शून्य च बाह्यचर्म
2. D. यन्त्रिको वानिलेन V. यन्त्रितो वानलेन L. °वानिलेन
3. DV. समसुखदो ; bde 'bras ster ba med

a. srog rool rab tu bya ste sñiṅ ga de bžin mgo bo dag ni ji sred mi yis gduṅ 'gyur ba
b. de las steṅ dag tu ni bsan pe'i pa dmar brgyal bar 'gyur te ma bsdams pa'm stobs dag gis.

मुद्रोक्ता भावनार्थं[a] दिननिशिसमये नैव रागक्षयार्थं
वाग्वज्रं तर्पनार्थं[b] न खलु मदकरं मन्त्रिणामुक्तमेवं ।
सर्वाहारः सुखार्थं[1] प्रतिदिनसमये[c]ऽजीर्णहेतो नं चोक्तः[2]
श्रीचर्या सिद्धिहेतो[d]र्भ्रमणमपि चितौ कीलनार्थं न रात्रौ ॥ १२३ ॥

अक्षोभ्यं किञ्चिदुष्णं मुखरुजशमनं दन्तशूलं प्रकीटं
[e]प्रत्युषेऽक्षोभ्यनश्यं शिरसि रुजहरं तोयनश्यं तथैव ।
कर्णे नेत्रे प्रविष्टं ह्युभयरुजहरं मुत्रमुष्णञ्च शीतं
भूतार्तेऽक्षोभ्यनश्यं त्रिकटुकसहितं सोल्यदन्तेव दष्टे ॥ १२४ ॥

विण्मूत्रं शुक्ररक्तं नृपलल[3]सहितं भक्षितं चायुदः स्यात्
[f]सध्यानं पुष्पनश्यं हरति सपलितामङ्गजातां रुजञ्च ।
भुक्तं पञ्चप्रदीपं सकलरुजहरं मक्षिकाच्छर्दिमिश्रं
स्त्रीपुष्पं शुक्रमिश्रं त्वपहरति रुजं भक्षितं वर्षयोगात् ॥ १२५ ॥

वातघ्नं क्षारमम्लं[4] प्रभवति मधुरं पित्तशत्रुः कषायः
श्लेष्मघ्नं सर्वतिक्तं कटुकमपि तथा चौषधं वा रसो वा ।
श्लेष्मघ्नं छागदुग्धं त्रिकटुकसहितं माहिषं पित्तशत्रु-
र्वातघ्नं चोष्ट्रदुग्धं[5] त्रिविधरुजहरं गोपयः सर्पिरेव ॥ १२६ ॥

---

1. D. सुखार्थे 2. D. वोक्त
3. DL. नृ-पलन° ; mi yi ša dan
4. D. °मम्लं ; lan o'va skyar ba
5. DV. चोष्ण° ; rña mo'i 'o ma

a. p'yag rgya bsgom pa'i don du
b. gsuṅ gi rdo rje mčʻod pa'i don te
c. ma žu'i rgyur yaṅ ma gsuṅs so
d. mo'an mo dur k'rod 'k'yam pa dag kyaṅ rced mo'i don ma yin
e. mi bskyod pa ni čuṅ zaṅ dro ba k'a nad ži bar byed de so yi zug rṅu ñid kyi yaṅ
f. bsam gtan bčas par me tog rṅubs na skra dkar daṅ bčas rga ba daṅ ui lus skyes rnams kyaṅ 'p'rog

जातीक्वाथाम्बु चोष्णं मुखरुजशमनं दन्तशूलञ्च तीव्रं[1]
तैलं वस्त्वम्बुपक्वं त्रिकटुकलवणैः कर्णरोगस्य नाशः
आज्यं क्षीरा हि रक्तैः क्वथितमपि सदा घ्राणरोगस्य नाशः
कर्कोटो लाङ्गलीन्द्रो हरति सहखरां गण्डमालां प्रलेपात् ॥ १२७ ॥

कुर्याद्धस्तौ प्रलम्बौ समपदकमले प्राणवायो निरोधं
यावद् भूम्यां प्रपातो नहि भवति तनौ मुञ्चनं च ज्वरस्य ।
भूयो भूयः समाधौ मरणभयकरान् नाशयेत् कण्टकार्थैः[2]
हृत्पद्मे चन्द्रमूर्ध्नि त्वमलशशिनिभा भाविता विश्वमाता ॥ १२८ ॥

पिष्ट्वा शीताम्बुसूर्यो[a] ज्वरविहितनृणां कण्टकान् नाशयन्ति
घृष्टं त्वक्षोभ्यमिश्रं हरति भयहरान् वा कपालं ज्वरान्ते ।
मन्त्रश्चोंकारपूर्वो जलशिखिमरुतां वज्रपूर्वञ्च नाम
रक्षान्तेनैव[3] कुर्यात् शिरसि गलहृदो नाभिगुह्यादिकेषु ॥ १२९ ॥

तुल्यं धात्री च धान्यं त्वपरमपि तथा तिन्तिलीपत्रचूर्णं ।
तोये चन्द्रार्कयुष्टे खलु विगतमले क्वाथयेत् पादशेषं ।
तत् क्वाथं खण्डमिश्रं पुनरपरदिनात् पीतमेतत् त्रिरात्रं
ग्रीष्मे सूर्यांशुदाहं[b] हरति मरणदं सन्धातौ गतञ्च ॥ १३० ॥

---

1. C. वेलं D. वेलं , so yi zug rṅu ñid kyaṅ ṅo
2. D. कण्टकान् वै , o'er ma čan ni ṅes 'joms te
3. D. रक्षान्ते नैव , de ñid kyis ni bsruṅ bar bya ste

a. sran č'uṅ btags nas 't'uṅs pas
b. so ka ñi ma'i 'od zer dag gis

हेमार्कं कान्तलोहं[a] पटलजमयसं वाहयेन् मक्षिकेन
[b]बोजार्धेनापि पिष्टिर्मलविगतरसे कारयेत् षट् पलांश्च ।
[c]गोतक्रं दारयित्वा खलु खरशिखिना ग्राह्यमेवात्र मस्तं
श्रीपिष्ट्या कर्णपत्रे[d] क्वथितमपि पुनर्यावदर्धप्रमाणं ॥ १३१ ॥

उद्धृत्याशुद्धखण्डाष्टपलमथनवत् क्षेपनीयं हि तत्र
तद्भोज्यं सर्वकालं ह्यशनविरहितं वायनं यावदेव ।
षण्मासैर्दिव्यदेहो वलिपलितगतो जायते योगयुक्तस्
तस्माद्भोज्यं तदेव प्रतिदिनसमये [e]किन्तु पिष्ट्या विहीनं ॥ १३२ ॥

पूर्वोक्तं बीजराजं सममपि तु रसे [f]जारितं सार्धमात्रं
क्षाराम्ले मर्दयित्वा बहुविविधविडै र्यावदेकत्वमिति ।
पित्ताम्ले गन्धकाद्यं[1] दरदमपि शिलां [g]मर्दयेत् सूततुल्यं[2]
तल्लेपात्तारपत्रं व्रजति कनकतां पक्वमप्याधिकेन[3] ॥ १३३ ॥

[h]तीक्ष्णं चाकाशजातं त्वल[4] लवणयवक्षारबीजं क्रमेण
वृद्धं चार्के द्विगुण्ये समरसकरणाद् दाहयेदर्कशेषं[5] ।
भूयः क्षारेण शुद्धं भवति मृदु तथा गोमयाद्ये निषिक्तं
तारे दत्तं त्रिभागं[i] हतमपि भरितं शुद्धपुष्पत्वमेति ॥ १३४ ॥

1. D. °काद्यं 2. L. सूत्र°
3. DL. पक्षमप्याधिकेन, smin pa dag kyaṅ 4. D. त्वलवण°
5. CP. °करणाद् वाहयेद्°, ñi ma'i lhag ma dag ni bsreg par bya

a. gser la ñi ma k'ab len loags daṅ
b. sa bon p'yed kyis kyaṅ ni dri ma dag daṅ bral bai dṅul č'u bsgoṅs pa sraṅ ni drug tu bya
c. ba yi dar ba drag po'i roe mo čan gyis bsad nas 'dir ni daṅs ma gzuṅ bya ba ñid.
d. dpal ldan goṅ bu k'ab len snod du
e. 'on kyaṅ goṅ bus rnam par dman
f. gsan yaṅ dṅul č'u la ni blug pa p'yed čam mo
g. dṅul č'u mo'uṅs par meñ
h. rnon po nam mk'a' las skyes a la lan c'va ya ba kṣā ra daṅ ni (sarja in Derge version) spos dkar rim pa yis
i. dṅul la sum č'a byin žiṅ

एला कर्पूरमाला चल घनफलिनी वायसानद्रिजञ्च[1]
कर्कोलं सिहंमूत्रोत्पलमृगजा रक्तदैत्यानि पूतिः ।
नागापोतं[2] रणं पत्रपलजलल्तान्यम्बरं वक्रमेतत्
पञ्चद्रव्यैस्तु गन्धं कुरु मृगशशिभि र्धूपपुष्पा सवाद्यैः[3] ॥ १३५ ॥

नेत्रेन्दुग्न्यब्धि वाणा गुणजलधिशरा हस्त चन्द्रेषु नेत्रा-
श्चन्द्राग्न्यब्धीन्दुकाला युगशरनयनाब्धीषु नेत्रेन्दु लोकाः ।
एलाद्या भागसंख्या क्रमपरिरचिता पञ्च पञ्च प्रकोष्ठे-
र्द्रव्यै गंन्धं भवेत् कक्षपुटपुरगतैः शुद्धभागे दिनाख्यैः ॥ १३६ ॥

जात्याद्येलाल्तानां दल कैलशपुरे[4] पातनीयं क्रमेण
लाक्षासर्जञ्च दुग्धं पुरमपि च सितं धूपकार्येषु धूपं ।
कुर्यात् कर्पूरखण्डैः कुसुमरसयुतै र्वह्निभागे नखैश्च
पिष्टं तद् गन्धतोयैरपि मधुरहिता धूपवर्त्तिः प्रकुर्यात् ॥ १३७ ॥

नाभ्यादौ सिंहमूत्रे शशिगगनपुरे पातयेत् स्नानयोगे
ग्रन्थि व्याघ्रं हरेणुं हृतमपि च तथा शंखं च [a]त्वग्विभागाः ।
धान्यमुर्वी[5] शताङ्कां दमनमपि मधुरो [6]तद्वदुद्वर्त्तने च
पूर्वोक्ते चानिवृत्ते जलजमिव तनुग्रन्थिपर्णञ्चतैले ॥ १३८ ॥

---

1. D. नादिजं च ; ri skyes
2. D. नागासीतं ; klu dan bsil ba ra ṇa
3. D. °धूतपुष्पा स वाद्यैः ; bdug ba me tog ŏ'aṅ la sogs pas so
4. P. कलशपुरे CD. कलस° ; kai la ša yi groṅ du
5. P. धान्यमुर्द्धी
6. D. तदवद्वदुदवर्तने च ; de ba žin dril byis dag la yaṅ

a. šun pa dag gi ŏ'a (*skin of a tree*)

चूर्णं ग्रन्थिश्च तद्वद् भवति तनुकृतं पानवासे मुखे च
त्वग्बोलं ग्रन्थिशंखं फलदलपुटपाके च हंसादिके च ।
एवं त्रिंशत्प्रभेदैः सुरचितविधिना गन्धधूपादियोगात्
कुर्याद् द्रव्यै विशुद्धैः फलपुटपवनैं वासितैं र्वेचितैश्च ॥ १३९ ॥

अष्टांशादो[1] कषायो भवति दलवशात् तद् द्विगुण्योग्रधूपः
पश्चाद् द्रव्यप्रमाणो गुड इति च भवेद् वधते ग्रीष्मयोगात् ।
पादांशं शंखधूपं मधुकमपि सितां निर्दहेद् द्रव्यतुल्यां
पिण्डं[a] शंखप्रमाणं मलयलघुचलं चन्द्रयुक्तश्च तद्वत् ॥ १४० ॥

पक्वं गन्धं सुपुष्पैः[2] कतिपयदिवसं वासयेद्यावदिष्टं
पश्चाद् वेधं शतांशं त्रिफलशशिमदैः[3] कारयेत् सीसकैश्च ।
सिक्थाम्बु[4] छागमूत्रं कुसुमरससमं क्वाथयेत् पुष्पजातं
मासैकं धान्यपक्वं भवति मृगसमं चासवं नाभिविद्धं ॥ १४१ ॥

गुह्यं गन्धेषु पूतिं रसनखचपलं धूपयोगेषु गुह्यं
तद्वत् सीतं तुरुष्कं गुरुमपि शशिनं वासकार्येषु पुष्पं ।
वेधे कर्पूरनाभि त्रिफलमदसुरास्नानयोगे च सम्यक्
गुह्यं [5]त्वग्ग्रन्थिपर्णं वनचरसहितं ग्रन्थिमुद्वर्त्तने च ॥ १४२ ॥

---

1. D. अष्टांशादौ ; dan por brgyad č'a 'dab ma'i dbaṅ gis
2. D. सपुष्पैः ; me tog bzaṅ po rnams kyis
3. C. °शशिपदैः zla ba ma da č'aṅ daṅ
4. D. स्निग्धाम्बु ; ši gru'i č'u daṅ (*skin of a blue tree*)
5. D. त्वग्ग्रन्थि° ; gsaṅ ba šiṅ c'a gran thi pa rṇa

a. šun pa po la
b. daṅ ba sogs la yaṅ
c. bu ram
d. goṅ bu
e. de bžin bsil ba tu ru ka daṅ gu ru ri boṅ čan yaṅ bsgo ba'i bya bar me tog go

शुद्धाब्जं द्रव्यहीनं मधुकविरहितं गन्धतोयेन पिष्टं
पक्वं धूपैः कषायाग्र ᵃसमधुकरजैः प्राप्तवृद्ध्या क्रमेण ।
द्वौ ग्रासौ खण्डमिश्रौ मन्यथचालया लौ कर्पूरयोश्च
ग्रासस्याद्यावसाने मधुकमपि सितां निर्दहेद्दाधिधूपात् ॥ १४३ ॥

वासं कृत्वा सुपुष्पैः कतिपयदिवसैर्गन्धतोयेन मिश्रं
ᵇअस्रावे मृत्कपाले[1] दृढविहितमुखे वेष्टिते सिक्थवस्त्रैः ।
कृत्वा विस्तीर्णभाण्डे त्वथ धरणितले पूरिते बालुकाभिः
पक्वं षण्मासयोगाद् भवति जलगतो ᶜनाभिभतो सगन्धः ॥ १४४ ॥

कृत्वा शुद्धिं तिलानां क्वथितदलजले[2] धूपलेपादिमिश्र
पश्चाज्जात्यादिपुष्पैः कतिपयदिवसं वासयेद् यावदिष्टं ।
यन्त्रैस्तैलं गृहीत्वा नृप निपुणतया स्थापयेत् काचभाण्डे
ᵈस्नाने नाभ्यङ्गने वा भवति मदकरं पुष्पतैलं ह्यपक्वं ॥ १४५ ॥

भूभृत्सूर्येन्दुमन्वक्षिमदनवसवो रुद्रराजाग्नयश्च
दिग्भूता रन्ध्रषट्कं तिथिजलनिधयो स्थापनीयास्तु[3] कोष्ठे ।
ᵉसंख्याकोष्ठैश्चतुर्भिर्जलनिधिशिखिनो लेखयित्वा समस्तं
श्रीचक्रं मानपृष्ठे प्रसवनसमये दर्शयेद् गुर्विणीनां ॥ १४६ ॥

---

1. L. °कपोले 2. CDL. क्वथित जलदलं°

3. CD. लेखनीया° ; mt'a' yi re mig la gžag bya

a. sbraṅ rci daṅ bčas lag skyes dag gis k'am bu rim pas 'p'el

b. 'zim pa'i t'od pa min pa spra c'il daṅ ni gos kyis bčiṅs te brtan par k'a bkab la

c. lte ba'i gos bo dri

d. k'rus sam yan lag byug pa dag las myos byed me tog til mar ñid ni smin pa min par 'gyur

e. draṅs ni re mig bži yis č'u yi gter daṅ rce mo čan te dpal ldan 'k'or lo mt'a' dag ni |
c'ad kyi rgyab tu bris nas raṅ tu bca' bar 'gyur ba'i dus su sbrum ma rnams la bstan par bya

[a]योगिन्योऽष्टाष्टकायाः प्रकटमहितले मातरो याः प्रसिद्धा
गर्भाख्या वासराख्या त्रिगुणनवदशैकादशान्यास्त्रिपञ्च ।
मासाख्या वत्सराख्या सकलभुवितले ताः प्रगृह्णन्ति बालं
गर्भे शूलञ्च पीडां[b] प्रसवनसमयेऽपीव कुर्वन्ति योनौ ॥ १४७ ॥

जातानां बालतन्त्रं भवति दिनवशात् मासवर्षप्रभेदात्
पञ्चक्रूराः प्रकृतिगुणवशात् संस्थिताः पर्वसन्धौ[1] ।
[c]बालं गृह्णन्ति[2] ते वै स्वतिथिभयगतं नैव मुञ्चन्ति राजन्
तेषां शान्त्यर्थमस्मिन् प्रभवति विविधं मण्डले स्नानहोमं ॥ १४८ ॥

कुष्ठो[3]ऽशीरं कसेरुं तगर कुवलयं केशरं पङ्कजस्य
पिष्ट्वा शीताम्बुना मन्त्रितमपि कुलिशं गर्भशूले प्रदेयं ।
गर्भस्तम्भेऽश्वलोमानि नकुलशिखिनः पीषयित्वा प्रदेयं
दुग्धाज्यं पायसान्नं दधिगुलसहितं दीयते वासरीणां ॥ १४९ ॥

पक्वान्नं पञ्चभिन्नं दधिगुलसहितं पोलिका मोदकांश्च
गन्धः पुष्पं प्रदीपं स्नपनमपि दलैः पञ्चरात्रं प्रकुर्यात् ।
गोदन्तं मेषशृङ्गं मृगनखचिकुरं सर्पनिर्मोकधूपं
[d]बालानां मासजानां कथितमपि बलिं पुष्टिहेतोः समस्तं ॥ १५० ॥

---

1. CD. सर्व°
2. C. बालान् D बाला न°
3. CD कुष्ठोशीरं, ru rta a śi ra (*ru rta* is a kind of root and so कुष्ठ here is not the name of a disease)

a. rnal.'byor ma rnams gaṅ dag rab gsal sa gži dag la brgyad pa brgyad kyi ma mor rab tu grags
b. zug gzer byed pa ñid
c. t'ams čad raṅ gi o'es la 'jigs gyur byis pa 'jin par byed de rgyal po ṅes par gtoṅ mi byed
d. byis pa zla skyes rnams ni rgyas pa'i don tu mt'a' dag brjod pa rnams kyaṅ gtor ma dag la'o

[a]पक्वान्नं पञ्चखाद्यं जलचरपिशितं गन्धपुष्पं प्रदीपं
मद्यं पूर्वोक्तधूपं स्नपनमपि तथा दिग्बलिं दिग्विभागे ।
बालानां वर्षजानां प्रकटितमवनौ पुष्टिहेतो नरेन्द्र
गर्भाद् वर्षं त्रिपञ्च प्रभवति[1] नियतं योगिनीनां प्रपूजा ॥ १५१ ॥

अङ्गाक्षेपोक्षिशूलं मुखकरचरणं पीततां याति सम्यक्
प्रस्रावः पीतवर्णो ज्वर इति च भवेच्छर्दिशाषश्च मूर्च्छा ।
ज्ञात्वा चिह्नानि तेषामपि नृप करणं मण्डले होमकार्यं
नो दत्ते मुञ्चयन्ति[b] प्रकृतिगुणवशान् मातरो भूतजाश्च ॥ १५२ ॥

श्वेताङ्गं यस्य सर्वं भवति नरपते [c]स्फोटकाश्चातिसूक्ष्मा
वक्रग्रीवा सगात्रा स्रवति हि रुधिरं वक्त्रगुह्ये गुदे च ।
तस्मिन् पूजां न कुर्याद् भवति हि लघुता मन्त्रिणां मोहितानां
मृत्युस्तस्यास्ति नूनं सुरनरभुजंगै रक्षितुं शक्यते न ॥ १५३ ॥

नागा यक्षा ग्रहा येपि च दनुकुलजा राक्षसा वै पिशाचाः
साकिन्यो[2] दुष्टलामा नररुधिररता डाकिनो रूपिकाश्च ।
कुम्भाण्डाः[d] क्षेत्रपालास्त्वविगणपतयः प्रेतवेतालसिद्धाः
[e]सापस्माराः खगेन्द्राः परमसुखकराः पूजिता मण्डले स्युः ॥ १५४ ॥

---

1. D. पञ्चोभय प्रतिनियतं
2. D. शाकिन्यो , sī kaṃ nya daṅ

a. bza' ba lṅa daṅ bča' ba lṅa daṅ č'u la rgyu ba ša daṅ dri daṅ me tog mar me daṅ
b. ma byin na ni' gtoṅ bar mi 'gyur
c. 'brum pa šin tu p'ra mo daṅ
d. grul bum dag daṅ
e. brjed byed daṅ bčas mk'a' 'gro'i dbaṅ rnams dkyil 'k'or dag la mč'od pa byas na mč'og bde byed par 'gyur

क्रूराणां पूजनार्थं भवति नरपते मण्डलं ग्रामबाह्ये
वृक्षस्थाने श्मशाने सुरवरभवने सङ्गमे वा नदीनां ।
हस्तं वा द्वौ चतुष्कं त्रिदशनवनृपं देवतानां[1] प्रमाणै-
र्मध्ये त्वष्टारचक्रं भवति कुलवशात्[2] मण्डलार्द्धभागं ॥ १५५ ॥

[a]द्वारं चक्राष्टमांशं[3] भवति खलु तदर्धेन वेदी च हाराः
प्राकारा वेदिकार्धा स्त्रिगुणमपि भवेत्तोरणं द्वारमानात् ।
वृत्तं कुण्डं त्रिभागं सितकमलमयं पूरिता श्वेतरङ्गैः
कुर्याच्छ्रीपद्मरङ्गैः स्वकुलदिशिगतं देवतानां स्वचिह्नं ॥ १५६ ॥

वज्रं मध्येऽसि पूर्वे[4] भवति[b] कुलवशाद् दक्षिणे रक्तरत्नं
वामे श्वेतञ्च पद्मं शतदलसहितं पश्चिमे चक्रचिह्नं ।
आग्नेय्यां कर्णिका वै कमलदलगता दैत्यकोणेऽङ्कुशः स्यात्
वायव्ये वज्रपाशो भवति नरपते [c]रुद्रपत्रे त्रिशूलं ॥ १५७ ॥

पूर्वद्वारे च खड्गं कृषणघननिभं दक्षिणे वज्रदण्डः
वारुण्ये श्रीगदा च प्रभवति नियतं चोत्तरे मुद्गरश्च ।
ज्ञात्वा चित्तानुसारं कुरु सुबहुविधं कालचक्रं हि यावत्
वन्ध्यानां पुत्रहेतो ग्रहनिहतनृणां शान्तिपुष्ट्यर्थमेतत् ॥ १५८ ॥

---

1. CDV. देवता°
2. CDV. गुण° ; rigs kyi
3. D. मानं
4. P. °रिन्द्रे

a. sgo ni 'k'or lo'i brgyad č'ar 'gyur te ṅes par de yi p'yed 'kyis stegs bu dag daṅ do šal lo
b. rdo rje dbus daṅ ral gri dbaṅ por 'gyur te
c. drag po'i 'dab ma dag la rce gsum mo

[a]कुम्भाष्टाभिः सरत्नै र्दलकमलमुखैः सप्तमल्लैरपक्वै-
स्तोयैः पञ्चामृताद्यैः स्नपनमपि च निर्मञ्छनं सर्षपाद्यैः।
गन्धै र्धूपैः प्रदीपै र्विविधफलरसैः श्वेतपुष्पैश्च वस्त्रैः
कृत्वा पूजां विचित्रां पुनरपि च ततो होममेयेच्छान्तिहव्यं ॥ १५९ ॥

[b]दुग्धं धान्यं तिलाद्यं[1] शरशतसमिधः पञ्चदुग्धाङ्घ्रिपानां
अर्घञ्चावाहनं [c]चाचमनमपि[2] तथैवार्चनं पूजनञ्च।
कुर्याच्छान्त्यर्थमेतत् प्रवरभुवितले मातृभिः पीडितानां
षट्त्रिंशद् योगिनीनां भवति नरपते सर्वकालं हि पूजा ॥ १६० ॥

नैरात्म्यं कर्मपाकस्त्रिभव ऋतुगति र्द्वादशाङ्गप्रतीतेः
संभूति र्वेदसत्यं द्विगुणितनवका [d]वेणिका बुद्धधर्माः।
पञ्चस्कन्धास्त्रिकायाः सहज इति [e]तथैवाजडा[3]शून्यता च
यस्मिन्नेतद् वदन्ति प्रभवति नियता देशना वज्रिणः सा ॥ १६१ ॥

यस्मिन् वेदः स्वयम्भूर्मुखकरचरणादौ च योनि र्जनस्य
नान्यो धर्मोऽश्वमेधात् परत[4] इति भवेद् देशना ब्रह्मणः सा।
कर्तात्मा कर्मकालः प्रकृतिरपि गुणाः शून्यता नष्टधर्मा
कर्ता हेतुः फलस्य प्रकटितनियता देशना सात्र[5] विष्णोः ॥ १६२ ॥

---

1. CLD दुग्धध्यानं तिलाज्यं
2. CD. चारमणमपि
3. CD. °वाजता
4. CLD. °धादपर
5. P. °देशनामाह

a. bum pa brgyad ni rin č'en dań bčas 'dab ma pad ma'i k'a dań so ma btań ba'i k'am p'or ni/bdun gyi č'u dań bdud rci lňa la sogs pas bkrus te slar yań ñuńs kar sogs kyis ńes par

b. 'o ma so ba tila la sogs dań 'o ma'i ś rkań 't'uń lňa rnam dag gi yam śiń 'dab brgya dań

c. mč'od yon dag dań spyan drań žal bsil dań ni

d. ma 'dras sańs č'os rnams te

e. de bžin ñid du blun pa ma yin stoń pa ñid

षण्मार्गाः पञ्चतत्त्वं परपदमखिलं चापरं मन्त्रदेहं
विद्यात्मा सच्छिवत्वं[1] त्रिविधपद[2]गते योजनं त्यागभावः ।
बिन्दो र्भेदः शिवत्वं सकलतनुगतं द्वादशग्रन्थिभेदाः
एतत् सर्वं हि यत्र प्रभवति नियता देशना सा शिवस्य ॥ १६३ ॥

नास्तीशः कर्मपाकोऽपि च गुणविषयान् भूतवृन्दं हि भुंक्ते[3]
तस्याभावे फलं न स्फुटममरगुरो देशना वेदितव्या ।
[a]कर्त्र्या सृष्टं समस्तं सचरमचरजं तापिनां मुक्तिहेतोः
स्वर्गस्तस्य प्रतोषाद् भवति खलु नृणां देशना ब्रह्मणः सा ॥ १६४ ॥

त्रैकाल्यं द्रव्यषट्कं नवपदविहितं [b]जीवषट्कायलेशाः
[c]पञ्चान्ये सन्ति काया व्रतसमितिगतिर्ज्ञानचारित्रभेदाः ।
[d]जीवः कायप्रमाणो ह्यपरिमितभवे नित्यं जीवेन[4] मोक्षो
यस्मिन् मोक्षप्रमाणं ह्युपरिनिगदितं देशना सा जिनानां ॥ १६५ ॥

वेदोसौ न स्वयंभूस्त्रिभुवननिलये वेदशब्दोऽर्थवाची
ब्रह्मा वक्त्रैश्चतुर्भिः प्रकटयति पुरा वेदशब्देन चार्थं ।
[e]शब्दस्यार्थोप्यभिन्नस्त्वर्थं दहति मुखं किन्न शब्दोऽग्निरुक्त-
स्तस्माद् वै देशकोस्म्यप्यविदितविषयेऽनागतार्थेप्यतीते ॥ १६६ ॥

1. D. सशिव° V. सछिव°
2. CLDV. °पथ°
3. CLD. भुक्ते
4. CLDV. ब्रह्मचर्येण

a. byed pos rgyu dan mi rgyu las skyes mt'a' dag bskyed čin stag gzig rnams kyi t'ar pa dag gi rgyu
b. srog ni drug gi lus la č'a šas so
c. gžan ni yod pa'i lus lna brtul žugs sdom pa 'gro dan ye šes spyod pa dag gi dbye ba rnams
d. srog ni lus kyi c'ad de dpag tu med pa'i srid pa dag gis rtag pa'i srog gis t'ar pa'o
e. čl ste sgra dan don ni t'a dad min na me sgra brjod pa dag gis k'a ni čis mi sreg

वेदो नावाशतुल्यः कृतक इह मुखोच्चारितः स्थानभेदात्
युक्त्या प्रादेशिकश्च द्विजमुखपठितः सर्वगोऽन्ये पठन्ति ।
यस्माच्छूद्रादि जाति लिखति[1] पठति नो सर्वगो वेद एष-
स्तस्माद् वेदप्रमाणं न हि भवति नृणां ज्ञानिनां पण्डितानां ॥ १६७

अस्तीशः सर्वकर्ता यदि स च जगतः कर्मभोक्ता न चान्यो
नापीशः कर्मकर्ता यदि स च न भवेत् सर्वकर्ता समन्तात् ।
कर्तान्यत्प्रेरितोसौ यदि परमपराधीनता वस्तुरेषा
तस्मात् कर्ता न चेशोऽशुभशुभफलदः प्राणिनां कर्म मुक्त्वा ॥ १६८ ।

पृथ्वीतोयाग्निवातार्णव इह यदि खे कर्तुरादौ न सन्ति
[a]द्रव्याभावे न विश्वं विषयविरहितः सर्वकर्ता करोति ।
न प्रत्यक्षं परोक्षं विषयविरहितस्यास्य कर्तुः प्रमाणं
संयोगादेव सर्वं भवति नरपते नेच्छया कर्मरूपं ॥ १६९ ॥

संयोगादिन्दुकान्तेः भवति[2] च सलिलं[b] दर्पणे वस्तुबिम्बं
जिह्वास्रावोऽम्लहेतोः स्वरवत[c] इतरः शुद्धबीजेऽङ्कुरः स्यात् ।
कान्ताच्चायःशलाकाभ्रमणमपि भवेन्नेच्छया किञ्चिदेषां
वस्तूनां शक्तिरेषा त्रिभुवननिलये निर्मिता केनचिन्न ॥ १७० ।

---

1. P. पठति लिखति
2. CD. स्रवति

a. rjas dag med pa la ni yul daṅ rnam par bral ba'i t'ams čad byed po sna ts'ogs mi byed do

b. yaṅ dag sbyor ba las ni č'u šel las kyaṅ č'u ru 'gyur te

c. skyur ba'i rgyu las lče 'jag raṅ gi sgra las

यद्यात्मा सर्वगः स्यादनुभवति कथं बन्धुविश्लेषदुःखं
नित्यश्चाथ यदि स्यान् मदनशरहतोऽस्वस्थतां किं प्रयाति ।
यद्यासीत् सक्रियश्च व्रजति कथमिमां मूढतां सुप्तकाले
एवं वै सर्वगः स्याद् विभुरपि च पुरा सक्रियोयं न चात्मा ॥ १७१

[b]नास्त्यात्मासंभवो नास्त्यशुभशुभफलं चास्ति कर्त्ताविहीनं
गन्ता नास्त्यस्ति मोक्षाय गमनमखिलं [c]चास्ति बन्धो न बद्धः[1] ।
भावोऽभावोपि चास्ति क्षणिकविरहितो निःस्वभावो भवोऽस्ति
एतन्मे सत्यवाक्यं सुरफणिवचनैः संग्रहै हन्यते न ॥ १७२ ॥

यस्तत्त्वं पुद्गलाख्यं वदति तनुगतं तत्स्वभावात् स नष्टः
संवृत्या चार्थवादोत्ववित्दितपरमार्थो ह्यसन्मन्यमानः ।
विज्ञानं मन्यमानं त्रिभुवनसकलं चैव विज्ञानवादी
योऽनष्टो नष्टपक्षः स भवति करुणाशून्यताज्ञानवादी ॥ १७३ ॥

[d]जन्तुः[2] पूर्वाणि कर्माण्यनुभवति कृतान्यैहिकान्यन्यजात्या
यद्येवं कर्मनाशो न हि भवति नृणां जाति जात्यन्तरेण ।
[e]संसारान् निर्गमः स्यादपरिमितभवे नैव मोक्षे प्रवेशः[3]
एतद् वै तायिनान्तु प्रभवति हि मतं चान्यजातिप्रहीनं ॥ १७४ ॥

---

1. P. बध्यः
2. D. यन्त्रः
3. CLDV. मोक्षप्रवेश

a. gnas skabs ñid du čis rab 'gyur

b. bdag med 'byuṅ ba yod čiṅ dge daṅ mi dge'i 'bras bu yod de byed pa po yis rnam par dman

c. 'oṅ ba yod de bčiṅs pa med

d. skye bo sñon gyi las rnams ñams su myoṅ 'gyur 'di la byas pa rnams ni skye ba gžan pa'o

e. dpag med srid pa dag gis 'k'or ba las ni 'byuṅ bar 'gyur daṅ t'ar bar 'jug pa med pa ñid

भूते पंचैकभूतैः प्रभवति मदिरा शक्तिवत् साक्षिचित्तं
ᵃवृक्षाणां किन्न हि स्यात् क्षितिजलहुतभुग् मारुताकाशयोगात् ।
नास्त्येषां जन्तुशक्तिस्त्वथ परममृषाभूतसंयोगशक्तिर्
एतच्चार्वाकवाक्यं न हि सुखफलदं मार्गनष्टं नराणां ॥ १७५ ॥

जीवः कायप्रमाणो यदि करचरणच्छेदनान् नश्यते किं
ᵇनित्यं कायः[1] प्रमावादणुरपि च भवेत् स्थूलतां किं[2] प्रयाति ।
संसारात् कर्ममुक्तो व्रजति सुखपदं यत् स्थितं लोकमूर्ध्नि
त्रैलोक्यं चाणुभि र्यद्रचितमपि सदा शाश्वतं तन्न कालात् ॥ १७६ ।

इत्यादिज्ञानहेतोः प्रकटयति महो देशनां कालचक्रः
ᶜपुंसां चित्तानुसारां मृदुकठिनपरां वासनाया बलेन ।
चित्तं वै भावरागैः ᵈस्फटिकवदुपधाद्रागतां याति यस्मात्
तस्माद्धर्मो न कश्चित् स्वपरकुलगतो योगिना दुषणीयः ॥ १७७ ॥

धर्मः सत्त्वोपकारो विषयविरहितश्चापकारोप्यधर्मः
हिंसा वेदप्रमाणान् नहि सुखफलदा दुःखदा सर्वकालं ।
सन्मैत्री मूर्खवाक्यात् परमसुखकरा सत्त्वसौख्यानुरक्ता[3]
तस्मात् सत्त्वार्थमेकं कुरु नृप मनसा भावनां निःस्वभावं ॥ १७८ ॥

---

1. CD. कार्यप्रभावाद्
2. CLD. स
3. CLDV. सर्वसत्त्वा°

a. šiṅ rnams dag la či p'yir mi 'gyur sa daṅ č'u daṅ bsreg za rluṅ daṅ nam mk'a' sbyor p'yir ro

b. rtag pa dag ni lus kyi mt'u las p'ra mor 'gyur žiṅ sbom por yaṅ ni rab tu 'gyur ram či

c. 'jam daṅ sra daṅ gžan pa'i bag č'ags stobs kyis skyes bu rnams kyi sems kyi rjes bu 'braṅ ba ste

d. šel bžin c'on ldan ñid 'gyur ba

इन्द्रोहं स्वर्गलोके त्रिदशनरगुरु र्भूतले चक्रवर्त्ती
पाताले नागराजः फणिकुलनमितः सर्वगश्चोत्तमोहं ।
ज्ञानं बुद्धो मुनीन्द्रोऽक्षरपरमविभु र्योगिनां वज्रयोगो
वेदोङ्कारः पवित्रो व्रज मम शरणं सर्वभावेन राजन् ॥ १७६ ॥

त्वं माता त्वं पिता [a]त्वं जगद्[1]गुरुरपि त्वञ्च बन्धुः सुमित्रं[2]
त्वं नाथस्त्वं विधाता हि त्वमघहरणं त्वं पदं संपदां च ।
त्वं कैवल्यं पदं त्वं वरगुणनिलयो ध्वस्तदोषस्त्वमेव
त्वं दीननाथ चिन्तामणिरपि शरणं त्वां गतोहं जिनेन्द्र ॥ १८० ॥

इति श्रीमदादिबुद्धोद्धृते श्रीकालचक्रे[3]
अध्यात्मनिर्णयो नाम पटलो[4]
द्वितीयः ।

1. CD. जगति गुरु°
2. CD. बन्धुश्च मित्रं
3. P. °महाकाल°
4. P. °निर्णयो द्वितीयः पटलः

a. k'yod ni 'gro ba'i bla ma kyod ni gñen dan grogs bzaṅ yaṅ

तृतीयः पटलः

देहे विश्वस्य मानं दिननिशिसमयो माससंक्रान्तिभेदाः
नाडीनां सूक्ष्मसंख्या प्रकृतिषु पुरुषस्तीर्थिकानां मतञ्च ।
वेदः कर्त्तादिभेदः श्रुतमिति हि मया मण्डलं देशनीयं
श्रुत्वा सौचन्द्रवाक्यं प्रवदति सुगतो मण्डलं कालचक्रं ॥ १ ॥

आदौ संसेवनीयो [a]गुरुरपि समयो वज्रयानाधिरूढस्
[b]तत्त्वध्यायी त्वलुब्धो व्यपगतकलुषः क्षान्तिशीलोऽध्ववर्त्ती ।
शिष्याणां मार्गदाता नरकभयहरस्तत्त्वतो ब्रह्मचारी
माराणां वज्रदण्डः स च धरणितले वज्रसत्त्वः प्रसिद्धः ॥ २ ॥

मानी क्रोधाभिभूतः समयविरहितो द्रव्यलुब्धोऽश्रुतश्च
शिष्याणां वञ्चनार्थी परमसुखपदे नष्टचित्तो न सिक्तः ।
भोगासक्तः प्रमत्तः सकटुकवचनः कामुकश्चेन्द्रियार्थे
शिष्यैः सम्बोधिहेतो नरकमिव बुधै र्वर्जनीयः स एव ॥ ३ ॥

गम्भीरोदारचित्तो गुरुनियमरतस्त्यागशीलो गुणज्ञो
मोक्षार्थी तन्त्रभक्तोऽप्यचलितहृदयो[1] [d]लब्धतत्त्वोतिगुप्तः ।
दुष्टानां सङ्गनष्टः सुनिपुणगुरुणा ग्राह्यशिष्यः स एव
प्रज्ञासेकादिहेतोरपर इति पुनर्मध्यमः पुण्यहेतोः ॥ ४ ॥

---

1. CLD. °प्यचपल°
   V. °प्यपर°

a. bla ma dag kyaṅ dam ṭ'ig ldan źiṅ rdo rje t'eg par lhag par gnas

b. de ñid bsgoms śiṅ ma č'ags dri ma dag daṅ rnam par bral źiṅ bzod pa'i daṅ ṭ'ul lam la źugs

c. de ñid las ni c'aṅs sbyod ldan

d. de ñid t'ob pa śin tu sbed (he can keep secret the *tattva* he has attained)

[a]चैत्रान्ते श्वेतपर्वे परहितगुरुणा मण्डलं वर्त्तयित्वा
देयाः सप्ताभिषेकाः कलुषमलहराः पुण्यहेतोः सुतानां ।
पूजा वै योगिनीनां सकलगुणनिधे देशनाया निमित्तं
[b]पूजाभावेऽद्रमेकं न हि भवति गुरो देशना तन्त्रराजे ॥ ५ ॥

सेकार्थं भूपरीक्षां वनपुरनिगमे ग्रामके दिग्विभागं
ज्ञात्वाचार्यः समस्तं त्वशुभशुभफले शान्तिकाद्यं प्रकुर्यात् ।
कुण्डानां लक्षणं वै [c]सकलसरजसां होमकीलादिकानां
शिष्याणां संग्रहं यत् परमजिनपते मण्डलालेखनञ्च ॥ ६ ॥

भूमे जातिश्चतुर्धा भवति गुणवशाच्छूद्रविड्राजविप्रा
कृष्णा पीता च रक्ता शशधरधवला वर्णतो वेदितव्या ।
पूतिक्षाराब्जगन्धा भवति वसुमती दिव्यगन्धा क्रमेण
अम्ला क्षारा च शूद्रो समधुरकटुके विट्नृपेऽन्ये द्विजातिः ॥ ७ ॥

श्वेता शान्तौ च पुष्टौ भ[illegible][d] घननिभा मारणोच्चाटने च
[e]रक्ताकृष्टौ च वश्ये वरकनकनिभा स्तम्भने मोहने च ।
सर्वस्मिन् कर्मभागे भवति हि हरिता पञ्चमी चान्त्यजातिः
सर्वस्वादा च गन्धा सकलगुणनिधि योगिना वेदितव्या ॥ ८ ॥

---

a. nag po'i mt'ar ni dkar po'i c'igs la gzan la p'an pa'i bla mas dkyil 'k'or dag ni bzeṅs byas nas

b. mc'od pa med na lo gcig tu ni rgyud kyi rgyal po dag las bla mas bstan par mi by'o

c. bum pa daṅ bc'as rdul c'on sbyin sreg p'ur bu la soge daṅ

d. dkar po dag ni ži daṅ rgyas pa la ste

e. dmar po dbaṅ daṅ dgug pa la ste mc'og gi gser daṅ mo'uṅ pa reṅs daṅ rmoṅs pa la yaṅ 'gyur

ऐशान्यां चोत्तरे वै भवति भुवितले^a शान्तिकं पौष्टिकञ्च
आग्नेय्यां पूर्वभागे प्रकटितनियतं मारणोच्चाटनञ्च ।
नैर्ऋत्यां दक्षिणे च स्फुटमपि गदितं वश्यमाकर्षणञ्च
वायव्यां पश्चिमे वै परमनरपतेस्तम्भनं मोहनञ्च ॥ ९ ॥

कुण्डं ग्रामाष्टदिक्षु प्रभवति नियतं वर्त्तुलं चाब्धिकोणे
अर्धेन्दुं पञ्चकोणं प्रकृतिगुणवशात् सप्तकोणं त्रिकोणं ।
षट्कोणं चाष्टकोण भवति कुलवशात् गर्भचिह्नञ्च तेषां
पद्मं चक्रं च कर्त्री त्वसिरिषुरिति वज्राङ्कुशः शृङ्खलाहिः[1] ॥१०॥

एकद्व्यर्धैकहस्तं खयुग खनयनं खाग्नि खत्वंङ्गुलं स्याद्
^b अर्धांगा[2] षड्विभागाद् त्वरुण रविविभागेन खानिश्च वेदी ।
ओष्ठश्च चिह्नावली स्यादुपरिकुलवशाद् वेदिकायाः समन्ताद्
वेदीबाह्येऽब्जपत्राण्यपि कुरु नृपते ^c शान्तिपुष्ट्यो न चान्ये ॥ ११ ॥

वज्रं वा सर्वकर्मस्वपि भवति मही कीलकं चाष्टभेदं
^d न्यग्रोधाश्वत्थकार्यायसजं[3] खदिरजं चूत[4] बिल्वार्कजञ्च ।
एवं स्फाटिक्यकुम्भा वररजतमयाः श्रीकपालायसाश्च
ताम्राख्याः हैमकुम्भाः प्रकटितनियता दारुजा मृण्मयाश्च ॥ १२ ॥

---

1. D. हि ; sbrul
2. CD. अर्धांशा
3. D. °कास्थीन्न
4. LD. भूत°

a. ži ba daṅ ni rgyas pa dag tu 'gyur ba ste
b. p'yod kyi yan lag drug gi č'a šas ñi ma ñi ma'i č'a šas dag gis zabs daṅ k'a k'yer daṅ
c. ži rgyas la ste gžan la min (for peace and well-being and not for malevolent practices like *māraṇa* etc.)
d. nya gro dha daṅ a šva dt'a ka rus lčags seṅ ldeṅ las skyes cū ta bil ba a rka skyes

वृत्ता द्व्यष्टाङ्गुलोक्ता द्विगुणितदशकेनोच्छ्रिता द्व्यङ्गुलोष्ठाः
षड्ग्रीवाष्टाङ्गुलास्याः शशधरधवलाः शान्तिपुष्ट्योर्न चान्ये ।
पूर्वाह्लादष्ट्यामाः[a] प्रतिदिनसमये शान्तिपुष्ट्यादिके स्युर्
एवन्तत्रार्धयामै दिननिशिसमये चाष्टकर्म प्रकुर्यात् ॥ १३ ॥

मध्याह्नं चार्धरात्रं दिननिशिसमये शान्तिके वर्जनीयं
लग्नं क्रूरग्रहस्थं मरणभयकरं तद्वदेवं प्रसिद्धं ।
सक्षीराः शान्तिपुष्ट्योः शरशतसमिधो मारणे मानुषास्थि
विद्वेषे काकपिच्छान्यपि च खदिरजाः किंशुकाकृष्टिवश्ये ॥ १४ ॥

[b]बिल्वोन्मत्तोर्ध्वहस्ताः[1] शरशतगणना स्तम्भने मोहने च
[c]क्षीराज्यासृग्वसास्वेद कुलिशसलिलं श्लेष्म मद्यादि होमे ।
दूर्वा सस्यञ्च मांसं सविषमपि तथा राजिका रक्तपुष्पं
बिल्वं निर्माल्यमाला[d] सुकनककुसुमान्येव शान्त्यादिकेषु ॥ १५ ॥

याम्ये नैरृत्यकोणे सवरुणपवने यक्षरुद्रेन्द्रवह्नौ
आचार्यस्यासनं वै भवति नरपते शान्तिकर्मादिके च ।
[e]रङ्गं कर्मद्वये स्यादपि भुविकमले श्वेतकृष्णार्कपीतं
बाह्ये बुद्धप्रभेदैः सुरयमवरुणेषूत्तरे रङ्गभूमिः ॥ १६ ॥

---

1. DV. °न्मतार्ध°;

a. sna dro nas ni t'un brgyad po rnams

b. bil ba smyo byed dag ni k'ru p'yed mda' brgya'i grans rnams
rens pa dan ni rmons pa dag la yan

c. 'o ma mar dan k'rag dan žag dan rdul dan rdo rje'i č'u dan
mč'il ma č'an rnams bsreg bya ste

d. bil ba dan ni me tog sñins po'i p'ren ba

e. o'on ni las gñis dag la 'gyur te goo bo'i pa dma la yan dkar
nag ñi ma ser po'o

कुण्डे वा मण्डले वा भवति कुलवशाद्रङ्गपातश्च दिक्षु
ᵃन्यासाद्यं प्रोक्षणाद्यं स्वहृदयकुलिशोत्सर्जनं देवतानां ।
स्फाटिक्याद्यघपात्रे वसुदलकमलं द्वादशाङ्गुष्ठकञ्च
ᵇदण्डाग्रेऽङ्गुल्यपात्रं भवति च चूर्णकं[1] चाहुती होमकार्ये ॥ १७ ॥

शान्ता क्रूरा सकामा भवति कुलवशाद् देवता स्तब्धमूर्ति
एवं क्रमद्वये स्यात् प्रकटितनियतौ मण्डले चाधिदेवः ।
पञ्चाकारो जिनेन्द्र[2] त्रिविध भवगतः[3] स्कन्धधात्वादिभेदैः
पञ्चाकारं हि तस्मादपि भवति रजोमण्डले देवतानां ॥ १८ ॥

सूत्रं हस्ताष्टकं स्याद् भवति करयवैकेनवृत्तं त्रिवृत्तं
आचार्याङ्गुष्ठकेन[4] त्रिविधपथगतं सूत्रमेकं न चान्यत् ।
पर्यङ्कः शान्तिकादौ क्रमपरिरचितं वज्रदैत्योत्कटञ्च
पर्यङ्कार्धं द्विभेदं गुदगतचरणञ्चासनं कर्मभेदः ॥ १९ ॥

स्फाटिक्यैर्मौक्तिकैर्वा नरखरदशनैर्वास्थिभिः पुत्रजीवैःᶜ
पद्माख्यैशाक्षिरिष्टैःᵈ सुगतकुलवशान् मन्त्रजापेक्षसूत्रं ।
सौगन्धैः श्वेतपुष्पैः सकटुककषणैरर्चनं रक्तपीतैः
शीतोᵉ विण्मांसधूपो मधुरुधिरयुतोऽप्युग्रधूपः कषायः ॥ २० ॥

---

1. D. चुलुक
2. CD. नरेन्द्र ; rgyal ba'i dbaṅ po
3. CD. भगवतः ; srid pa la gnas
4. C. आचार्यादहस्तकेन

a. dgod pa la sogs bsaṅ gtor la sogs raṅ gi sñiṅ ga'i rḍo rje dag las lha rnams spro ba'o
b. yu ba'i rce mor sñim pa'i snod de k'yor ba dag kyaṅ bsregs blugs sbyin sreg bya ba dag la'o
c. bo de ce daṅ ni
d. pa dma žes bya dbaṅ mig luṅ taṅ
e. bsil daṅ (willow tree ?)

यन्त्रं न्यग्रोधपत्रो चितिमृतकपटे बाहुपत्रेऽर्कपत्रे
श्रीखण्डैः शालिपिण्डैश्चितिभुवनगताङ्गाररक्तै विषेण ।
ᵃकाश्मीरै रक्तशोतैस्त्रिफलरसनिशातालकै र्लेखनं[1] स्याद्
दूर्वा शोतास्थिपिङ्गा कनकखदिरजा लेखनीबिल्वजार्का ॥ २१ ॥

मृन्मन्दे श्रीकपाले[b] त्रिमधुनि रुचिरे ᶜसिक्थवेष्टेऽस्मल्ये
साद्रे स्थाने पवित्रे ᵈचितिभुवनतले च भि[2]तापे धरण्यां ।
यन्त्रस्यारोपणं स्यादशुभशुभवशात् मन्त्रिणा वेदितव्यं
चन्द्रेभे प्रेत उष्ट्रे मृगतुरगपशौ कूर्मदेहे क्रमेण ॥ २२ ॥

श्रीवज्रैः सर्वदिक्षु स्थिरमपि सकलं निर्दहेत् मारवृन्दं
पश्चाच्चक्रे दशारे दिशिविदिशिगतं भावयेत् क्रोधवृन्दं ।
क्रोधेन्द्रं चक्रमध्ये द्व्यधिकजिनकरं वज्रवेगं युगास्यं
तस्माद् यत्किञ्चिदिष्टं गुरुनियमयुतं साधकैः साधनीयं ॥ २३ ॥

त्रिप्राकारांस्त्रिवज्रै र्महिवलयगतान् दूरदृष्ट्यावसाने
प्रातश्छायावसाने क्षितितलनिलयादम्बरे वज्रकूटं ।
मध्येऽब्जं सूर्यहस्तं भवति ᵉयुगकरा कर्णिका सासना च
आत्मानं तस्य मूर्ध्नि व्यपगतकलुषं योगिना भावनीयं ॥ २४ ॥

---

1. C. °लेखनि
2. DV. °चापे

a. k'a č'e oa nda na dmar daṅ 'bras bu gsum gyi k'u ba yuṅ ba ba blas bris par 'gyur ba ste
b. k'am p'or dpal ldan t'od par
c. spra c'il goṅ bu so p'ag dag gi dbus su ni
d. ro k'aṅ sa gži me yis gduṅ daṅ sa dag la
e. lte ba gdaṅ daṅ bčas pa dag kyaṅ dus kyi k'rir 'gyur ro

भूमेर्दिक्षु त्रिवज्रैः प्रथममपि बलिं क्षेत्रपालाय दत्त्वा
पश्चाद्वज्रैश्चतुर्भि र्दिशिविदिशिगतं निर्दहेन् मारवृन्दं ।
भूमिञ्चावाहयित्वा ᵃससलिलकुसुमैरर्घमस्यै प्रदेयं
पश्चाच्छुद्धिं यथेष्टां कुरु भूविनिलये प्रार्थयित्वा तु ताञ्च ॥ २५ ॥

देवि त्वं साक्षिभूता[1] सुरपतिसहिते मारभङ्गे जिनस्य
तस्मात् त्वं पूजनीया सुरवरनमिते गृह्ण गृह्णार्घकं मे ।
भग्नं मारस्य सैन्यं प्रवलमपि यथा बोधहेतो र्जिनेन
शिष्याणां सेकहेतोरहमपि च तथा मारनाशं करोमि ॥ २६ ॥

ᵇये बुद्धाः सर्वदिक्षु व्यपगतकलुषा बोधिसत्त्वाः समस्तास्
ते मां वै पालयन्तु परमकरुणया मण्डले सेकहेतोः ।
तानेवाभ्यर्च्य सर्वान् दृढखदिरमयैः कीलकैः कीलयेत् क्ष्मां[2]
दिक्क्रोधान् दिग्विभागे प्रहरणसहितान् विन्यसेद्रक्षणार्थं ॥ २७ ॥

शल्यं साङ्गारशृङ्गं[3] मरणभयकरं भूमिगर्भे निविष्टं[3]
तस्मिंस्थाने विनाशो भवति गुणवशाच्छोधनीयं हि तस्मात् ।
रत्नं शंखश्च काचो विजयसुखकरो मण्डलार्थं हि भूमौ
ᶜप्रासादार्थं गृहार्थं प्रकटितनियतश्चात्र यागादिहेतोः[4] ॥ २८ ॥

---

1. D. साक्षिभूत्वा सुरपति°
2. D. reads it at the beginning of the fourth quarter
3. D. °शृङ्गे
4. D. योगादि°

a. č'u dañ bčas pa'i me tog dag gis 'di la mč'od yon rab tu sbyin

b. gañ dag p'yogs rnams kun nas sañs rgyas byañ č'ub sems-dpa' ñes pa rnam bral bcun mo dañ bčas pa

c. k'añ bzañ don dañ k'yim gyi don dañ rab gsal ñes par 'dir ni mč'od sbyin la sogs č'ed du'o

[a]पूर्णायां भूमिशुद्धिं ग्रहणमपि तथा संग्रहः पुत्रकाणां
द्वादश्यां सूत्रपातो मदनमनुदिने श्रीरजःपात एव ।
सेकाद्यं पूर्णिमायां ददति वरगुरु र्मारभङ्गे दिने च
तस्मिन् रात्रौ प्रतिष्ठा भवति जिनकुले नान्यरात्रौ प्रतिष्ठा ॥ २९ ॥

अन्ये नक्तं प्रतिष्ठा भवति नरपते शुद्धलग्ने ग्रहाद्ये
जीवे शुक्रे[1]ऽस्तमेते न हि भवति तदा वै विवाहः प्रतिष्ठा ।
ज्ञात्वाचार्यः समस्तं क्षितितलनिलये लोकलोकोत्तरञ्च
यद्यत्कार्यं करोति प्रभवति हि शुभं तत्तदेवं समस्तं ॥ ३० ॥

कृत्वा शिष्यस्य रक्षां शिरसि हृदि तथोष्णीषनाभौ च कण्ठे
श्रीगुह्याब्जे[2] जिनाद्यैरुभयकुलगतैः कायवाक्चित्तभिन्नैः[3] ।
[a]एवं लेखादिकानां[4] प्रकटितनियतैः श्रीस्वरैः पुस्तकानां
सत्त्वानां मोक्षहेतो[b]रमुकमपि विभो मण्डलं वर्तयामः ॥ ३१ ॥

शुद्धे स्थाने सुपूर्णे सुसमविरचिते कूर्मपृष्ठोन्नते च
एकादौ हस्तमाने युगवसुनृपसाहस्रमेव प्रमाणे ।
सूत्रं वज्रं रजो वै सुरयमवरुणे चोत्तरे वज्रघण्टां
दत्त्वा लब्धे निमित्ते प्रथमपरदिशं मण्डलं वर्त्तनीयं[5] ॥ ३२ ॥

---

1. CD. शुभ्रे ; srog daṅ pa saṅs nub par gyur na
2. C. °गुह्येऽब्जे D. गुह्येऽब्दे
3. CLDV. °वज्रैः
4. P. लेपादिकानां प्रभवति
5. P. सूत्रनीयं

a. de bžin sku gzugs sogs daṅ glegs bam rnams ni rab gsal ṅes pa'i dpal ldan dbyaṅs rnams dag gis te

b. ǒ'e ge bdag kyaṅ

छिन्ने सूत्रे गुरोश्च क्षतिरपि परिघा लङ्घने पुत्रकानां
वातोद्धूतं रजश्चेत् प्रकटयति भयं राजभङ्गं च राष्ट्रे ।
तद् दृष्ट्वा दुर्निमित्तं पुनरपि च विभो मंन्त्रजापं प्रकुर्यात्
भूयो लब्धे निमित्ते समविषमपदैः [a]सूत्रपातो विधेयः ॥ ३३ ॥

प्रज्ञोपायाङ्गमध्ये भवति स परिघो मण्डले वर्जनीयो
भूमौ संग्रामकाले शिखिपवनगतः सैन्यमध्ये फणीव ।
संग्रामे सैन्यनाशो भवति भुवितले [b]त्वङ्गयुद्धे प्रहारस्
[c]तस्माद् युद्धे च सेके त्वभिबलपरिघो मन्त्रिणा[1] वेदितव्यः ॥ ३४ ॥

आद्यैः काद्यैः सवज्रैः स्वहृदय[2]कमले चन्द्रसूर्याग्निमूर्ध्नि
[d]ध्यात्वा श्रीकालचक्रं शशधरमदनाक्रान्तमालीढपादं ।
प्रज्ञा भर्त्रा हृदब्जे सरविशशिपुटैः स्व स्व वज्राङ्कुशेन
बुद्धानाकृष्य[3] देवी[e]रजसि समरसा न्यस्तसूत्रे च माध्याः ॥ ३५ ॥

सूत्रं वै ब्रह्मसूत्राद्रसनवतिरिदं दिग्विभागे प्रदेयं
सूत्रैरर्धाङ्गुलोक्ते भवति वसुयुगे मण्डलं गर्भमध्ये ।
गर्भाद् बाह्ये समस्तैः रचितमपि महामण्डलं द्वारसीम्नः
प्राकारांस्तोरणाद्यं शिखिचलवलयं दर्शयेद् बाह्यभूम्यां ॥ ३६ ॥

---

1. D. मन्त्रिणां
2. D. सुहृदय° ; raṅ gi sñiṅ gi'i padmar
3. D. बुद्धानां

a. t'ig ni gdab pa bsgrub par bya
b. mo'an ma'i 't'ab mo la ni bsnun pa'o
c. de p'yir ǵyul daṅ dbaṅ dag la yaṅ yoṅs 'joms šin tu stobs daṅ ldan par snags pas rig par bya
d. dpal ldan dus kyi 'k'or lo ri boṅ čan 'jin 'dod pa mnan pa'i ǵyaṅ brkyaṅ žabs ni bsgoms byas šiṅ
e. rdul c'on dag la ro mñam bkod čiṅ t'ig skud la yaṅ bsgom par bya

चक्रं वाब्जं हि भत्तुस्त्रिगुणमपि भवेद् देवताद्यासनानां
ब्रह्मस्थानेऽर्ककोष्ठैः पुनरपि शशिना स्तम्भवज्रावली स्यात् ।
बुद्धाद्यब्जं चतुर्भिः प्रभवति शशिना बाह्यवज्रावली च
देवी बुद्धान्तराले भवति घटकपालासनं वा त्रिकोष्ठैः ॥ ३७ ॥

[a]तत्रस्थानाद्रङ्गभूमि र्भवति दिनकरैश्च त्रिरेखं हि यावत्
दिक्कोणेष्वब्धिकोष्ठैः शशिरविकमलान्येव गन्धादिकानां ।
[b]सार्धैकेन त्रिरेखं त्वृतुभिरपि रसै द्वारनिर्यूहकाश्च
तद्वत् पक्षं कपोलं त्रिभिरपि च महावेदिकास्तम्भमर्धं ॥ ३८ ॥

[c]तस्यार्धेनेव काले र्भवति मणिमया पट्टिका हारभूमिः[1]
सस्तम्भं तोरणं स्यात्रिगुणितदशभि द्वारमूलादितश्च ।
सूत्रार्धं मूर्ध्निवर्ज्यं प्रभवति बकुलो चार्धहारावसाने
षट् कोष्ठै[2] स्तोरणाधो[3] वसुकमलयुता पट्टिका योगिनीनां ॥ ३९ ॥

तस्मात् श्रीरङ्गभूमौ रसगुणितयुगैः पञ्चरेखा हि यावत्
दिक्कोणेष्वर्कपद्मं द्विगुण[4] मनुदलं सूर्यकोष्ठैः प्रकुर्यात् ।
गर्भद्वारं द्विगुण्यं[5] त्रिविधगुणवशात् द्वारमप्यत्रबाह्यं
प्राकाराद्यं तथैव त्रिवलय[6] रचनां [d]त्र्यष्टकैश्च प्रकुर्यात् ॥ ४० ॥

---

1. CD. द्वार°
2. D. षट्कोणे
3. CLDV. °णार्धं ; rta babs 'og tu
4. CD. त्रिगुण° ; ñis 'gyur ma nu'i 'dab ldan
5. CD. त्रिगुण्यं ; ñis 'gyur
6. L. त्रिगुणवलय°

a. gnas de nas 'dir ji srid re k'a'i bar du ñin mor byed pa dag gis c'on gyi sar 'gyur te
b. p'yed dan bčas pa'i gčig gis re k'a gsum ste dus dan ro rnams kyis kyan sgo dan sgo k'yud dan
c. de nas p'yed dan gñis dan dus kyi nor bu'i ran bžin snam bu dan ni do šal sa ru 'gyur
d. brgyad pa gsum gyis rab tu bya

ᵃतेषामाद्यन्त[1]भागे रविशशिनिलयं बाह्यवज्रावली च
कुर्यात् कोष्ठैस्तदर्धैर्यदनिलवलये मण्डलान्ते च चक्रं ।
स्तम्भाधो मण्डलश्च प्रभवति फणिनां स्पन्दनं दैवतानां[3]
सूर्यश्च द्वारमध्ये नभसि भुवितले पूर्वभागेऽपरे च ॥ ४१ ॥

वज्राद्यैः पञ्चरत्नैः कनकमरकतैर्विद्रुमैर्मौक्तिकाद्यैः
सव्यैर्वा पञ्चभेदैर्बहुविधमणिभिः पिष्टरङ्गैस्तथैव ।
दिग्भागे रङ्गभूमौ भवति ᵇनृप रजःपातनं बुद्धभेदैः
पीतैः श्वेतारुणाद्यैः क्षितिजलवलये वह्निवाय्वोः क्रमेण ॥ ४२ ॥

पूर्वे श्रीकृष्णभूमिर्भवति रविनिभा दक्षिणे पश्चिमे च
हेमाभा चोत्तरेऽन्या शशधरधवला वज्रिणो वक्त्रभेदैः ।
श्वेता कृष्णा च रक्ता क्रमपरिरचिता पट्टिका हारभूमिः
पश्चानोन्द्वर्कवर्णैरमलशशिनिभा रक्तकृष्णा त्रिरेखा ॥ ४३ ॥

ᶜमध्ये पद्माष्टपत्रं हरितमणिनिभा स्तम्भवज्रावली स्यात्
ईशे दैत्येऽग्निवाय्वोः शशिरविवपुषौ कृष्णपीतौ क्रमेण ।
शङ्खो गण्डी ᵈमणिश्च क्रम इति च[3] तथा श्वेतकुम्भाष्टसन्धौ
ᵉचन्द्रो रक्ताब्जमूर्ध्नि प्रभवति दिनकृत्[4] श्वेतपद्मस्य चोर्ध्वं ॥ ४४ ॥

---

1. D. °माद्यं तु भागे
2. D. देवतीनां ; lha rnams šin rta ni
3. D. हि, C drops
4. CD. °प्रवरदिनसकृत् V. प्रवहति दिनकृत्

a. de dag rnams kyi t'og mt'a' č'a'i ñi zla'i dkyil 'k'or daṅ ni p'yi rol rdo rje'i p'reṅ ba yaṅ

b. mi yi bdag po saṅs rgyas dbye bas rdul c'on gdab par 'gyur

c. dbus su pa 'dma 'dab brgyad ljaṅ gu dag ste buṅ ba daṅ mc'uṅs ka ba rdo rje p'reṅ bar 'gyur

d. nor bu dag daṅ ljon pa žes bya

e. zla ba č'u skyes dmar po'i steṅ du rab tu 'gyur te ñin byed pa dma dkar po'i steṅ du yaṅ

रक्ताब्जे देवतानां भवति[a] शशधरश्चासनं कर्णिकायां
श्वेताब्जे कर्णिकायां [b]भवति दिनकरो देवतानाञ्च दिक्षु ।
बाह्ये वज्रावली स्याद् विभुकमलवशाद् वेदिका श्वेतवर्णा
पीतास्तम्भा हिमाभा प्रभवति बकुली तोरणं विश्ववर्णं ॥ ४५ ॥

श्वेताभा योगिनीनामपि वसुकमला पट्टिका सर्वदिक्षु
दिग्भागे रक्तपद्मं भवति जिनवशात् श्वेतपद्मं हि कोणे ।
चन्द्रादित्यै विहीनं द्विगुणमनुदलं चामराणां तथैव
खाद्या या पञ्चरेखाः[c] प्रकृतिगुणवशात्ताश्त्रिभागान्तरस्थाः ॥ ४६ ॥

स्तम्भाधो द्वारसन्धौ प्रभवति फणिनां मण्डलं मारुताद्यं
ऐशान्ये दैत्यकोणे क्षितिवलयगतौ चन्द्रसूर्यौ नरेन्द्र ।
बाह्ये द्वारोर्ध्वभागे समृगमपि भवेद् धर्मचक्रं घनाभं
सव्ये रक्तो घटः स्यात् सघनदवरुणे दुन्दुमि बोधिवृक्षः ॥ ४७ ॥

[d]घन्टादर्शाः पताकाः शशधरधवलास्तोरणा लम्बमाना
हारार्धः श्वेतवर्णो भवति कुलवशात् स्यन्दनो द्वारमध्ये ।
चक्रं श्वेतञ्च रक्तं स्वजिनकुलवशान् मारुते द्वारबाह्ये
वज्रज्वाला स्फुरद्भि र्भवति नरपते बाह्य वज्रावली च ॥ ४८ ॥

---

a. c̆'u skyes dmar po'i lte ba la ni lha mo rnams kyi

b. lha rnams kyi yaṅ ñin mor byed par 'gyur te p'yogs su'o

c. mk'a' sogs re k'ā lṅa po gaṅ yin

d. dril bu me loṅ ba dan ri boṅ 'jin pa ltar dkar rta babs rnams las 'p'yaṅ bar 'gyur pa daṅ

स्थूला व्याधिं करोति [a]प्रकटयति कृशा द्रव्यहानिं कुरेखा
छिन्ना मृत्युं च वक्रा सनृपजनपदोच्चाटनं तद्वदेव ।
[b]चिह्ने छिन्नेऽर्कचन्द्रे भवभयमथनी मन्त्रिणां नास्ति सिद्धिः
गोत्रच्छेदो विमिश्रे रजसि जिनकुले मण्डले वेदितव्यः ॥ ४९ ॥

यन्नोक्तं[1] तन्त्रमध्ये प्रकटमपि जिनैर्मण्डले तन् न देयं
चिह्नं शोभार्थहेतो जिनजनककुले मारचिह्नं तदेव ।
तस्मात् तन्त्रोक्तचिह्नं भवति कुलवशान् मण्डले द्वारसीम्नो
हाराधान्ते प्रकुर्यात् क्षितिवलयतले पद्मकुम्भादिशोभां ॥ ५० ॥

कृष्णादेः पादवृद्ध्या भवति च रजसः प्रोन्नतिर्वै यवैकात्
प्राकाराणां त्रिगुण्या दिनकरशशिनोरब्जरेखा[2] द्विगुण्याः ।
गर्भाद् बाह्ये द्विगुण्या भवति नरपते प्रोन्नतिर्मण्डलेऽस्मिन्
हाराधान्ते[3] यवैका क्षितिजलहुतभुग् वायुवज्रावलीषु ॥ ५१ ॥

[c]गर्भाद् द्वारादिसीम्नो भवति वसुमती मण्डले लोकधातोः
द्वारेभ्यश्चार्चिकान्तं त्रिगुणफणिपुरैः क्षाररत्नालयः स्यात् ।
तस्माज् जैनेन्द्रकोष्ठैरपि शिखिवलयं वायुरेवं ततः स्यात्
तद् बाह्ये तद्विशुद्ध्या क्षितिजलहुतभुग् मारुता दर्शनीयाः ॥ ५२

1. D. यन्त्रोक्तं
2. CD. वक्ररेखा ; ǒ'u skyes re k'ā ñis 'gyur ro
3. D. हाराधां ते ḍo šal p'yed pa'i mt'ar ni

a. p'ra daṅ re k'ā ṅan pas rjas ni ñams pa rab tu gsal bar byed
b. mc'an ma ñi ma zla ba č'ad na sṅags pa rnams la srid pa'i 'jigs pa 'joms pa'i dṅos grub med
c. sñiṅ po dbus nas ni sgo yi daṅ po'i mc'ams kyis nor ldan mar 'gyur 'jig rten k'ams kyi dkyil 'k'or la

ऊष्णीषं वक्त्रकण्ठं त्रिगुणफणिपुरे मण्डले शोधनीयं
[a]तस्मान् मेरुः समस्तस्त्रिगुणफणिपुरे मेदिनी यावदेव ।
[b]षट् षट् कोष्ठैः क्रमेण स्फुटमहिभुवनं सप्तपातालमेव
एवं भूम्यादि सर्वं पुनरपि च तथा शोधनीयं स्वदेहे ॥ ५३ ॥

द्व्यब्ध्येकाब्ध्येकसूर्य ऋतुरसशिखिनोऽन्यर्धकालार्धकालैः
कालैः कालप्रभिन्ने ऋतुभिरपि रसै र्दोषभागैः क्रमेण ।
[c]गर्भाद् वा कर्णिका चाब्जदलमपि ततः स्तम्भवज्रावली च
पद्मं वज्रावली स्यात् क्षितिरपि च ततो द्वार निर्यूहकाद्यं ॥ ५४ ॥

स्तम्भाः प्राकारवेद्यः पुनरपि च ततः पट्टिका हारभूमिः
आदर्शः क्ष्मा च पट्टो भवति नरपते तोरणं प्रोक्तभागैः ।
बाह्ये द्वारादि सर्वं द्विगुणमपि भवेत् तद् द्विगुणयश्च बाह्ये
बाह्ये पद्मानि चक्राण्यपि च दिनकरैः स्यन्दनं मण्डलानि ॥ ५५ ॥

ओँकारज्ञानजाते जिनवरकमले चन्द्रसूर्यासनोर्ध्वं
आद्यैः काद्यैः सशून्यैस्त्रिभुवनजननी मातृका स्थापनीया ।
[d]शून्येऽकारे विसर्गे स्वररहितपरे कायवाक्चित्तवज्रं
सम्भूतं मन्त्रयोनि परमसुखकरं ज्ञानवज्रं चतुर्थं ॥ ५६ ॥

---

1. D. कर्णिकाब्दाब्ज°

a. de nas lhun po mt'a' dag sum 'gyur gdens čan re mig dag gis sa ni ji srid ñid du ste

b. re mig drug drug dag gis rim pas gsal bar klu yi srid pa dan ni sa 'og bdun po ñid

c. sñin por lte roibs sam pa dma'i 'dab ma dag dan de nas ka ba rdo rje'i p'ren ba yan

d. ston pa a yig rnam par bčad pa dbyans dan bral ba mč'og las sku gsun t'ugs kyi rdo rje ni

[a]हूंकारो[1] विश्ववर्णो जिनपतिकमले चन्द्रसूर्याग्निमूर्ध्नि
दिक्पत्रेष्वादिशून्यं विदिशि च दलके ह्यादिशून्यं चतुर्धा ।
ईशे नैरृत्यकोणे शिखिनि च पवने कायवाक्चित्तरागं
ह्योकाराद्यं घटानां भवति च दशकं हं ह इत्यत्र चान्ते ॥ ५७ ॥

पूर्वाब्जोर्ध्वे त्विकारः शिखिकमलगतो दीर्घ ईकार एव
याम्ये दैत्ये त्वृकारो धनदहरगतो ह्रस्वदीर्घौ ह्युकारो ।
वारुण्ये बाह्यकोणेऽपि च कमलगतौ ह्रस्वदीर्घाव्लिकारौ[2]
कृष्णौ रक्तौ च शुक्लौ वरकनकनिभौ वक्त्रभेदेन देयौ ॥ ५८ ॥

पूर्वद्वारस्य सव्ये शिखिकमलगतौ ह्रस्वदीर्घौ तथैव
[b]तद्वद्वाकारयुग्मं यमदनुकगतं पश्चिमेऽलृकारयुग्मं ।
ओ औ यक्षे च रुद्रे सुरवरुण[3]यमद्वार वामे सयक्षे
अं अः श्चाद्याः क्रमेण त्वपि च यरवला द्वारपद्मे स्वरादौ ॥ ५९ ॥

पूर्वद्वारेऽवसव्ये भवति शशधरश्चासनं कोष्ठयोश्च
सूर्यः सव्येऽपरे च प्रभवति कमलेष्वासनञ्च द्वयोश्च ।
प्रज्ञोपायप्रभेदे भवति हि कमलं चन्द्रसूर्यासनं च
सव्ये पृष्ठे रविः स्यात् सुरपतिधनदे चन्द्रमेवासनं स्यात् ॥ ६० ॥

---

1. D. हुंकारो
2. D. दीर्घावृकारौ ; t'uṅ ṅu riṅ po dag gi li yig ste
3. D. स्वरवरुण° ; lha č'u gšin rje...

a. rgyal pa'i bdag po'i pad ma sna ts'ogs mdog la zla ba ñi ma me yi steṅ du hūṁ yig ste

b de bžin ar yig zuṅ ni gšin rje lha min dag tu gnas te nub tu al yig zuṅ dag go

बिन्द्वाकारे विभिन्नं खलु कमलगतं कादि वर्गाक्षरञ्च
[a]कन्दे नाले दले च क्रमपरिरचितं केशरे कर्णिकायां।
भूम्याद्यं चाम्बरान्तं[1] क ख ग घ ङ इति ह्रस्वदीर्घः स्वभूमौ
बिन्दुश्चन्द्रो विसर्गो भवति दिनकरश्चासनं कर्णिकोर्ध्वं ॥ ६१ ॥

यद्वर्गाः ह्रस्वदीर्घाः प्रकृतिगुणवशाद् वेदिका स्तम्भपार्श्वे
गन्धादीनां क्रमेण स्वकुलभुविगताः पूर्वभागात् स्वदिक्षु।
बाह्ये बिन्द्वादिभिन्नास्त्रिगुणितरविभि र्वेदिकायां तथैव
सर्वेच्छानां[2] समन्तात् स्वकुलदिनगता वर्णभेदे र्जिनानां ॥ ६२ ॥

ह्रस्वौ दीर्घौ हकारौ सुरधनदपरे दक्षिणे चर्चिकादेः
वैष्णव्यादेः क्षकारः शिखिहरपवने आदिभिन्नश्च[3] दैत्ये।
ह्याद्याः क्षाद्यष्टसंख्याः[4] कमलदलगताः पूर्वपृष्ठे[5]स्वदिक्षु
याद्याः षट्ह्रस्वदीर्घाः सुरकमल[6]दले वह्निपद्मे क्रमेण ॥ ६३ ॥

[b]एवं याम्ये च राद्या दनुकमलदले ह्रस्वदीर्घप्रभेदैः
यक्षे रुद्रे च वाद्याः[7] सजलधिपवने पद्मपत्रे च लाद्याः।
पूर्वद्वारस्य सव्ये कमलदलगतो [c]मातृभिन्नश्चवर्गः
ह्रस्वा दैत्यस्य दीर्घो भवति च पवनस्याग्निकोणे स्थितस्य। ६४ ॥

---

1. D. चास्वरानां, nam mk'a'i mt'ar ni
2. CD. सर्वेब्जानां, 'dod ma t'ams cad
3. C. खादि° D. क्षादि°, a sogs kyis p'ye me dan
4. P. क्ष्माद्यष्ट° D. क्षाद्यास्तु
5. CDP. °पृष्ठेऽष्ट दिक्षु, mdun rgyab ran p'yogs su
6. LD. स्वर°
7. D. राद्याः, gnod sbyin drag por wa la sogs dan

a. rca ba sdon bu 'dab ma dan ni ge sar lte ba dag la rim pas yons su bkod pa ste
b. de bžin gšin rje lha min pa dma'i 'dab mar t'un nu rin po'i rab tu dbye bas ra sogs te
c. dbyans kyis p'ye ba ca yi ste

[a]एवं याम्ये टवर्गः शिखिरसमुखयो र्ह्रस्वदीर्घप्रभेदैः
वामे चेशे पवर्गो भवति जलनिधि दीर्घभेदै र्गणस्य[1] ।
शक्रस्य ब्रह्मणो वै सवरुणपवने ह्रस्वदीर्घ[2]स्तवर्गः
पूर्वद्वारस्य वामे भवति दनुरिपोः पद्मपत्रे कवर्गः ॥ ६५ ॥

ह्रस्वो दीर्घश्च सव्ये भवति नृप यमस्योत्तरे पश्चिमे च
ह्रस्वो दीर्घः सवर्गो भवति पशुपते र्जम्भलस्यैव राजन् ।
[b]दैत्यादीनां[3] स्वबीजं भवति न च दले स्व स्व वर्गान्तमध्यं
अष्टा[c]विंशत्स्वपत्रेष्वपि दिवसवशात् स्व स्व वर्गाक्षराणि ॥ ६६ ॥

यारावालाश्च हंहाः खलु षडपि रथेषूर्ध्वमूले सुरादौ[4]
द्वारात् सव्यावसव्ये प्रभवति फणिनां [c]यादिरूढो हकारः ।
[d]षड्वर्गाः कूटरूपास्त्वपि ह य र व लाः क्षादियुक्ताश्च याद्याः
दिक्चक्रे कादिवर्गाश्चलवलयगता[e]श्चादयोऽन्येऽनुलोमाः ॥ ६७ ॥

पूर्वे याम्येऽवसव्ये वरुणहविदनौ चेशवायौ क्रमेण
अं अश्चन्द्रार्कयो र्वै चितिभुवनगता भूतवृन्दस्य मन्त्राः ।
हूंकारो धर्मचक्रस्य च भवति [f]तथाः-कारबीजं घटस्य
ओंकारो दुन्दुभेः स्यात् [g]प्रभवति वरुणं बोधिवृक्षस्य होश्च ॥ ६८ ॥

---

1. C. कुलस्य, č'u gter dan ni rin po'i dbye bas c'ogs kyi'o
2. D. °दीर्घस्तु वर्गः, t'un nu rin po ta yi sde pa'o
3. CD. दैत्यानां स्व स्व बीजं
4. D. स्वरादौ, šin rta dag la sten dan rca ba lha sogs su

a. de bžin gšin rjer me dan ro yi gdon pa dag gi ṭa sde t'un dan rin po'i rab dbye yis
b. lha min la sogs rnams kyi ran gi sa bon du 'gyur 'dab ma la min ran ran sde pa'i mt'a' dan dbus
c. ya sogs la gnas ha yig dag tu rab tu 'gyur
d. sde drug brcegs pa'i gzugs dan slar yan ha ya ra wa la dan kṣa sogs ldan pa'i ya sogs ni
e. ca sogs gzan la lugs mt'un te
f. āḥ yig bum pa'i sa bon dag tu 'gyur
g. č'u ru ho yan byan č'ub šin dag gir ni rab tu 'gyur

[a]इत्येवं मातृकाया भवति कुलवशात् मण्डले मन्त्रभेदो
मुद्राचिह्नानि वर्णो भवति हि सकलं वज्रिणा वक्त्रभेदैः ।
कुण्डे होमश्च तद्वद् भवति च पुनरावाहनं तीर्थिकानां
श्रीभूम्यां प्रोक्षणं चार्घविधिरपि तथा [b]मारनिर्घाटनञ्च ॥ ६९ ॥

द्वाराणां रक्षणार्थं व्रतनियमयुताः शुद्धशिष्याः प्रदेया
योगिन्यः श्रीघटानां शिखिदनुपवने चेशकोणे क्रमेण ।
आचार्यः श्रीगणेशो भवति नरपते कर्मवज्री प्रहृत्य
शिष्याभावे गणेशः स्वयमपि कुरुते होमकर्मादिकञ्च ॥ ७० ॥

वृत्तं वा वेदकोणं भवति कुलवशात् शान्तिपुष्ट्योश्च कुण्डं
वामे वा रुद्रकोणेऽपि च धवलमहो मूलपद्मं द्विगुण्यं ।
[c]खानिः पद्मप्रमाणा भवति तदुदरे मूलपद्मं न चिह्नं
पद्मार्धं पद्मबाह्ये सघटमपि भवेत् खड्गरत्नादिचिह्नं ॥ ७१ ॥

[d]तस्यार्धेनापि चोष्ठं द्विगुणमपि ततो वेदिका यामभागः
ओष्ठार्धेनोच्छ्रिता[e] वै प्रभवति नियता मूर्ध्नि वज्रावली च ।
बाह्येऽधः पद्मपत्राण्यपि कुशरचनां सर्वदिक्षु प्रकुर्यात्
तस्यान्ते पश्चिमेन प्रभवति नियतं द्वारमेकं त्रिरेखं ॥ ७२ ॥

---

a. žes pa de ltar dbyaṅs ldan rnams ni rigs kyi dbaṅ gis dkyil 'k'or dag la sṅags kyi dbye bar 'gyur

b. bdud ni gžom pa dag kyaṅ ṅo

c. zabs ni pa dma'i c'ad du 'gyur te de yi naṅ du rca ba'i pa dma mc'an mar bcas pa'o

d. de yi p'yed kyis kyaṅ ni mc'u ste de las-ñis 'gyur dag kyaṅ k'a k'yer dag gi rgya yi c'a

e. mc'u yi p'yed kyis dpaṅs dag tu ni

आचार्यस्यासनं वै खलु भवति समं गर्भपश्चाद् द्विगुण्यं
वामे चार्घासनं स्याद् भवति नरपते होमपात्रस्य सव्ये ।
सर्वेषां वज्रचिह्नं भवति जिनपते वा खपद्मं हि मातुः
वक्त्रं गुह्यञ्च कुण्डं द्विविधमपि भवेद् बाह्यदेहे च राजन् ॥ ७३ ॥

कृत्वा कुण्डस्य रक्षां दशदिशिवलये क्रोधराजैः सदेव्यैः[1]
श्रीवज्रैः प्रोक्षणाद्यं ससलिलकुसुमैरर्घमेवानलस्य ।
देयं तद्योगयुक्तैः स्वहृदयकमले भावयित्वेन्दु[2]मूर्ध्नि
"एकास्यं श्वेतवर्णं युगकरकमले कुण्डिकाब्जं हि वामे ॥ ७४ ॥

सव्ये दण्डाक्षसूत्रं सुकपिलजटिलं पिङ्गनेत्रं सवस्त्रं
"वह्निं हृच्चन्द्रमूर्ध्नि स्फुरदमलकरं भावयेद्योऽङ्कुशं वै ।
तेनाकृष्टं स्वदेहे कुरुष्व समरसं सर्वगं ज्ञानसत्त्वं
एवं कुण्डे च सम्यग् भवति नृप तथावाहनं पावकस्य ॥ ७५ ॥

अङ्गुष्ठेन प्रकुर्यादपि वरदकरे होममग्ने मुखे च
"वज्रैरङ्गैश्च भक्तः शरशतसमिधान्[3] शस्यदूर्वाज्यदुग्धैः ।
पर्यङ्कस्थः प्रशान्तस्त्ववचपलहृदयो मन्त्रविन् मन्त्रमूर्तिः
आचार्यः कर्मवज्री पुनरपि शिखिने चाहुतिं वै ददाति ॥ ७६ ॥

1. D. सदेव्ये
2. D. भावयेत्त्वेन्दु°
3. D. °समिधात्

a. žal gčig k'a dog dkar po dus kyi p'yag gi pa dma gyon na ril ba č'u skyes dag dañ ni

b. me yi sñiñ k'ar zla ba'i steñ du dri med 'p'ro byed jab las lčags kyu ñes par bsgom par bya

c. gos bo'i rdo rje yan lag gis kyañ mda' brgya'i yam šiñ 'bru dañ d ūr ba mar dañ 'o ma yis

होमं कृत्वा क्रमेणाचमनमपि तथा पावकस्यात्मनश्च
दत्वा गन्धादिधूपं स्वहृदयकमले ज्ञानवह्निं विसर्ज्य ।
पश्चात् शिष्यस्य सेकं सकलगुणनिधिः श्रीगुरुर्वै ददाति
आदौ पञ्चामृतं वै जिनवरकुलिशाधिष्ठितं शुद्धिहेतोः ॥ ७७ ॥

सिद्धे होमे स्वमन्त्रैः रजसि च पतिते मन्त्रचिह्ने प्रदत्ते
कोणे संस्थापनीयाः स्फटिकसितघटा वेष्टिताः पञ्चसूत्रैः ।
आचार्यः पूर्ववक्त्रैः कुलिशकमलजैर्हृद्गतैः क्रोधराजैः
[a]आकृष्ट्वा ज्ञानचक्रं रजसि समरसं सेकहेतोः करोति ॥ ७८ ॥

सर्वेषां नामपूर्वं प्रणव इति भवेद् देवतादेवतानां[1]
होमे स्वाहान्तमन्त्रो हृदयमपि तथैवार्चने वै नमोऽन्तः ।
जं हूं वं होः-ङ्कुशाद्याः क्रमपरिरचितावाहने च प्रवेशे
बन्धे तोषेऽर्घदाने भवति[b] पुनरिदं गृह्ण गृह्णार्घकं मे ॥ ७९ ॥

पुष्टौ स्वाहान्तमन्त्रो भवति नरपते शान्तिकेऽसौ नमोऽन्तः
आकृष्टौ वौषडन्तो भवति च वषडन्तश्च वश्ये तथैव ।
[c]हूंकारान्तोऽभिचारे प्रकृतिगुणवशात् कीलनाद्ये फडन्तः
श्वेतो रक्तश्च कृष्णो वरकनकनिभः कर्मभेदेश्च मन्त्रः ॥ ८० ॥

---

1. CLDV. देवती°

a. spyan drańs nas ni ye šes 'k'or lo rdul c'on dag la ro mñam du bya dbań gi don du'o

b. mñes la'o mc'od yon sbyiń pa la yań

c. hūṃ yig mt'a' čan la ste rań bžin yon tan dbań gis p'aṭ mt'a' p'ur bus gdab sogs la'o

पूर्वे श्रीचित्तवज्रं कषणघननिभं चोत्तरे कायवज्रं
वाग्वज्रं दक्षिणे च स्वकुलदिशिगतं पश्चिमे ज्ञानवज्रं ।
श्वेतं रक्तं च पीतं भवति कुलवशाद्व्यापकं भूमिभागे
वाय्वग्न्यम्बुक्षितीनां इ ऋ उ ऌ नृपते योनयो देवतानां ॥ ८१ ॥

ओँ आः हूं च त्रिमुद्राः स्वाहापदसहिता दीर्घभेदाच्च पञ्च
हूं आः ओं होः स्ववक्त्राण्यपरमपि तथाऽनाहतं पञ्चमं स्यात् ।
ᵃसाद्यं ह्लंकार[1]षट्कं भवति रसपदैः श्रीषडङ्गं नमाद्यैः
फेंकारो[2] विश्वमातुर्भवति दशविधः कूटमन्त्रो जिनस्य ॥ ८२ ॥

ᵇहूंकारो ज्ञानबीजं हृदयमपि महाकूट[3]मन्त्रः सवक्त्रः
हूंकाराद्यं षडङ्गं ह्युपहृदयमिदं कायवज्रादियुक्तं ।
मालामन्त्रस्तथान्यो भवति बहुविधः कर्मभेदैरनेकैः
ज्ञातव्यो मण्डलेऽस्मिन् प्रकृतिगुणवशाद् देवतादेवतीनां[4] ॥ ८३ ॥

रत्नैर्हेमेन्दुपुष्पैर्बहुविविधपटैर्गन्धधूपप्रदीपैः
घण्टादर्शैर्वितानैर्विविधफलपताकादिभिर्नृत्यवाद्यैः ।
कृत्वा पूजां विचित्रमपरदशविधां चात्मशक्त्या यथोक्तां
आचार्यस्यांघ्रिमूले ददति वरसुतो दक्षिणां शुद्धिहेतोः ॥ ८४ ॥

---

1. D. हूं
2. CD. फेंकारो
3. CD. °मन्त्राः सवक्त्राः
4. CD. °देवतीनाम्

a sogs daṅ bčas hraṃ yig drug ste ro rkaṅ na maḥ sogs kyi dpal ldan yan lag drug tu 'gyur

b. hūm yig ye šes sa bon sñiṅ pa dag kyaṅ brcegs pa č'en poi' sṅags ni žal daṅ bčas pa ste.

[a]दत्त्वात्मानं त्रिशुद्ध्या सुतदुहितरं कन्यकां गोत्रजान्यां
अद्यैवाहं जिनानां शरणमधिगतो रौद्रसंसारभीतः ।
युष्मत्पादाब्जयो वै भवभयहरयोः कायवाक्चित्तशुद्ध्या
इत्यभ्यर्थ्या गुरुः स्यात् सकनककुसुमं मण्डलं कारयित्वा ॥ ८५ ॥

वज्रं घन्टाञ्च मुद्रां गुरुमपि शिरसा धारयामीष्टवज्रे
दानं दास्यामि रत्ने जिनवरसमयं पालयाम्यत्र चक्रे ।
पूजां खड्गे करोमि स्फुटजलजकुले सम्वरं पालयामि
सत्त्वानां मोक्षहेतोः जिनजनककुले बोधिमुत्पादयामि ॥ ८६ ॥

स्नातो गन्धानुलिप्तो व्रतनियमयुतः पूर्वभूम्यां निवेश्य
सिद्धार्थं दण्डकाष्ठं जिनवरकुलिशैश्चाभिमन्त्र्य प्रदेयं ।
जिह्वायां चामृतं वै जिनवरसमये धर्ममावेशनार्थं
[b]मन्त्रं हूंकारमेकं त्वरलपि सहितं चोदनं क्रोधभर्तुः ॥ ८७ ॥

आविष्टः क्रोधराजः प्रहरणसुकरैस्तर्जयन् मारवृन्दं
प्रत्यालीढादिपादै बहुविधकरणैर्नृत्यते वज्रनृत्यं ।
हास्यं हूंकारमिश्रं भयदमपि रिपो वज्रगीतं करोति
निर्लज्जो निर्विशङ्को भवति गुणवशाद् देवतान्या च सौम्या ॥ ८८ ॥

---

a. dag pa gsum gyi rjes daṅ bdag ñid bu daṅ bu mo daṅ bčas rigs las skyes pa'i gzon nu ma

b. sṅags ni hūṁ gi yi ge gčig ste a ra la daṅ bčas pa k'ro bo'i gco bo bskul ba'o

कायावेशेन योगी प्रकृतिगुणवशात् कायकृत्यं करोति
[a]वागावेशेन वादी भवती च विजयी[1] देवभूतासुराणां।
चित्तावेशेन सर्वं परहृदयगतं ज्ञायते भूतभव्यं
[b]ज्ञानावेशेन बुद्धो भवति गुरुगुरु[2]श्चर्धिमानेव शास्ता॥ ८९॥

[c]भूम्यावेशेन योगी भवति गिरिसमोऽम्बोश्च शीतं प्रयाति
वह्न्यावेशेन दाहं व्रजति च मरुताशोषमेवं प्रयाति।
शून्यावेशैरदृश्यो भवति भुवितले खेचरत्वं प्रयाति
एवं रूपादिसर्वं प्रकृतिगुणवशाद् वेदितव्यं क्रमेण॥ ९०॥

आवेशो मन्त्रीणां वै भवति नरपते भावनाया बलेन
सेवाभेदैः कदाचिद् बहुविवसमये मंन्त्रजापादिभिश्च।
बुद्धैरास्वाद्यमानैः क्वचिदमृतवशान् मण्डले भव्यसूनो-
[d]र्न स्वाधिष्ठाने[3] हीना बहुविविधभवे मन्त्रिणां सिद्धिरस्ति॥ ९१॥

त्यक्तावेशस्य पश्चात् शिरसि च हृदये मूर्ध्नि नाभौ च कण्ठे
[e]गुह्ये रक्षां जिनैश्च[4] स्वकुलभुविगतैः कारयेत् स्वत्रिवज्रैः।
दत्ताङ्गे पीतवस्त्रस्य विहितनयनस्यात्र शिष्यस्य वेशः
संवृत्यर्थं व्रतानि प्रवरगतिगतान्येव देयानि तानि॥ ९२॥

---

1. CD. विषयी
2. CD. सुरगुरु
3. CD. न स्वाधिष्ठानेन
4. CD. जिनाद्यैः

a. gsuṅ p'ebs pas ni lha daṅ 'byuṅ po lha min rnams las rnam par rgyal ba'i smra ba bo ru 'gyur

b. ye ses p'ebs pas saṅs rgyas bla ma yi yaṅ bla ma rju 'p'rul ldan pa'i ston pa gcig pur 'gyur

c. sa p'ebs pas ni rnal 'byor pa dag ri daṅ mo'uṅs par 'gyur te č'us kyaṅ bsil bar rab tu 'gyur

d. raṅ byin brlabs pas dman pa rnam maṅ srid pa dag gis bsṅags pa rnams la dṅos grub yod pa min

e. gsaṅ bar rgyal ba daṅ ni raṅ gi rigs kyi sar gnas raṅ gi rdo rje gsum gyis bsruṅ bar bya

हिंसासत्यं परस्त्री त्यजस्व परधनं मद्यपानं तथैव
संसारे वज्रपाशः स्वकुशलनिधनं पापमेतानि पञ्च ।
यो यत्काले बभूव त्रिदशनरगुरुस्तस्य नाम्ना प्रदेया
एषाज्ञा विश्वभर्तु र्भवभयमथनी पालनीया त्वयापि ॥ ६३ ॥

द्यूतं सावद्यभोज्यं कुवचनपठनं भूतदैत्येन्द्रधर्म
गोबालस्त्रीनराणां त्रिदशनरगुरोः पञ्चहत्यां न कुर्यात् ।
द्रोहं मित्रप्रभूनां[1] त्रिदशनरगुरोः संघविश्वासिनाञ्च[2]
[a]आसक्तिस्त्विन्द्रियाणामिति भुवनपते पञ्चविशुद्धतानि ॥ ६४ ॥

श्रीमन्त्रेणाभिमन्त्र्य[3] करकमलपुटे पुष्पमेकं प्रदेयं
[b]आदौ भ्राम्य[4] त्रिवारान् करकमलपुटान् मण्डले पुष्पमोक्षः ।
यस्मिन् स्थाने सुपुष्पं पतति नरपते तत्कुलं तस्य नूनं
पश्चात् सप्ताभिषेकस्त्रिविध इह यथानुत्तरः[5] संप्रदेयः ॥ ६५ ॥

[c]नागै राजन् चतुर्भि र्मणिकनकघटै[6] र्मृण्मयै र्वा सरत्नैः
ओषध्या गन्धयुक्तै र्जयविजयघटैः स्नापयेद् दैवतीनां[7] ।
मौलिं बुद्धप्रभेदै र्ददति[8] वरगुरुः शक्तिभिः पट्टमेव
वज्रं घण्टार्कचन्द्राद् व्रतमपि विषयैः सेन्द्रियै[9] र्योजनीयं ॥ ६६ ॥

---

1. P[1]. द्रोहं मित्रं°
2. CD. °विश्वासन°
3. CD. °मन्त्रया
4. CD. भ्रम्य
5. CD. तथा° ; ji bžin
6. P[1]. कनकमयै°
7. CD. °देवतानां ; lha mo rnams kyis k'rus bya'o
8. CD. °दशति ; sans rgyas rab tu dbye bas čod pan sbyin te
9. CDP. स्वेन्द्रियै° ; dban por bčas pa'i

a. dban po rnams ni č'ags pa dag dan de 'tar srid pa'i bdag po dag gi brtul žugs ni šu lna
b. dan por lan gsum bskor te lag pa'i pa dma sbyar ba dag las dkyil 'k'or du ni me tog dor
c. klu dan bži yi nor bu gser gyi bum pa dag gam rgyal po sa yi ran bžin rin č'en bčas

[a]क्रोधे मैत्र्यादिनाम स्फुट जिनपतिनाज्ञा[1] प्रदेया समात्रा
वज्रं घण्टां प्रदाय प्रवरकरुणया देशयेच्छुद्धधर्मं ।
कुर्यात् प्राणातिपातं खलु कुलिशकुलेऽसत्यवाक्यञ्च खड्गे
रत्ने[2] हार्यं परस्वं वरकमलकुलेऽप्येव हार्या परस्त्री ॥ ९७ ॥

मद्यं दोपाश्च बुद्धाः सुसकलविषयाः सेवनीयाश्च चक्रे
डाम्ब्याद्याः कर्त्तिकायां सुसकलवनिता नावमन्याः खपद्मे ।
देयाः सत्त्वार्थहेतोः सघनतनुरियं न त्वया रक्षणीया
बुद्धत्वं नान्यथा वै भवति कुलसुता[3]नन्तकल्पै जिनोक्तं ॥ ९८

तोयं तारादिदेव्यो मुकुट इह जिनाः शक्तयो वीरपट्टः
वज्रं घण्टार्कचन्द्रौ व्रतमपि [b]विषया नाममैत्र्यादियोगः ।
आज्ञासम्बोधिलक्ष्मी र्भवभयमथनो [c]कालचक्रानुविद्धा
एते सप्ताभिषेकाः कलुषमलहरा मण्डले सम्प्रदेयाः ॥ ९९ ॥

सिक्तः सप्ताभिषेकै र्व्रजति शुभवशात् सप्तभूमीश्वरत्वं
[d]भूयोऽवैवर्त्तिकायां प्रविशति नियतं कुम्भगुह्याभिषिक्ताः ।
प्रज्ञाज्ञानाभिषिक्तो भवभयमथनं मञ्जुघोषत्वमेति
मूलापत्तिं कदाचिद् व्रजति शठवशान्नारकं दुःखमेतत्[4] ॥ १०० ।

---

1. CLD. °निजपति°
2. C. रत्नहार्यं ; rin c'en la ni
3. CD. कुशलता° ; rigs kyi bu kye sańs rgyas ñid du 'gyur pa
4. CD. °मेति ; 'di dag sdug bsńal lo

a. k'ro bo rnams kyis byams sogs miń ste gsal bar rgyal ba'i bdag pos rjes gnań 'dogs bčas rab tu sbyin
b. yul te miń ni byams sogs sbyor ba'o
c. dus kyi 'k'or lo rjes su rig pa ste
d. bum pa gsań bas mńon par dbań bskur slar yań p'yir mi ldog pa sogs su ńes par rab tu 'jug

मूलापत्ते विशुद्धि र्भवति हि गुणिनः सप्तसेके स्थितस्य
कुम्भे गुह्ये कदाचिद् व्रतनियमवशादुत्तरे नास्ति शुद्धिः ।
मूलापत्तिं गतो यो विशति पुनरिदं मण्डलं सिद्धिहेतो-
राज्ञां लब्ध्वा हि भूयो व्रजति गणकुले [a]ज्येष्ठनामा लघुत्वं ॥ १०१ ॥

मूलापत्तिः सुतानां भवति शशधरा श्रीगुरोश्चित्तखेदात्
तस्याज्ञां[1] लंघनेऽन्या भवति खलु तथा भ्रातृकोपात् तृतीया ।
मैत्रीत्यागाच्चतुर्थी भवति पुनरिषु र्बोधिचित्तप्रणाशात्
षष्ठी सिद्धान्तनिन्दा गिरिरपि च नरेऽयाचिते गुह्यदानात् ॥ १०२ ॥

स्कन्धक्लेशादहिः स्यात् पुनरपि नवमी शुद्धधर्मेऽरुचि र्या
माया मैत्री च नामादिरहितसुखदे कल्पना दिक् च रुद्रा ।
शुद्धे सत्त्वे प्रदोषाद् रविरपि समये लब्धके त्यागतोऽन्या
सर्वस्त्रीणां जुगुप्सा खलु भवति मनु र्वज्रयाने स्थितानां ॥ १०३ ॥

[c]नागै राजन् चतुर्भि र्मणिकनकघटै र्मृण्मयै र्वा सरत्नैर्
ओषध्या गन्धयुक्तै र्जयविजयघटैः [d]स्नापयेत् पीठमध्ये ।
नागैः श्रीमौलिबद्धे वसुदलकमले पट्टबद्धे[2] चतुर्भिः
मुद्रायां श्रीघटेनात्र कमलरहितं पञ्चरेखं विवर्ज्य ॥ १०४ ॥

---

1. CD तस्याज्ञानं घनेऽन्या ; de yi bka' la 'goṅs pas

2. CD. पट्टमध्ये ; dpyaṅs bčiṅ bar'bya

a. t'u bo'i miṅ ni č'uṅ ba ñid du 'gyur gžan du 'gyur te

b. dag pa'i sems čan dag la skyon brjod pa las ñi ma'o dam c'ig t'ob pa gtoṅ ba las kyaṅ gžan

c. This is identical with the first quarter of verse 96

d. gdan gyi dbus su k'rus bya ste

आदौ चोपासको वै भवति हि सलिले श्रामणेरो घटे स्यात्
भिक्षु गुह्याभिषेके स्थविर इति भवेदुत्तरे कारणे च ।
मुद्रां पट्टश्च मौलिं ददति वरगुरु र्वज्रयज्ञोपवीतं
तेषामाचार्यहेतोः स्वजिनकुलवशादेव[1] मुद्रां विशुद्धां ॥ १०५ ॥

ऊर्ध्वे दत्त्वा वितानं क्षितितलनिलये वै त्रिरेखं समन्तात्
तासां कोणे सतो या मणिकनकघटाः सूत्रिताः पद्मवक्त्राः ।
शंखाद्ये हेमपात्रे त्वथ रजतमये साधयेद् गन्धतोयं
[a]गर्भे पीठं प्रदाय स्फुटकनकमयं स्नानमारम्भयेत् तत् ॥ १०६ ॥

पुष्पाद्ये गन्धतैले रविशिखिपचिते[2] र्देवताभ्यङ्गनीया[b]
चूर्णैरुद्वर्तयित्वा[c] मधुघृतदधिभिः[3] स्नापयेत् क्षीरतोयैः ।
सिद्धार्थैश्च प्रदीपै र्वरविविधफलैरत्र निर्मञ्छयित्वा[4]
तत्स्थानाच्चालनीया तनुरपि पिहिता रक्तवस्त्रेण सम्यक् ॥ १०७

कृत्वा श्रीमण्डलान्ते सममहिनिलये पञ्चरेखा जिनांशै-
र्मध्ये पद्माष्टपत्रं स्वकुलदिशिगतै र्भूषितं पञ्चचिह्नैः ।
[d]तन्मध्ये स्थापनीयाऽपरमुखकमला देवता देवती वा
चैत्याद्यं वा पट इति तथा संमुखस्तस्य मन्त्री ॥ १०८ ॥

---

1. CD. °द्देवमुद्रां ; p'yag rgya rnam par dag pa ñid
2. CD. °पतितै° ; smin pa dag gis
3. P[1]. घृतमधु°
4. CD. निर्मञ्छयित्वा ; ṅes par byabs nas ni

a. sñiṅ por gser gi raṅ bžin gsal ba'i gdan dag rab tu bkod de de la k'rus ni brcam par bya
b. lha la byug par bya
c. p'ye ma rnams kyis dril p'yis byas nas
d. de yi dbus su gžag par bya ba žal gyi pa dma nub tu p'yogs pa'i lha daṅ lha mo 'am

कृत्वा शून्यस्वभावं जिनवरसहितं कायवाक्चित्तवज्रं
पश्चात् पूर्वोक्तयोगैः [a]शशिरविपविजं भावयेत् कालचक्रं ।
[b]विद्यादेव्यादिबुद्धानलिकलिकुलजान् स्व स्व बीजैश्च जातान्
हृत्कण्ठे नाभिगुह्ये शिरसि [c]कुलवशाद् भावयेन् मूर्ध्निचक्रे ॥ १०६ ॥

एवं वै भावनीया [d]पुनरपि सकला देवतायाश्च काये
आकृष्य ज्ञानसत्त्वं त्वभव[1]भवसमं क्रोधराजैः स्वकाये ।
वेशं बन्धश्च तोषं[2] समरसकरणं देवतायाश्च कुर्यात्
आचार्येणैव तस्मात् प्रकटितवदना देवता वन्दनीया ॥ ११० ॥

यद् बीजं ह्यादिकादौ स्वकुलगुणगतं देवतादेवतीनां
हृन्मध्ये तत् स्वबीजं शशिरविपुटगं[3] कायवाक्चित्तयुक्तं[4] ।
द्वात्रिंशल्लक्षणाङ्गैः[5] सकलतनुगतैर्व्यञ्जनैः खाष्टभिश्च[6]
[e]वर्णैर्भिन्नं तदेव प्रकटदलदलेपुस्तकानाञ्च[7] भाव्यं ॥ १११ ॥

श्रीचक्रं चैत्यगर्भे पविमणिकमलं चासिरेवोत्तरेण
हूंकारं ह्यक्षसूत्रे मणिपरिगणना लक्षणं व्यञ्जनानि ।
घण्टाकाये स्वराश्च[8] त्रिगुणितदशकाः कादिवर्गाश्च वज्रे
ते वै यज्ञोपवीते[9] दशगुणितवसु व्यञ्जनान्युत्तरीणां ॥ ११२ ॥

---

1. CD. त्रिभव° ; srid med srid mñam
2. CD. तोयं ; mñes pa daṅ
3. CD. °पुटजं ; zla ñi k'a sbyor la gnas
4. P[1]. °चित्तवज्रं ; sku gsuṅ t'ugs ldan par
5. D. °लक्षणाद्यैः ; sum ču rca gñis mc'an gyi yan lag dpe byad
6. P[1]. °श्चाष्टभिश्च ; mk'a' daṅ brgyad rnams so
7. CLDV. °दलेष्वष्टका°
8. CD. °कायेश्वराश्च ; dril bu'i sku la dbyaṅs ni
9. °वज्रोपवीते ; mč'od p'yir t'ogs la

a. zla ñi rdo rje las skyes
b. rig pa'i lha mo sogs daṅ saṅs rgyas ā li kā li'i rigs skyes
c. gcug tor 'k'or lo dag la rigs kyi dbaṅ gis bsgom par bya
d. lha rnams dag gi lus la yaṅ
e. yi ge rnams kyis p'ye ba de ñid rab gsal 'dab ma 'dab mar glegs bam rnams la bsgom par bya

काद्या वर्गाः समात्रा गगनरसगुणा योगपट्टस्य भाव्याः
[a]हूं हः[1] श्रीकुण्डलस्य अं अः[2] इति युगलं कण्ठिका मेखलायां ।
एवञ्चाकार[3]युग्मं भवति कटकयो र्नूपुराणां हहा च
पञ्चाकारं हि शून्यं सकलतनुगतं भस्मनो भावनीयं ॥ ११३ ॥

ज्ञानाकारात् स्वदेहात् त्रिकुलिशसहितं स्कन्धधात्वादि सर्वं
न्यस्तव्यं देवतानां स्वहृदयकमले[4] स्व स्व बीजैः क्रमेण ।
बीजे न्यस्ते प्रतिष्ठा भवति नरपते स्तूपलेपादिकानां
[b]बीजावेशं स्वकाये कुरु कर[5]कुलिशेनोपसंहारकाले[6] ॥ ११४ ॥

[c]आदर्शे स्नानमत्र[7] प्रथममपि भवेच्चित्रितानां पटानां
पश्चाद् गन्धैः सुसुरभि[9]कुसुमै र्देवताभ्यर्चनीया ।
गीतै र्वाद्यैश्च नृत्यै र्वरविविधपटै श्चामरै रातपत्रैः
एवं कृत्वा प्रतिष्ठां वरविविधरसैः सङ्घभोज्यं प्रदेयं ॥ ११५ ॥

कूपे वाप्यां तडागे दिशिविदिशि वसून् विन्यसेन्नागराजान्
[d]सप्ताम्भोधि[10] स्वबीजै र्मधुसलिलयुतं क्षेपयेत् पञ्चगव्यं
होमान्ते वापिकादौ वरुणमपि सितं पाशहस्तं विभाव्य
उद्याने कल्पवृक्षं सकलतरुगतं सेकयित्वैकवृक्षं ॥ ११६ ॥

---

1. CD. हहाः
2. PL. त्वम CD. त्वग
3. CD. एवं वाकार° ; de bžin du yaṅ a yig zuṅ ni
4. CD. °कमलात्
5. CD. वरकुलिशे
6. CD. नोऽपि संहार°
7. P[1]. स्नानमन्त्रं
8. CD. गन्धैश्च धूपैः ; dri daṅ spos daṅ šin du dri bzaṅ me tog rnams daṅ
9. CD. स्वसुरभि°
10. CLD. सप्ताम्भो विश्वबीजै°

a. haṁ haḥ dpal ldan rna č'a la ste aṃ aḥ žes pa zuṅ ni mgul rgyan ska rags dag la'o
b. ñe bar bsdu ba'i dus su lag pa'i rdo rje dag gis raṅ gi lus la sa bon gžug par bya
c. 'di daṅ daṅ po ru yaṅ ri mor bris pa'i t'aṅ sku rnams kyi me loṅ la ni k'rus su 'gyur
d. č'u gter bdun po raṅ gi sa bon gyis te sbraṅ rcl č'u daṅ ldan pa'i dri lṅa gžug par bya

मौलिं पट्टञ्च हारं कटकमपि तथा कुण्डलं मेखलादि[1]
आचार्याय प्रदेयं भवति नरपते दक्षिणाश्चात्मशक्त्या ।
दात्रा[2] वै पुण्यहेतोः सकलगणकुलं[3] प्रार्थनीयं परार्थं
[a]पुण्येनानेन सत्त्वा स्त्रिविधभवगतानुत्तरां यान्तु बोधिं ॥ ११७ ॥

दिग्वर्षं यावदेका भवति दशविधा दर्शनस्पर्शनीयाः
[b]तस्मादालिङ्गनीयाः सरसजलधयः सेवनीयाश्चलाद्या[4] ।
विंशद्वर्षोर्ध्वमुद्राः[c] परमभयकराः क्रोधभूतासुरांशाः[5]
सेकार्थं षट्चतस्रः समसुख[6]फलदाश्चापरा भावनार्थं ॥ ११८ ॥

श्रीप्रज्ञा स्पर्शनीयं[7] प्रथममपि कुचे कुम्भसेकः स एव
गुह्याद्[8] गुह्याभिषेको भवति शशधरास्वादना लोकनाड्यां ।
प्रज्ञाज्ञानाभिषेके सकलजिनकुलैः शोधयित्वाङ्गवक्त्रैः
मुद्रा शिष्याय देया जिनमपि गुरुणा साक्षिणं चात्र कृत्वा ॥ ११९ ॥

सर्वालङ्कारयुक्तां द्रुतकनकनिभां द्वादशाब्दां[9]सुकन्यां
प्रज्ञोपायात्मकेन स्वकुलिशमणिना कामयित्वा सरागां ।
ज्ञात्वा शिष्यस्य शुद्धिं कुलिशमपि मुखे क्षेपयित्वा सबीजं
पश्चाद्देया स्वमुद्रा त्वथ पुनरपरा धूममार्गादियुक्ता ॥ १२० ॥

---

1. CD. मेखलां ; ska rags la sogs pa
2. CD. दत्त्वा ; sbyin bdag gis ni
3. CLDV °गुण° ; mt'a dag c'ogs kyi rig la
4. CD. °श्च नाद्या
5. CD. भूताः सुरांशाः ; k'ro bo 'byuṅ po lha min č'e
6. D. खगसुख°
7. CD. °स्पर्शनं यत्
8. CD. गुह्ये , gsaṅ ba dag las
9. D. द्वादशार्का स्वकन्यां ; bču gñis lo loṅ mjes ma'i bu mo ni

a. bsod nams 'di yis sems čan rnams ni rnam gsum srid par gnas pa'i bla med byaṅ č'ub t'ob par šog
b. de nas 'k'yud par bya ste ro daṅ bčas pa'i č'u gter gyo ba la sogs rnams ni bsten par bya
c. lo ni ñi šu yan č'ad p'yag rgya

त्रस्ता विभ्रान्तचिन्ता शठपरवशगा व्याधियुक्ता प्रसूता
क्रुद्धा स्तब्धाथ लोलाऽनृतकलहरता स्वाङ्गहीनाऽविशुद्धा ।
एताः प्रज्ञाभिषेके सुनिपुणगुरुणा वर्जनीया नरेन्द्र
पूर्वोक्ता बुद्धभक्ता गुरुसमयधरा वन्दनीयार्चनीया ॥ १२१ ॥

कामा क्षोभं करोति स्वमनसि जगतः पूर्णतां याति पूर्णा
पूर्णाज्ज्वाला सुबिन्दु[1] स्रवति शशधरं द्रावयित्वोत्तमाङ्गात् ।
ओट्टाकृष्टि प्रकृत्या ददति वरसुखं बिन्दुमोक्षत्रयान्ते
आलोकस्पर्शसङ्गं क्षरणसुखमथानन्दभेदादि नेतत् ॥ १२२ ॥ *

कामानन्दं करोति प्रथममपि नृणां चक्षुरालोकनेन
पश्चात् पूर्णा प्रसङ्गे पुनरपि परमानन्दमेव स्वकाये ।
[a]ज्वाला बिन्दुं स्रवन्ती रमति च विरमानन्द वज्रेण[2] पश्चा
ओट्टा बिन्दुत्रयान्तेऽक्षरगतसहजानन्दवज्रं करोति ॥ १२३ ॥

कामानन्दन्तु कस्याक्षरमपि च चतुष्केन योगः स एकः
पूर्णा शक्त्यङ्गद्भवो वै भवति च परमानन्द एव द्वितीयः ।
ज्वाला बिन्दुश्च मूर्च्छा[3] पुनरपि विरमानन्द एवं तृतीयः
ओट्टा नादश्च निद्रा भवति च सहजानन्द एवं चतुर्थः ॥ १२४ ॥

* The Patna[1] Ms. marks this verse wrongly as 123 and the following two verses are also marked in the Ms. accordingly.

1. D. पूर्णा ज्वाला स्वबिन्दुं ; 'bar ba'i t'ig le bzaṅ po
2. CD. वज्रे च ; rdo rjes pa dma la
3. C. घुर्म्मा LDV. घूर्मा P. घूर्णा ; 'bar ba daṅ ni t'ig le brgyal ba dag daṅ

a. 'bar ba ñid las t'ig le 'jag pa'i dga' ba yis kyaṅ k'yad bar dga' ba rdo rjes pa dma la

[a]माता चित्तेन चिन्तया भवति च भगिनी स्पर्शनालिङ्गनेन
पुत्री वज्रप्रवेशे सकरण[1]सुरते भागिनेया तथैव।
भार्या बिन्दुप्रपाते त्वपरकुलगता योगिनी नष्टरागे
एताः षट्योगमुद्राः क्षितिजलहुतभुग् [b]वायुखोच्छेदभावाः ॥ १२५ ॥ *

अब्जे वज्रप्रवेशः शिखिनि च मरुतो बिन्दुपातस्तृतीयः
एतद्योगत्रयस्य प्रकटितनियता कायवाक्चित्तमुद्रा।
[c]रागारागान्तमाद्या परमसुखनिधि[2] योगगम्या चतुर्थी
मुद्राणां सा सुमाता[3] भवति दशविधा श्रीगुरोर्वक्त्रमेषा ॥ १२६ ॥

प्रज्ञामाता सुमाता[4] त्रिभुवनजननी लोचनाद्या भगिन्यः
षड्वज्रा भागिनेयाः पशुजनभयदा नप्तराश्चर्चिकाद्याः।
चक्रस्थाः सर्वकालं स्वकुलभुविगता योगिभिः सेवनीयाः
क्षेत्रे पीठे श्मशाने न सजनविजने मोचनीयाः कदाचित् ॥ १२७ ॥

श्रीवज्री श्रीजनेता त्रिभुवनजनको भ्रातरः सर्वबुद्धाः
नेत्राद्या भ्रातृपुत्रास्त्वपर बहुविधा नप्तरो नप्तृपुत्राः।
चक्रस्था योगिनीभिः स्वकुलभुविगताः सेवनीयाः प्रहृष्टाः[5]
क्षेत्रे पीठे श्मशाने न सजनविजने मोचनीयाः कदाचित् ॥ १२८ ॥

---

*Beginning from this verse the numbering of verses in Patna[1] Ms. has been made correctly.

1. CD. सकरुणसुरते ; byed pa daṅ bčas
2. CLD. °गुणनिधि ; mčʻog bde'i gter ni
3. D. स स्वमाता ; pʻyag rgya rnams las de ni legs pa'i ma ru 'gyur te
4. D. स्वमाता ; šes rab yum ni mčʻog gi yum ste
5. CD. प्रकृष्टाः ; rab dga' rnams ni

a. sems kyi bsam pa yis ni ma ru 'gyur te reg pa daṅ ni blta ba dag gis sriṅ mo'o

b. rluṅ daṅ mkʻa' daṅ čʻad pa'i dṅos rnams so

c. čʻags daṅ čʻags bral mtʻar gyur daṅ po mčʻog bde'i gter ni rnal 'byor rnams kyis rtogs bya bži pa'o

या काचिद् वज्रपूजां ददति हि वनिता पुण्यहेतोस्त्रिशुद्धया
आचार्यायेन्दुवक्त्रा कुवलयनयना दिव्यगन्धानुलिप्ता ।
यत्पुण्यं भूमिदाने गजतुरगरथानेककन्याप्रदाने
तस्यास्तत्सर्वपुण्यं भवति नरपते खस्थ[1]चन्द्रार्कसीम्नः ॥ १२९ ॥

तारा शूद्री चतुर्वा भवति भुवितले पाण्डरा क्षत्रिणी च
क्ष्मा वैश्या त्रिप्रकारा द्विजजनकुलजा सप्तधा मामकी स्यात् ।
[a]शब्दाख्या कांस्यकारी खलु रसकुलिशा शौण्डिनी रूपवज्रा
सम्यग् वै हेमकारी भवति नरपते गन्धवज्रा धरण्यां ॥ १३० ॥

मालाकारी प्रसिद्धा प्रकृतिगुणवशात् [b]स्पर्शवज्रांशुकारी
वज्रान्ता धर्मधातु र्भवति हि मणिकारी च लोके प्रसिद्धा ।
चामुण्डा [c]खट्टिकी स्यात् प्रकृतिगुणवशाद् वैष्णवी कुम्भकारी
[d]वाराही कन्दुकी वै भवति च गणिका षण्मुखी सौचिकैन्द्री ॥ १३१ ॥

ब्रह्माणी धीवरी स्यात् क्षितितलनिलये चेश्वरी नर्त्तकी स्यात्
लक्ष्मीः पूर्णेन्दुवक्त्रा भवति हि रजकी चाष्टमी भूतयोनिः ।
[e]लाक्षाकारी[2] च जम्भी भवति नरपते स्तम्भकी कोशकारी
[f]मालाख्या तैलपीडा[3] सुदृढदतिबला लोहकारी चतुर्थी ॥ १३२ ॥

---

1. CD. न्यस्त° ; mk'ar gnas
2. CD. रङ्गकारी
3. P. तैलपीती

a. sgra žes bya ba 'k'ar ba mk'an mo ṅes par ro yi rdo rje c'aṅ 'c'oṅ gzugs kyi rdo rje ma
b. reg bya rdo rje t'ags mk'an ma
c. ša 'c'oṅ mar 'gyur
d. p'ag mo k'ur ba ṫuk'an du ṅes 'gyur gdoṅ drug ma ni smad 'c'oṅ ma ste dbaṅ mo c'em bu ma
e. rmugs byed ma ni rgya skyegs mk'an mor 'gyur te mi bdag reṅs byed ma ni srin bal mk'an mo'o
f. k'eṅs ma žes bya til mar 'c'er ma rab c'e šin tu stobs ni lcags mk'an mo ste bži pa'o

मारीची चर्मकारी प्रभवति[1] भृकुटी काष्ठकारी तथैव
श्रीचुन्दा नापिती च क्षितिभुवनगता शृङ्खला वंशकारी ।
[a]वज्राक्षी कूपकर्त्री[2] भवति च दशमी वेणुनृत्यातिनीला[3]
क्रोधांशाः[4] क्रोधजाताः खलु दशवनिता योगिना पूजनीयाः ॥ १३३ ॥

[b]म्लेच्छा[5] श्रीश्वानवक्त्रा भवति नरपते हड्डिनी[6] शूकरास्या
मातङ्गी जम्बुकास्या क्षितितलनिलये तायिनी व्याघ्रवक्त्रा ।
काकास्या वर्वरी च प्रकटितनियता पुक्कसी गृध्रवक्त्रा
श्रीभिल्ली ताक्ष्यवक्त्रा भवति हि शवरी चाष्टमोलूकवक्त्रा ॥ १३४ ॥

षट्त्रिंशद्वर्णभेदैः क्षितितलनिलये योगिनीनां कुलानि
क्षेत्रे पीठोपपीठे विषयपुरवरे श्रीवने संस्थितानि ।
मूर्खाणां बन्धनानि प्रवरमहितले योगिनां सिद्धिदानि
चत्वारः षट् तथाष्टौ सहदशवसवश्चैकमेकं क्रमेण ॥ १३५ ॥

चत्वारो बुद्धभेदाः खलु पुन ऋतवो बोधिसत्त्वप्रभेदाः
क्रोधानां दिक्प्रभेदाः क्षितितलनिलये प्रेतभेदास्तथाष्टौ ।
दैत्यानां चाष्टभेदाः फणिभुवनगता योगिना वेदितव्या
एकैको विश्वभर्तु स्त्रिभुवननिलये व्यापकः श्रीकुलानां ॥ १३६ ॥

---

1. CD. स भवति
2. CD. कूपकर्ता
3. CLDV. नृत्यातिशीला
4. CD. क्रोधागा ; k'ro bo'i č'a šas
5. P. म्लेच्छी
6. CLDV. हट्टिनी
7. CD. प्रकटसुनियता

a drag spyan ma ni k'ron pa byed mar 'gyur te bču pa 'od ma'i gar ma šin tu sṅon mo'o

b. dpal ldan k'yi gdoṅ ma ni kla klo mar 'gyur mi yi bd[illegible] p'ag gdoṅ ma ni 'p'yag pa mo

पाताले षष्ठचण्डा दशदिशिवलये क्रोधजा मर्त्यलोके
प्रेताख्याः प्रेतलोके सुरवरनिलये शब्दवज्रादि षट्कं ।
ब्रह्माण्डे श्रीचतस्रः प्रवरशिवपुरेऽप्येकमाता[1] त्रिधातो-
र्विश्वं संहारयन्ति प्रकुपितवदनाः पालयन्त्येव तुष्टाः ॥ १३७

बालाः बृद्धास्तरुण्यः समलिनतनवो ब्राह्मणी क्षत्रिणी च
वैश्या शूद्रान्त्यजा "वा गतनयनकराश्छिन्नकर्णौष्ठनासाः ।
आचार्ये बोधिहेतोः सकरुणहृदयैः पूजनीयाः समस्ताः
प्रज्ञोपायेन राजन् व्यपगतकलुषे बोधिचर्यानुरूढैः ॥ १३८ ॥

आदौ स्त्री गुह्यमुद्रा भवति हि समये श्रीनरो दिव्यमुद्रा
क्रोडाङ्गे कर्ममुद्रा भवति समसुखे द्वीन्द्रिये धर्ममुद्रा ।
दूतीनां पञ्चगन्धास्तनुकमलगता जातयः पञ्च तासां
कस्तूरी पद्ममूत्राः[2] प्रकृतिगुणवशादामिषः पूतिगन्धः ॥ १३९

श्रीभद्रा पद्मिनी वै भवति जलचरी चित्रिणी हस्तिनी च
श्रीस्तारा पाण्डराख्या भवति कुलवशान् मामकी लोचना च ।
योगी सिंही मृगोऽश्वो भवति च वृषभः कुञ्जरो जातिभेदाद्
अक्षोभ्योऽमोघसिद्धि विमलमणिकरः पद्मपाणिश्च चक्री ॥ १४० ॥

---

1. P[1]. °प्येकमात्रा ; yum gčig ma
2. CD पद्मसूत्राः ; pa dma gčin dan
a. sam mig lag dan bral rna ba mč'u dan sna ni c'ad ma rnams

तन्वङ्गी सूक्ष्मकेशा मृदुकरचरणा वत्सला श्रीसुभद्रा
किञ्चित्तन्वी प्रलम्बा त्वचपलनयना पद्मिनी वक्र[1]केशा ।
निर्लज्जा तीव्रकामा बहुकलहरता शङ्खिनी स्वल्पकेशा
दीर्घा सर्वाङ्गपूर्णा खलु लघुविषया चित्रिणी दीर्घकेशा ॥ १४१ ॥

स्थूला खर्वा दृढाङ्गी सुकठिनविषया हस्तिनी स्थूल[2]केशा
दूतीनां शुद्धजातिः क्वचिदिह हि भवेत् सर्वदा मिश्रजातिः ।
सिंहश्चैकान्तवासी विषयविरहितो निर्भयस्त्यागशीलः
सारङ्गः शीघ्रगामी क्षरलघुविषयस्त्रस्तचित्तोऽतिभीतः ॥ १४२ ॥

अश्वो वै कामलोलो भवति परवशः मूत्रगन्धः परार्थी
स्तब्धाक्षो मन्दगामी प्रकृतिगुणजडो[3] मत्स्यगन्धो वृषः स्यात् ।
कामी वै मन्दगामी भवति खलु गजः पूतिगन्धोऽतिमूर्खः
षट्त्रिंशद्भेदभिन्नः क्षितितलनिलये वर्णगन्धस्वभावः ॥ १४३ ॥

पूजार्थं कामशास्त्रं बहुगुणनिलयं योगिना वेदितव्यं
नातुष्टा सिद्धिदा स्यात् सुरतमपि गता योगिनी योगिनश्च ।
दिव्या देवी पिशाची भवति च मनुजा राक्षसी नागिनी च
दिव्या श्रीधर्मधातु भवति गुणवशाच्छन्दवज्रा च देवी ॥ १४४ ॥

1. LP[1]. चक्रकेशा ; skra ni,'k'yog pa

2. D. लूनकेशा ; skra ni sbom pa

3. CD. प्रकृतिगुणयुतो : raṅ bžin yon tan bluṅ po

a. rul pa'i dri daṅ šin tu rmoṅs pa'o

पिशाची[1]गन्धवज्रा भवति च मनुजा रूपवज्रा नरेन्द्र
क्रूरा सा राक्षसी या खलु रसकुलिशा नागिनी स्पर्शवज्रा ।
दिव्या सत्त्वोपकारी व्रतनियमरता संवर[2]ध्यानशीला
देवी भोगानुरक्ता भवति हि मलिनोच्छिष्टरक्ता पिशाची ॥ १४५ ॥

नारी कामानुरक्ता नररुधिररता राक्षसी मारचित्ता
क्षीराशा नागिनी च प्रवरमहितले योगिना पूजनीया ।
एवं चान्ये स्वभावाः प्रकृतिगुणवशाद् योगिना वेदितव्याः
षट्त्रिंशद्भेदभिन्नाः क्षितितलनिलये खेचरीभूचरीणां ॥ १०६ ॥

मद्यं प्रज्ञास्वभावं समधुक[3]गुडजं धान्यजं वृक्षजं च
मुद्राहीनः पिवेद् यः स भवति विषयी चावृतो मारवृन्दैः ।
[a]तस्मात् प्रज्ञाधियुक्तं कलुषमलहरं मन्त्रिणां सिद्धिदं स्यात्
मुद्रायां काञ्चिदस्मिन् समयविरहितां पानहेतोः प्रकुर्यात् ॥ १४७ ॥

एको राजन् शशाङ्को मरणभयहरः सेवितः सर्वकालं
प्रज्ञाधर्मोदयस्थो दिनकरसहितः किं पुनर्योगयुक्तः ।
अक्षोभ्योऽमोघसिद्धि जिनवरसहितः श्वाश्वगोहस्तियुक्तः
क्लेशानां वज्रदण्डः पशुजनभयदश्चाष्टमोऽन्योऽतिरौद्रः ॥ १०८ ॥

---

1. P. पैशाची
2. LP. संयमध्यान°
3. CD. समधुज° ; sbraṅ rci daṅ bčas bu ram las skyes

a. de p'yir šes rab lhag ldan sdig pa'i dri ma 'p'rog čin sṅags pa rnams la dṅos grub sbyin par 'gyur

श्वाश्वो गोहस्तिमेषास्त्वजहरिणखराः शूकरोष्ट्रौ[1] दिगेते
[a]कुम्भीराखुः कुलीरो झष इति मकरो दर्दुरः कूर्मशङ्खः ।
गण्डा व्याघ्रश्च ऋक्षः सनकुलचमरी [b]जम्बुकोद्रो विडालः
आरण्यश्वा ससिंहो वसुदशकमिदं भूतजं क्रोधजश्च[2] ॥ १४९ ॥

[c]गोधाखुः शालिजातः कपिरपि शशकः शल्लकीषु कृकोष्टौ[3]
मानो पक्षी शुकश्च प्रकटितजलधिः कोकिला शारिका च ।
लावः पारावतोऽन्यो वक इति चटकः चक्रवाकश्च हंसः
श्याकुश्चा कोकिलाक्षा[4] रक्तमगवतो तित्तिरी सारसा च ॥ १५० ॥

नीराविष्टो वलाकः सहरसवसवो वेदितव्याः क्रमेण
काको गृध्रोऽप्युलूको मृगरिपुशिखिनौ कुक्कुटो भेद्रवाराः ।
[e]याजोवृक्षारिरन्याः[5] प्रभवति दशकं क्रोधजं क्रोधजातिः
नीलाक्षः क्रौञ्चकोरस्त्वनिलगुदमुखौ [f]वुक्किपादोर्ध्वशायी[6] ॥ १५१ ॥

भेरुण्डश्चाम्बरीको भवति नरपते चाष्टमो दिव्यपक्षी
षट्त्रिंशज्जातिभेदैः क्षितिभुवनगता भूचरो[7] खेचरोणां ।
पूजाकाले समस्ताः कुलगतसमया योगिना भक्षणीया
मूर्खो मोहात् कदाचित्त्यजति नरपते क्षिप्रनाशं प्रयाति ॥ १५२ ॥

1. D. °अष्टौ rṅa mo
2. D. क्रोधनं°
3. D. कृकोष्ट्रौ
4. P. कोकिलाख्यो ; k'u byug mig daṅ
5. CLD. वृक्षा वरेण्यः
6. LD. °ऽर्धशायी
7. CD खेचरी भुचरी°

a. kum bhī ra mo 'gron bu ku līra mo ña mo ma ka ra mo sbal mo rus sbal duṅ
b. lče spyaṅ daṅ ni sram daṅ byi la daṅ
c. 'brog dgon k'yi ma seṅ ge daṅ bčas nor daṅ bču ste 'di ni 'byuṅ po skyes daṅ k'ro bo skyes
d. go dhā byi ba śā li jā ta spre'u mo daṅ ri boṅ gzugs mo i su rcaṅs ma brgyad
e. hor pa ljon šiṅ dgra ni gžan te bču po k'ro bo las skyes k'ro bo yi ni rigs su 'gyur
f. bug ki rkaṅ steṅ ñal

"दन्तैः केशैस्त्वगाद्यैः सपिशित[1]सनहा वस्तिवुक्कैश्च पद्मै-
र्यकाभि र्लोमकोटैः प्रवरनरपते फुप्फुसैरन्त्रमेदैः ।
"वार्यो पित्ताम्बुप्यै र्विविधतनुगतै र्लोहितैः स्वेदमेदैः
अश्रुभ्यां खेटसिंहाणि जलनमिववसा वर्ण[2]गन्धैश्च विष्ठैः ॥ १५३ ॥

जिह्वाक्षिश्रोत्रनासा सशशिदिनकरै र्देवता पूजनीयाः
षट्त्रिंशच्चाक्षराणि प्रकृतिगुणवशाद् बोधिपक्षाश्च धर्माः ।
षट्त्रिंशद् धातुभेदाः सकलतनुगता जातयश्चिह्नमुद्राः
षट्त्रिंशद् योगतन्त्राण्यवनितलगतान्यत्र वै योगिनीनां ॥ १५४ ॥

तोयार्घं गन्धधूपं कुसुममपि फलं चाक्षतानि प्रदीपः[3]
नैवेद्यं चात्र वस्त्रं भवति हि दशकं चक्रमेलापके च ।
शुक्रं मूत्रञ्च मज्जा विडपि च पिशितं कलिजं पित्तरक्तं
अन्त्रं चर्माणि राजन् भवति दशविधं चक्रमेलापके च ॥ १५५ ॥

वज्रं खड्गश्च बाणः शतदलकमलं पञ्चमं चक्रचिह्नं
वीणादर्शश्च पात्रं भवति नरपते पुष्पमाला च वस्त्रं ।
षष्टो धर्मोदयो वै भवति करतले शब्दवज्रादिचिह्नं
एवं वै कर्त्तिकाद्यं कलस इति "तथा कञ्चुकं[4] पीतवस्त्रं ॥ १५६ ॥

---

1. CD. स पिशितमदनैर्वस्ति°
2. D °वशाद्वर्नं°
3. CD. प्रदीपे ; mar me dan
4. CD. कट्छुकं L. कटुकं

a. so dan skra dan lpags pa la sogs ša bcas c'u rgyus dan bcas rus pa sñin dan pad ma dan
b. pad kan mk'ris pa c'u dan rnag dan sna c'ogs lus la gnas pa k'rag dan rnul dan c'il bu dan
c. mč'i ma dag dan mč'il ma snabs dan dri c'u c'u ser žag dan dri dan bšan pa dan
d. de bžin du ni bču gzar gos ni ser po dan

सूवी वा मुद्गरो वा प्रकटितनियतो मत्स्यजालं त्रिशूलं
लक्ष्मीचिह्नं शिला वै भवति नरपते चाष्टमं भूतजानां ।
जम्भादे रक्तपात्रं दिनकरसदृशं कोषकोटः कुशश्च
शस्त्री चोपानहौ च क्षुरक इति तथा पादुका चातपत्रं ॥ १५७ ॥

कुद्दालं वेणुदण्डं प्रभवति दशकं क्रोधजानां स्वचिह्नं
[a]गोश्रृङ्गं मल्लतन्त्री भवति करतले त्राकुटी[1] मांसशूलं ।
वीणोपाङ्गश्च काण्डं भवति च शिखिनः पिच्छमत्राष्टमं[2] च
षट्त्रिंशच्चिह्नभेदाः प्रवरभुवितले योगिना पूजनीयाः ॥ १५८ ॥

भूयः शूद्रादिचिह्नं भवति गुणवशादुत्पलं वाहनं वा
क्षत्रिण्या रत्नपट्टं भवति नरपते लेखनी रत्नमाला ।
वैश्यायास्तद्वदेवं जलचरसहितं ताम्रपात्रं द्विजात्याः
मातुश्चिह्नं चतुर्था डमरुकपटहं मौलिरेवाक्षसूत्रं ॥ १५९ ॥

विष्ठा मूत्रञ्च रक्तं भवति सपिशितं देवतीनां[3] चतुष्कं
कर्णौ नासाक्षि जिह्वा गुदमपि च भगं शब्दवज्रादि षट्कं ।
[b]पूयः श्लेष्मा च यूका कृमिक लसि वसा लोमकेशाष्टकञ्च
अन्त्रं पित्तास्थिमज्जा विविधतनुगतं कालजं फुप्फुसञ्च ॥ १६० ॥

---

1. CLD. द्राकुली
2. CD. पिच्छमात्रा°' ; 'jug ma 'dir ni brgyad par 'gyur
3. CD. देवतीनां ; lha mo rnams ni bži por 'gyur ba ste

a. k'am p'or rgyud ldan 'p'an daṅ ša yi gsal šiṅ lag pa'i mt'il du 'gyur ba ste

b. rnag daṅ bad kan daṅ ni šig daṅ srin bu ǒ'u ser žag daṅ ba spu skra daṅ brgyad po yaṅ

नाडो चर्माणि वुक्कं भवति च दशकं मेदयुक्तं नरेन्द्र
कर्णे नासाक्षिवक्त्रेषु गतमपि मलं पायुमध्ये भगे च ।
कक्षाद्यष्टाङ्गकाये[1] भवति नरपते चाष्टकं ह्यासुरीणां
योगिन्योऽष्टाष्टकाः स्युः सहनखदशनाद् द्वादशाङ्गाः कपालैः ॥ १६१ ॥

विण्मूत्रं रक्तमांसं[2] विविधतनुगतं पीठभेदे चतुष्कं
कर्णौ नासाक्षि जिह्वा गुदमपि च भगं क्षेत्रभेदे च षट्कं[3] ।
पूयाद्याः केशसीम्नः क्षितितलनिलये चाष्टच्छन्दोहभेदाः
अन्त्राद्या मेदसीम्ना दिगिति च नृप मेलापकस्य प्रभेदाः ॥ १६२ ॥

कर्णाद्यष्टाङ्गकाये खलु विविधमलानि श्मशानप्रभेदाः
कालाग्नीन्द्वर्कराहुः प्रकटितनियतं पीटभेदे चतुष्कं ।
भौमः सौम्यश्च मन्त्री भृगु शनि फणिनः क्षेत्रभेदे च षट्कं[4]
पृथ्वी तोयाग्नि वाताः क्षितिज सलिलजा वह्निजा वातजाश्च ॥ १६३ ॥

अष्टौ छन्दोहभेदाः पुनरपि च तथा षड्रसागन्धवर्णौ[5]
स्पर्शः शब्दस्तथैव प्रकटित दश मेलापकस्य प्रभेदाः ।
"पृथ्वी तोयाग्निवायुः क्षयमपि पुरतो[6] वामसव्ये च पूर्वे
वर्णादीनां चतुर्णां विदिशि निधनताष्टश्मशानप्रभेदाः ॥ १६४ ॥

---

1. CD. °काधो ; lus kyi yan lag brgyad la
2. CD. °मांसैर्
3. P[1]. चतुष्कं ; dbye ba la yaṅ drug
4. L. चतुष्कं
5. P. वर्णगन्धौ
6. CLD. परतो

a. sa daṅ c̆'u daṅ me daṅ rluṅ ni zad pa dag kyaṅ mdun daṅ gyon daṅ gyas daṅ rgyab tu ste

पीठं तारादिवेश्म स्फुटरवकुलिशाद्यन्तथा क्षेत्रमुक्तं[1]
छन्दोहं चर्चिकाद्यं प्रभवति मेलापकं जम्भिकाद्यं ।
श्वानास्याद्यं श्मशानं परमभुविगतं मूलपीठं सगुह्यं
[a]मातुर्वेश्म द्विधा तत् प्रकटितमरणौ चान्त्यजं ह्यन्तजं[2] वै ॥ १६५ ॥

पीठं स्त्रीगुह्यपद्मं प्रभवति समये वज्रमेवोपपीठं
क्षेत्रं छन्दोह मेलापकचितिभुवनं तद्वदेवं समस्तं ।
पीठं वामाङ्गपूर्वं ह्यपरमपि तथा दक्षिणं चोपपीठं
एवं क्षेत्रादि सर्वं करचरणगतं चाङ्गुलीकान्तसीम्नः ॥ १६६ ॥

[b]देव्यब्धि[3] स्मृत्युपस्थानमपि भवति वै कालचक्रे प्रसिद्धं
प्रज्ञा बोध्यङ्गमाता त्वपरमपि तथा शब्दवज्रादि षट्कं ।
अब्धिः सम्यक् प्रहाणान्यपरजलधयश्चर्धिपादाष्टकं स्यात्
पञ्चक्रोधा बलानि प्रकटितनियतानीन्द्रियाण्येव पञ्च ॥ १६७ ॥

सम्यक् चाष्टाङ्गमार्गो भवति नरपते चाष्टकं दैत्यजानां
सप्तत्रिंशत् प्रभेदैस्त्रिभुवननिलये बोधिपक्षाश्च धर्माः ।
योगिन्यस्ताः समस्ताः क्षितितलनिलये योगिना वेदितव्या
[c]एवं पीठादिसर्वं भवति नरपते बाह्यदेहे च तद्वत्[4] ॥ १६८ ॥

---

1. CLD. °युक्तं ; žin du brjod
2. P. चान्त्यजं
3. P. देव्योब्धि
4. CLD. तत्त्वम्

a. yum gyi k'yim rnams gñis te de dag rab tu gsal bar sa la mt'ar skyes ma daṅ mt'ar skyes ma
b. dran pa ñe bar gžag pa rnams kyaṅ lha mo č'u gter du 'gyur dus kyi 'k'or lor rab tu grags
c. de ltar gnas la sogs pa t'ams čad mi yi bdag po p'yi daṅ lus la yaṅ ni de bžin 'gyur

बौद्धः शैवोऽथ नग्नो भगव इति तथा स्नातको ब्राह्मणो वा
[a]कापाली लुप्तकेशो भवतु[1] सितपटः क्षेत्रपालस्तु कौलः[2] ।
मौनी चोन्मत्तरूपोप्यकलुषहृदयः पण्डितश्छात्र एव
योगी सिद्ध्यर्थहेतोः सकलगुणनिधि र्लब्धतत्त्वो नरेन्द्र ॥ १६९ ॥

अङ्गुष्ठस्तर्जनी या पुनरपि च तथा मध्यमानामिका च
तस्यान्ते वै कनिष्ठा सकलगुणनिधि र्योगिना वेदितव्या ।
मुद्रार्थं नामभेदो भवति गुणवशादङ्गुलीनां क्रमेण
बन्धोक्ते वज्रबन्धो भवति नियमितो मुष्टिबन्धे च तद्वत् ॥ १७० ॥

मुष्टी वज्रासनस्थे[3] भवति जिनपते वज्रमुद्रोरुमूर्ध्नि
पर्यङ्के वामहस्तो भवति भुविगतो दक्षिणो जानुदेशात् ।
भूस्पर्शोक्षोभ्यमुद्रा त्वपि वरदकरो दक्षिणे रत्नपाणे-
र्वामोर्ध्वे सव्यहस्तो भवति समगतोत्तानकः पद्मपाणेः ॥ १७१ ॥

वामं पर्यङ्कमूर्ध्नि ह्यपरकरतलं चाभयं खड्गपाणेः
सव्ये मुष्ट्यावसव्या खलु पुनरपरा तर्जनी मुष्टिबन्धे[4] ।
मुद्रा वैरोचनस्य स्फुटहृदयगता [b]चापरा चक्रमुद्रा
तर्जन्यङ्गुष्ठयोगः कटक[5] इह भवेत् मध्यमादेः प्रसारः ॥ १७२ ॥

---

1. CLD. भवति
2. CLD. कोलः
3. CLD. वज्रासनस्थो ; rdo rje gdan la gnas pa
4. CLD. °वेष्टे ; gžan gyi mjub mo k'u o'ur bčiṅs pa la
5. CLD. प्रकट ; gdu bu

a. t'od pa čan daṅ skra 'bal daṅ ni gos dkar dag daṅ žiṅ skyoṅ rigs čan daṅ ni t'ub pa daṅ
b. gžan pa č'os kyi 'k'or lo'i p'yag rgya

वामे हस्ते सुपूर्णो विमलशशवरो दक्षिणे वज्रसूर्यः
सूर्येन्दोः संपुटस्थं भयकरकुलिशं क्रोधजं पञ्चशूकं ।
ध्यात्वाङ्गं स्पर्शनीयं समकुटशिरसारभ्य पादान्तमेव
एषा श्रीदिव्यमुद्रा कलुषमलहरा कालचक्रस्य राजन् ॥ १७३ ॥

यत्किञ्चिद् ग्राह्य[1]वस्तु क्षितिजसलिलजं गर्भजं स्वेदजाद्यं
अन्नं पानं सवीर्यं[2] गुरुमपि चरणं मुद्रया स्पर्शनीयं ।
यद्यत् कार्योपयोग्यं भवति गुणवशात्तस्य तद् योजनीयं
भूम्याद्यं मण्डलार्थं चरणमपि गतौ योगिना ताडनीयं ॥ १७४ ॥

हस्ताभ्यां वज्रबन्धे[3] भवति खलु महाक्रोधराजस्य मुद्रा
तर्जन्याद्यन्तबद्धं[4] त्रिभूवनविजया मुष्टिबन्धेन भर्तुः[5] ।
चिह्नाकारास्त्वशेषाः प्रकटितनियता देवतादेवतीनां
हस्ताभ्यां वज्रबन्धे भवति चलफणाकारमुद्रा फणीनां ॥ १७५ ॥

श्लिष्टाङ्गुष्ठौ कनिष्ठे कमलदलसमे मध्यमे मारिते च
तर्जन्यौ द्व्यर्धचन्द्रे[6] स्वकरतलगतेऽनामिके कुञ्चिते[7] ।
मुद्रेयं पञ्चशूका भवति हि कुलिशे वज्रिणो दर्शनीया
[a]आराकाराङ्गुलीका ह्य भयकरतलेऽङ्गुष्ठकाद्याः समस्ताः ॥ १७६ ॥

---

1. CLD. °बाह्य ; gaṅ źig ćuṅ zad gzuṅ bar bya ba'i dṅos po
2. CLD. सबीजं
3. CLD. वज्रबन्धे ; lag pa dag gis rdo rje bćiṅs pa yis ni
4. CD. °द्यन्तबन्धं
5. CLD. स्वस्तिबन्धेन ; k'u c'ur
6. CLPD. °ऽर्धवक्रे ; zla ba p'yed pa
7. CD. कुञ्चिते च ; miṅ med 'og tu bskum pa

a. roibs kyi rnam pa sor mo rnams te lag pa gñi ga' bt'il du mt'e bo la sogs mt'a' dag rnams

द्वौ हस्तौ वज्रबन्धो भवति हि कुलिशं वज्रमुष्ट्या सघण्टा
मुष्ट्यर्धं तीक्ष्णखड्गे भवति शरसमे तर्जनी मध्यमे च ।
तर्जन्याद्यास्त्रिशूलाः पुनरपि विरलास्त्वर्धमुष्ट्या त्रिशूले
श्रीकर्त्र्यां मुष्टिबन्धो भवति भयकरा श्रीकनिष्ठार्धचन्द्रा ॥ १७७ ॥

कर्णोर्ध्वं मुष्टिबन्धो भवति वरशरेऽङ्गुष्ठकं मध्यमार्धे
तर्जन्यत्यन्तवक्रा भवति नृप तथैवाङ्कुशे मुष्टिबन्धः ।
मूले तर्जन्यनामा[1] भवति शरसमा मध्यमश्चोर्ध्वकुन्ते[2]
तिर्यङ्मुष्टिश्च दण्डे सुसमकरतलेऽङ्गुष्ठसारः कुठारे ॥ १७८ ॥

ऊर्ध्वे मुष्टिद्वयं स्यादसुरपतिगजस्याजिने तर्जनी च
दंष्ट्रायां मुष्टिबन्धो ह्यभयकरतले चार्धचन्द्रा कनिष्ठा ।
वामे बाहुप्रसारो भवति करतलं चोर्ध्वगं खेटके[3] च
खट्वाङ्गे छिद्रमुष्टि र्भवति हि[4] नियता स्कन्धसारा कनिष्ठा ॥ १७९ ॥

[a]अङ्गुल्यच्छिद्रपाणिः[5] कमलदलमिव श्रीकपाले कृतोर्ध्वं
पाणावुत्तानमुष्टि र्भवति धनुषि वै वामबाहुप्रसारः ।
[b]तर्जन्यारूढवक्रा[6] भवति च नियता मध्यमा वज्रपाशे
रत्ने द्वन्द्वोऽङ्गुलीनां भवति नृप विकाशश्च पद्मे च तासां ॥ १८० ॥

---

1. CLD. तर्जन्यमाया ; roa bar mjub mo miṅ med du
2. CLD. मध्यमोर्ध्वं च कुञ्चेत् ; steṅ du guṅ mo yaṅ ni mdun la ste
3. CLD. स्फेटके ; k'e ṭa ka la
4. CLD. च
5. CLD. अङ्गुल्याश्छिद्र°
6. CLD °रूढवक्रो

a. sor mo bug pa med pa'i lag pa pad 'dab lta bu steṅ du byas pa dpal ldan t'od pa la
b. guṅ mo dag ni mjub mo 'k'yog po kun du brten par 'gyur te ṅes par rdo rje žags pa la

तर्जन्यङ्गुष्ठयोगो भवति जलचरेऽङ्गुष्ठकाग्रेष्ठ [illegible]
आदर्शे संमुखं स्यात् सुगमकरतलं साङ्गुलाकं ह्यच्छिद्रं ।
"तर्जन्यादूर्ध्ववक्रा[1] क्रमपरिरचिताङ्गुष्ठके शृङ्खलायां
अङ्गुष्ठाद्याश्चतस्रः शिरसि सममुखा कुञ्चिताधः कनिष्ठा ॥ १८१

हस्ताभ्यां शङ्खमुद्रा भवति हि मकुटे तर्जनीद्वन्द्वयोगः
पञ्चाङ्गुल्येकयोगोऽपि च करतलयोः पृष्ठतः कुण्डलञ्च ।
पाणौ पृष्ठेऽङ्गुलीनां क्रमपरिरचितं बन्धनं कण्ठिकायां
[b]अङ्गुल्यान्योन्ययोगोभयकरकुटिलाद्यन्तयो मेखलायां ॥ १८२ ॥

अङ्गुष्ठौ मध्यमे द्वे वलयमिव कृतौ[2] नूपुरे मुष्टिबन्धात्
तद्वत् केयूरयुग्मे भवति च कटके तर्जनीद्वन्द्वयोगः ।
अङ्गुष्ठो[3] डाकिनीनां भवति वरकुलं तर्जनी गुह्यकानां
गन्धर्वाणां फणीनां क्रमपरिरचिता मध्यमानामिका वा ॥ १८३ ॥

भूतानां श्रीकनिष्ठा प्रवरकरतलं राक्षसानां कुलं स्यात्
सिद्धानां मुष्टिबन्धो भवति वरकुलं पर्वसन्धिः सुराणां ।
[c]पञ्चाङ्गुल्यर्धवक्रा ह्यभयकरतलं जातिमुद्रा नखीनां
तर्जन्यौ द्वेऽर्धवक्रे खलु शिरसि गते शृङ्गिणां मुष्टिबन्धात् ॥ १८४ ॥

---

1. CLD. तर्जन्या ह्यर्धचक्रा
2. P[1]. कृता
3. P[1]. अङ्गुष्ठौ

a. mt'e bo la ni mjub mo la sogs sten du 'k'yog po rim par yoṅs su bkod pa lcags sgrog la'o

b. lag pa gñi ga'i sor mo gsum ni p'an c'un sbyar ciṅ t'og ma'a' bskum pa dag ni ska rags la

c. lag pa gñi ga'i 't'il du sor mo lṅa po p'yed 'k'yog rigs kyi p'yag rgya sder mo can rnams kyi

बद्धेऽन्योन्यं कनिष्ठे विषमकरतले पक्षयोगोऽण्डजानां
पञ्चाङ्गुल्यग्रवक्रा भवति हि फणिनां जातिमुद्रा विशिष्टा ।
तर्जन्यन्ताः प्रसाराः प्रतिदिवसबलौ चापरेऽवश्च श्लिष्टे
ज्वालायां श्लिष्टज्येष्ठौ वरकरतलयोस्तर्जनी सारितान्याः ॥ १८५ ॥

तर्जन्या दर्शनं वै कथितमपि भवेत् स्वागतं योगिनश्च
द्वाभ्यां सुस्वागतञ्च[1] प्रवदति सुभगा क्षेममङ्गुष्ठबन्धात्[2] ।
अङ्गुल्याश्छोटिकायाः कथयति नियतं श्रेष्ठमन्त्री त्वमत्र
[b]अङ्गुष्ठानामिकाभ्यां ससमयसुरया तर्पणं ते करोमि[3] ॥ १८६ ॥

सर्वाङ्गुल्यग्रसारात् प्रवदति सुभगा स्वागतं योगिनश्च
वामाङ्गं स्पर्शनेन प्रकटयति सदा बन्धुरेको मम त्वं ।
योनौ स्पर्शे च भर्ताप्यधरकुचयुगालेखने वै नखैश्च
अङ्गुल्यन्योन्यबन्धात् कथयति समयं मध्यमाङ्गुष्ठसारात् ॥ १८७ ॥

ओष्ठभ्रूनेत्रवक्त्रं वदति शिरसि[c] कण्डूयमानेऽतिमूर्खः
दंष्ट्रामध्ये कनिष्ठा प्रकटयति भयं [d]तर्जनी हृन्मुखे च ।
अङ्गुष्ठे मुष्टिबन्धाद् भुविकरचरणास्फालने भक्षयामि
जिह्वा स्पर्शे च भुक्तं ह्युदरदशनयोस्ताडितेनैव भुक्तं ॥ १८८ ॥

---

1. CLD. स्वभ्यागतञ्च
2. P. °बद्धात्
3. CLD. करोति

a. ñin žag so so'i gtor ma la ni mjub mo'i mt'a' rnams rab ɔrkyaṅ gžan pa 'og tu sbyar byas pa

b. mt'e bo daṅ ni miṅ med dag gis dam o'ig bčas pa'i č'aṅ gis k'yod ni o'im par byed pa'o

c. 'p'rug par byed na šin tu rmoṅs pa brjod par byed

d. sñiṅ k'a k'a ru mjub mo

[a]पाणौ पृष्ठे च गच्छ प्रवदति नियतं संमुखे तिष्ठ तिष्ठ
जानूरुमर्दने वै कथयति सुभगाद्यैव विश्रामय त्वं ।
[b]निद्रां पादप्रसारां कुरु मम सुरतं जानुयुग्मप्रसारात्
सर्वाङ्गे स्पृश्यमाने वदनकरगते[1] नास्ति[2] मेलापको मे ॥ १८९ ॥

अन्योन्यं हस्तबन्धे वदति मम गृहे चक्रमेलापकोऽद्य
अङ्गुष्ठानामिकाग्राद् बहुविधसमयैस्तर्प्ययामो यथेष्टं ।
पादे कण्डूयमाने गमनमपि तथा बाह्य मेलापके च
तर्जन्यन्योन्यबन्धे त्वपहरति भयं वज्रमित्रं त्वमद्य ॥ १९० ॥

केशच्छेदे स्वदन्ते वदति नरपशो[3] पातनीयस्त्वमत्र
अन्योन्यं दन्तघृष्टे तव पिशितमिदं भक्षणीयं मयाद्य ।
जिह्वौष्ठे लालिते वै वदति वरतनौ रक्तपानं करोमि
ओष्ठे सन्दश्यमानेष्वुदरगतमिदं भक्षयामस्तवान्त्रं ॥ १९१ ॥

लास्या योगेन लास्या भवति नरपते हास्ययोगेन हास्या
नृत्या योगेन नृत्या भवति बहुविधा वाद्य[4]योगेन वाद्या ।
गीतायोगेन गीता वरविविधगुणा गन्धयोगेन गन्धा
मालायोगेन माला भवति गुणवशाद् धूपयोगेन धूपा ॥ १९२

1. CD. वदनगतकरे , ċiṅ k'a ru lag pa gnas pa
2. CD. शान्ति ; bdag la 'dus pa med pa'o
3. CD. वरपशो , mi yi p'yugs
4. D. बाह्ययोगेन बाह्या

a. lag pa'i rgyab kyis soṅ žǐg ṅes par rab tu brǰod de mṅon par p'yogs pas 'dug ċig 'dug ċig go
b. rkaṅ pa rab tu rkyoṅ bas gñid daṅ pus mo zuṅ dag rkyoṅ bas bdag la šin tu dga' ba gyis

ᵃदीपाकारेण दीपा खलु निहततमा[1] पात्रयोगेऽमृता[2] स्यात्
इत्येवं सर्वमुद्राः पुनरपि च ततः पञ्चभेदै विभिन्नाः।
अन्या मुद्रास्त्वनन्ताः सकलतनुगता योगिना वेदितव्या
यद् वस्तुस्वभावो भवति भुवितले तत् स्वभावाश्च मुद्राः ॥ १६३ ॥

ᵇतिर्यक्दृष्ट्या[3] च दूती कथयति सुभगस्यागतस्त्वं कुतश्च
प्रत्युक्तं योगिनः स्यात् शिरसिगतकरस्येक्षणे तादृशो वै।
क्षेमस्तेऽप्यूर्ध्वदृष्ट्या क्षितितलगतया तिष्ठ विश्रामय त्वं
गच्छ त्वं वक्रदृष्ट्या कथयति सुरतं राग[4]दृष्ट्या च दूती ॥ १६४

मित्रं मे सौम्यदृष्ट्या प्रकटयति[5] भयं क्रोधदृष्ट्या भ्रुकुट्या
ᶜक्रूराहं केशदृष्ट्या कथयति सुभगस्येङ्गितैः स्वस्वभावं
ऊर्णादृष्ट्योत्तमाहंᵈ प्रकटयति गुणं योगिनो घ्राण[6]दृष्ट्या
सौभाग्यं चौष्ठदृष्ट्या वदति कुचयुगालोकनेहं सुमुद्रा ॥ १६५ ॥

हृद्दृष्ट्या भावितात्मा वदति भुजयुगालोकनेहं प्रचण्डा
शक्ताहं स्कन्धदृष्ट्या सनखकरतलालोकने राक्षसी च।
पृष्ठालोके भुजङ्गी त्वहमपि समयो नाभिदृष्ट्या नरेन्द्र
शुद्धाहं गुह्यदृष्ट्याप्यहमपि सुरते दुर्जया चोरुदृष्ट्या ॥ १६३ ॥

1. CLD. महिततमा V. निहित°
2. CLDV. पात्रमुद्रा सदा
3. DV. °दृष्ट्वा
4. L योग°
5. CLDV. कथयति
6. CLD. प्राण° ; sna la lta bas

a. mar me'i rnam pas mar me ṅes par mun pa bc̆om pa daṅ ni snod kyi p'yag rgya bdud rcir 'gyur

b. p'o ña mo ni 'p'red la lta bas k'yod ni gaṅ z̆ig nas 'oṅs skal ba bzaṅ la brj̆od par byed

c. skra la lta bas bdag ni ma ma ruṅs par brj̆od skal bzaṅs la ni raṅ gi raṅ bz̆in zur gyis so

d. mjod bur lta bas bdag mc̆'og

[a]सिद्धाहं जानुदृष्ट्या कथयति नियतं चर्च्चिदा[1] पाददृष्ट्या
पादाङ्गुष्ठावलोके त्वहमपि भुवने वज्रकायैकवीरा ।
सर्वाङ्गुल्याग्रदृष्ट्या त्रिभुवननिलये सर्वगा विश्वमाता
दूतीनामेष दृष्टिः क्षितितलनिलये योगिना वेदितव्या ॥ १९७ ॥

[b]षड्भागं देहमध्ये करचरणतनौ दानमप्युत्तमाङ्गं[2]
वाचा कर्मे[3]न्द्रियाणां सगुणमपि मनस्त्विन्द्रियाणाञ्च मध्ये ।
धात्वंशं धातुमध्ये द्विपदपशुगणान्[4] तत्त्वभागेन चान्यत्
आचार्याय प्रदाय व्रजति सुखपदं दिव्यमुद्रानुविद्धः ॥ १९८ ॥

ये सत्वा लोकधातौ त्रिविधभवगता ज्ञानवज्राङ्कुशेन
आकृष्टा तान् समन्तात् परमकरुणया मण्डले चाभिषिच्य ।
बुद्धे वज्रामृतेनामलशशिवपुषा वज्रिणो लब्धमार्गाः
स्वस्थाने प्रेषणीया व्यपगतकलुषा बोधिचर्यानुरूढः[5] ॥ १९९ ॥

[c]द्रव्याभावेऽभिषेको जिनपतिवचनेनावधूतस्य देयं
एवं धर्मादिमार्गः सकलगुणनिधि र्नाडिका योगयुक्तः ।
सेवार्थं हस्तमुद्रा स्वहृदयवशगा सर्वदोषै विमुक्ता
अन्येषां नैव देयं जिनवरहृदयं मातृपूजाविहीनं ॥ २०० ॥

---

1. CD. चर्चिता V. चर्चिका
2. CLDV. °प्युत्तमाङ्गे
3. CD. कामेन्द्रियाणां, las kyi dbaṅ po rnams las
4. CLD. °गणास्तत्त्व°
5. CL. °चर्याधिरूढो D. °रूपैः ; byaṅ c̆ub spyod la rjes su gnas rnams

a. pus mor lta bas bdag ni grub pa ṅes par rjod byed rkaṅ par lta bas rju 'p'rul sbyin pa mo
b. drug c̆'a lus kyi naṅ nas lag pa rkaṅ pa lus ṅag las ni yaṅ lag mc̆'og kyaṅ sbyin pa ste
c. rjas rnams med pa'i mṅon par dbaṅ bskur rgyal ba'i bdag po'i bka' yis kun spaṅs la sbyin par bya

सेकान्ते श्रीघटानां मृदुतनुसुखदं कञ्चुकं वस्त्रयुग्मं[1]
देयं श्रीयोगिनीभ्यस्त्वपरमपि तथा कञ्चुकं वस्त्रयुग्मं ।
द्वारस्थेभ्यः[2] प्रदेयं सकलगुणकुलायात्मशक्त्या तथान्यत्
अन्ते होमं प्रकृत्य[a] स्वहृदयकमले ज्ञानसत्त्वं प्रवेश्य ॥ २०१ ॥

स्वस्थाने लौकिकान् वै सकलमपि रजो वाहयेत् शुद्धनद्यां
ताम्बूलं गन्धधूपं[3] कुसुमफलसमं शाटिकां कन्यकानां ।
दत्वाचार्यः सशिष्यः सकलगणकुलं तर्पयित्वा यथेष्टं
शिष्यस्याज्ञां प्रदाय प्र... ...या प्रेषयेत् स्व स्व धाम्नि ॥ २०२

[b]शत्रुः सिंहो गजेन्द्रो हवि[4]रुरगपतिस्तस्कराः पाशबन्धः
क्षुब्धाम्भोधि . पिशाचा मरणभयकरा व्याधिरिन्द्रोपसर्गः ।
दारिद्र्यं स्त्रीवियोगः क्षुभितनृपभयं वज्रपातोऽर्थनाशो[5]
नाशन्तस्य प्रयान्ति प्रतिदिनं[6] चरणं यः स्मरेद्योगिनीनां ॥ २०३

इति श्रीमदादिबुद्धोद्धृते श्रीकालचक्रे[7]ऽभिषेकपटलस्तृतीयः ॥

1. CLD. °युक्तं ; gos zuṅ ďag
2. CLD. द्वारान्तेभ्यः ; sgo na gnas pa rnams la
3. CLD. °पुष्पं ; dri spos me tog 'bras bur bčas daṅ
4. CLD. हरि°
5 P. °अर्थहानिः
6. CLD. स्फुटमपि ; ñin žag so sor dran byed de la
7. P. श्रीमहाकाल°

a. mt'ar ni sbyin sreg byas nas
b. dgra daṅ seṅ ge glaṅ č'en dbaṅ po me daṅ lto 'p'ye'i bdag po č'om rkun žags pas 'č'iṅ ba daṅ

चतुर्थः पटलः

[a]लब्धः सप्ताभिषेको जिनजनक मया कुम्भगुह्याभिषेकः
[b]प्रज्ञाज्ञानाभिषेको भवभयमथनो योगगम्यश्चतुर्थः ।
भूयः पृच्छामि सम्यक् जिनवरसहितं साधनं विश्वभर्त्तुः
श्रुत्वा सौचन्द्रवाक्यं वदति[1] जिनपतिः साधनं वज्रिणश्च ॥ १ ॥

चन्द्राङ्गं युग्मपादं शिखिगलमुदधि श्रोमुखं विश्ववर्णं
षट्स्कन्धं सूर्यबाहुं[2] जिनकरकमलं शून्यषड्वह्निपर्वं ।
पादाभ्यां माररुद्रं शशिरविहुतभुग् मण्डले त्रास्यमानं
लीलाक्रान्तं तमेकं त्वमवभवसमं साधयेत् कालचक्रं ॥ २ ॥

उद्याने पर्वते वा जिनवरभवने शून्यदेवालये च
सिद्धस्थाने श्मशाने सरसि सुनिलये गुप्तभूम्यां तथैव
यस्मिंश्चित्तप्रतोषो भवति नरपते साधनं तत्र कुर्यात्
कृत्वा पूर्वोक्तरक्षां खलु मृदुशयने चासने चोपविश्य ॥ ३ ॥

आदौ हृच्चन्द्रमध्ये दशदिशि विचिधान्[3] भावयेत्तत्त्वरश्मीन्
कृत्वा वक्त्रादिशुद्धिं पुनरपि गगने स्फारितानां जिनानां ।
[c]कृत्वा पूजां विचित्रां बहुभवकलुषं सञ्चितं देशयित्वा
कर्त्तव्यं साधकेन त्रिशरणगमनं कायवाक्चित्तशुद्ध्या ॥ ४ ॥

1. CLD. जगति V. गदति ; rdo rje can dag gi yaṅ sgrub t'abs gsuṅs
2. CLD सूर्यरागं V. पूर्वरागं ; ñi ma'i dpuṅ pa
3. CLD. विविधा

a. rgyal ba bskyed mjad bdag gis dbaṅ bskur bdun po rnams daṅ bum pa daṅ ni gsaṅ ba'i dbaṅ dag daṅ
b. śes rab ye śes dbaṅ bskur srid pa'i 'jigs pa 'joms pa rnal 'byor dag gis bgrod bya bźi pa t'ob
c. mc'od pa rnam pa sna c'ogs byas nas sdig pa rnam pa maṅ pos bsags pa dag ni bśags byas te

सम्बुद्धे बोधिसत्त्वे बहुविधकुशलं यत्कृतं चार्यसंघैः[1]
अनुमोदे[a] तत् समस्तं व्यपगतकलुषो बोधिचर्यानुरूढः।
बुद्धं धर्मञ्च सङ्घं भवभयहरणं [b]बोधिसीम्नः प्रयामि
सम्बुद्धोऽहं भवामि प्रणिधिमिति करोत्यत्र सत्त्वार्थहेतोः ॥ ५ ॥

शून्यं भावाद्विहीनं सकलजगदिदं वस्तुरूपस्वभावं
तस्माद् बुद्धो न बोधिः परहितकरुणा [c]चानिमित्तप्रतिज्ञा ।
एवं ज्ञात्वा समस्तं तदपि नरपते कायवाक्चित्तवज्रं
ध्यातव्यं बोधिसत्त्वैरपरिमितगुणं मण्डले मण्डलेशं ॥ ६ ॥

[d]तोयेनाग्नेर्विनाशं प्रथममिह यतिः[2] कारयेद्देहमध्ये
पश्चात्तोयं धरित्री भवति लवणवत्तोयमध्ये प्रविष्टस्य[3] ।
अन्तर्धानं हि वायुर्व्रजति नभसि तच्छोषयित्वाम्बुराशिं
चित्तं वह्नौ तमोऽन्ते विषयविरहिते स्थापयेन् मध्यभूमौ ॥ ७ ॥

शून्यं वाय्वग्नितोयान्यवनि सुरनगाब्जेन्दुसूर्याग्नयश्च
कूटागारं समन्तात् स्फुरदमलकरं [e]वज्रजं पञ्जरं वा ।
तन्मध्ये वज्रभूमौ मणिकरनिकरे मण्डलं विस्फुरन्तं
ओंकारज्ञानजातं जिनवरकमले चन्द्रसूर्यासनञ्च ॥ ८ ॥

1. CLD. कार्य° : 'p'ags pa'i c'ogs kyis
2 CLD. गतिः
3. CLDV. प्रविष्टा ; rab tu žugs

a. 'rjes yi raṅ
b. byaṅ č'ub bar du bdag ni skyabs su mč'i
c. mc'an ma'i dam bča' med pa ste
d. č'u yis mi ni rnam par ñams pa daṅ por 'dir ni lus kyi dbus su sdom brcon dag gis bya
e. rdo rje las skyes gur dag go

बाह्ये वाग्मण्डले वै वसुकमलमिदं चन्द्रसूर्यं विहीनं
बाह्ये दिक्कोणभागे दिनकरकमलं द्वारमध्ये रथाश्च ।
अर्कद्वारेषु राजन् मणिकनकमयैस्तोरणैश्च श्मशानै
द्वंयष्टस्तम्भैश्च गर्भे कुलिशमयसुसंभोगचक्रं जिनस्य ॥ ९ ॥

आद्याः काद्येन्दुसूर्येऽपि कुलिशसहिताः पञ्चकादर्शकाद्यै[1]
युक्तं तं पञ्चरश्मीन् स्फुरदमलकरं भावयेत् कालचक्रं ।
वज्रालंकारदेहं जिनकर[2]कमलं सूर्यबाहुं युगास्यं
त्रिग्रीवं सूर्यनेत्रं विकसितवदनं चार्धदंष्ट्राकरालं ॥ १० ॥

श्रीमत्योँकारजाते[3] जिनपतिकमले चन्द्रसूर्याग्निमूर्ध्नि
रुद्रानङ्गद्वयोर्हृतसुललितचरणालीढपादं[4] जिनेन्द्रं ।
मारो रक्ते च सव्ये वरचरणतले शुक्रवामे च रुद्रः ।
मध्यं सव्यावसव्यं भ्रमररविनिभं चन्द्रवर्णञ्च कण्ठं ॥ ११ ॥

स्कन्धं नीलञ्च रक्तं शशधरधवलं दक्षिणे चोत्तरे च
द्वौ द्वौ सव्यावसव्येऽसितरविवपुषौ बाहव[5]श्चन्द्रवर्णाः ।
तद्वद्वै त्र्यष्टकेन प्रहरणसहिताः पाणयश्च[6] क्रमेण
पञ्चाङ्गुल्यस्त्रिपर्वाः शशिकरकमले पञ्चवर्णाः स्फुरन्त्यः ॥ १२ ॥

---

1. D. पञ्चका दशकाद्यै° ; me loṅ la sogs lṅa rnams kyis
2. CLDV. जिनवरकमल ; rgyal pa'i p'yag gi pad ma
3. CLD. श्रीसत्त्वो° ; dpal ldan oṁ yig las skyes
4. CLD. °चरणा लीलपाद
5. CLDV. राहव°
6. CLD. प्राणय°

a. 'od zer lṅa rnams 'gyed par byed čiṅ dri ma med pa'i zer 'p'ro dus kyi 'k'or lo bsgom par bya
b. drag po lus med gñis kyi sñiṅ gar rgyal ba'i dbaṅ po šin tu rol pa'i žabs ni gyas brkyaṅ stabs
c. gyas daṅ gyas min dpuṅ pa gñis gñis dag ni nag daṅ ñi ma'i lus daṅ zla ba'i mdog rnams te

कृष्णे रक्ते च शुक्ले प्रवरकरतले संस्थितं चास्त्र[1]वृन्दं
वज्रं खड्गस्त्रिशूलं भुवनभयकरा कर्त्तिका वह्निबाणः ।
तस्माद् वज्राङ्कुशो वै सरवडमरुको मुद्गरश्चक्रमेव[2]
ªकुन्तो दण्डः कुठारो रविकरकमले दक्षिणे वज्रिणश्च ॥ १३ ॥

घण्टा खेटश्च खट्वाङ्गं विकसितमुखं रक्तपूर्णं कपालं
कोदण्डं पाशरत्ने कमलजलचरौ दर्पणः शृङ्खला च ।
ᵇवेदास्यं ब्रह्मणो यच्छिरकमलमलं वामहस्ते जिनस्य
कुर्वन्त्यो दीनवक्त्रं धृतचरणतले ᶜमाररुद्रस्य देव्यौ ॥ १४ ॥

ᵈहेमाभा वेदवक्त्रा वसुकरकमलालिङ्गिता[3] विश्वमाता
सव्ये कर्त्र्यङ्कुशो वै सरवडमरुकश्चाक्षसूत्रं क्रमेण ।
वामे शुक्तिश्चᵉ पाशः शतदलकमलं दिव्यरत्नं तथैव
ᶠप्रत्यालीढार्कनेत्रा[4] जिनपतिमुकुटा मुद्रिता मुद्रिकाभिः ॥ १५ ॥

अष्टौ देव्योष्टपत्रे वसुकरकमला वेदवक्त्रार्कनेत्राः
कोणे तासां ᵍचतस्रस्त्वहिचमरधरा वक्त्रभेदे जिनस्य ।
ईशे नैऋत्यकोणे शिखिनि च पवने धर्मशङ्खश्च गण्डी
एवं चिन्तामणिः स्याद्भवति खलु तथा कल्पवृक्षः क्रमेण ॥ १६ ॥

1. CLD. शस्त्रवृन्दं
2. P. °श्च क्रमेण ; 'k'or lo ñid
3. CLDV. °लालितां 4. D. प्रत्यालीला°

a. mduṅ daṅ dbyug pa dgra sta rnams ni rdo rje čan gyi ñi ma'i p'yag gi pa dma gyas la'o
b. c'aṅs pa'i mgo bo pa dmas brgyan pa rig byed gdoṅ ldan gaṅ yin rgyal ba'i gyon gyi p'yag na'o
c. bdud daṅ drag po'i lha mo dag gi
d. gser mdog rig byed žal ldan nor gyi p'yag gi pa dmas 'k'yud pa dag ni sna c'ogs yum yin te
e. gyon na t'od pa
f. gyon brkyaṅ ñi ma'i spyan daṅ rgyal ba'i bdag po'i čod pan p'yag rgya rnams kyis rgya yis btab pa'o
g. de dag rnams las bži ni

कृष्णायाः धूपपात्रं प्रथमकरतले शीतपात्रं द्वितीये
पिष्टं रक्तं तृतीये समदशशधरं सव्यहस्ते चतुर्थे ।
वामे घण्टा च पद्मं सुरतरुकुसुमं पुष्पमाला क्रमेण
रक्तायाः दीपहारौ समुकुटकटकं दक्षिणे वामहस्ते ॥ १७ ॥

वस्त्रं वै मेखला च स्फुरदमलकरं कुण्डलं नूपुरञ्च
पीतायाः शङ्खवेणुं समणिडमरुकं सव्यहस्ते क्रमेण ।
[a]वामे वीणा च ढक्का प्रगुणरणरणत् कंसिका काहला च
दुग्धाम्ब्वौषध्यपानं[b] त्वमृतरसफलं भक्तपात्रं सितायाः ॥ १८ ॥

दिक्पद्मेष्वब्धिबुद्धाः खलु नवनयना वह्निवक्त्रत्तहस्ताः
कोणे तारादि देव्यः पुनरपि च तयोरष्टकक्षेऽष्टकुम्भाः ।
कृष्णा रक्ता च पीता शशधरधवला देवतादैवतो च
कृष्णा श्वेतेन्दुमूर्ध्नि त्वथ विदिशिगते [c]रक्तपीतेऽर्कमूर्ध्नि ॥ १९ ॥

[d]वैगर्भाद्याश्च[1] भित्तौ[2] दिशिविदिशिगताः स्पर्शवज्रादयश्च
पूर्वे सव्येऽवसव्ये परदिशिकमले [e]विश्वभद्रस्तथैव ।
श्रीमान् वै वज्रपाणिः खलु रव[3]कुलिशा धर्मधातुः क्रमेण
जम्भस्तम्भश्च मान[4]स्त्वतिबल इति या द्वारपालः स पूर्वे ॥ २० ॥

1. CLD. वैदर्भाद्याश्च
2. CLDV. वृत्तौ
3. CLD. वरकुलिश ; sgra yi rdo rje ma daṅ
4. CLD. मार ; k'eṅs byed

a. gyon na rgyud mṅas daṅ ṅi rṅa daṅ sil sil rab tu sgrogs pa'i 'k'ar ba dag daṅ zaṅs duṅ ṅo
b. 'o ma č'u daṅ sman daṅ č'aṅ daṅ
c. dmar po ser po ñi ma'i steṅ
d. mk'a' sñiṅ la sogs rcig pa la ni p'yogs daṅ p'yogs bral du gnas reg bya rdo rje ma la sogs
e. kun tu bzaṅ po de bžin ñid

[a]प्रज्ञोत्सङ्गे ह्युपायः[1] शशधरकमले देवतानाञ्च देवी
अन्यान्यालिङ्गितौ द्वौ स्वकरसलिलजैः स्वस्वचिह्नाङ्कितैश्च[2]।
यच्चिह्नं यस्य सव्ये प्रथमकरतले सात्र[3] मुद्राब्जहोना
प्रज्ञोपायेन चक्रं परमसुखगतं [b]पद्मवज्रासनाद्यं ॥ २१ ॥

कृष्णानां खड्गकर्त्र्यौ भुवनभयकरं सव्यहस्ते त्रिशूलं
वामे खेटं कपालं भवति करतले श्वेतखट्वाङ्गमेव ।
बाणो वज्राङ्कुशो वै सरवडमरुकः सव्यहस्ते क्रमेण
[c]वामे कोदण्डपाशौ[4] स्फुरदमलमणि र्लोहितानां तथैव ॥ २२ ॥

[d]पीतानां चक्रदण्डं[5] भयकरकुलिशं सव्यहस्ते क्रमेण
श्रीशङ्खः श्रृङ्खला वै भवति च सरवा वज्रघण्टा च वामे ।
सव्ये श्रीमुद्गरो वै शशधरधवलानाञ्च [e]कुन्तस्त्रिशूलं
वामे श्वेतञ्च पद्मं शतदलसहितं दर्पणं चाक्षसूत्रं ॥ २३ ॥

वज्रं कर्त्री कुठारः प्रभवति हरितानाञ्च सव्ये क्रमेण
वामे घण्टा कपालं सकलगुणनिधि ब्रह्मवक्त्रं तदेव ।
नीलानां वेदितव्यं प्रकृतिगुणवशाद् देवतीनाञ्च[7] तद्वत्
कृष्णा रक्ता च शुक्ला द्रुतकनकनिभाः पूर्वभूम्यादिदेव्यः[8] ॥ २४

1. CD. °व्युपायः
2. CLD. °तश्च
3. D. सास्य
4. D °पाणौ
5. D. चक्रचण्डं V. °कुण्डं
6. CLD. कुन्तं
7. CLD. देवतानां
8. V. °भूम्यादिदेशे ; šar gyi sa la sogs pa'i lha mo rnams

a. šes rab pan 'par t'abs ni ri boṅ 'jin pa'i pa dma la ste lha rnams kyi yan lha mo'o

b. pa dma dan ni rdo rje'i gdan gyis bžugs

c. gžu dan žags pa dag dan dri med 'p'ro ba'i nor bu dmar po rnams kyi gyon na de bžin ñid

d. ser po rnams kyi gyas kyi p'yag na 'k'or lo dbyug pa dan ni 'jigs byed rdo rje rim pas te

अष्टौ धूमादि[1] देवो जिनपतिकमले वर्जयित्वा कदाचित्
श्रीचक्रं गर्भमध्ये भवति नरपते पञ्चविंशात्मकञ्च ।
[a]ज्ञात्वा शक्ति स्वचित्ते त्वयमपि[2] भगवान् योगिभि र्भावनीयः
सेकार्थं मण्डलं वै[3] भवति कुलवशाद् बाह्यचक्रप्रहीणं ॥ २५ ॥

बाह्ये चाष्टाष्टकेनाष्टसुकमलदलेऽष्टदिग्देवताभि-
[b]र्योगिन्यश्चर्चिकाद्याः शशिरविरहिताः वेदहस्ता[4] स्त्रिनेत्राः ।
पूर्वाब्जे चर्चिकाग्नौ खगपतिगमना शूकरी षण्मुखो च
याम्ये नैर्ऋत्यकोणे सवरुणपवने वज्रहस्ताब्धिवक्त्रा ॥ २६ ॥

रौद्रो लक्ष्म्युत्तरेशे प्रहरणसहितालिङ्गितोपायकायाः
योगिन्योष्टाष्टकायाः कमलदलगता [c]नायिकावर्णवर्णाः ।
पूर्वादौ कर्त्तिका च प्रथमकरतलात् शूलचक्रं गदा च
दण्डं खड्गश्च शक्ति र्यमकरकमले दक्षिणे चाङ्कुशो वै ॥ २७ ॥

वज्रं बाणश्च पद्मं तडिदनलनिभो ब्रह्मदण्डस्त्रिशूलं
नानारत्नै र्निबद्धः सरवडमरुकः पद्ममेवाक्षसूत्रं ।
[d]वामे शुक्तिश्च[5] खट्वाङ्गमपि च कमलं कम्बुकः[6] शृङ्खला च
खेटो वै रत्न[7]पाशौ प्रगुगरणरणद् वज्रघण्टा च चापं ॥ २८ ॥

1. CLD भूतादि ; du ba la sogs lha mo brgyad po
2. CLD. द्वयमपि
3. CD. वा
4. CLDV. वेदितव्या°
5. CLDV. शक्ति° ;
6. P[1]. जम्बुकः
7. CLD. वज्रपाशौ ; nes par rin po c'e

a. raṅ gi sems kyi nus pa šes nas bcom ldan 'di yaṅ rnal 'byor pa rnams dag gis bsgom par bya
b. ca rci kā sogs rnal 'byor ma rnams zla ba ñi ma daṅ bral rig byed p'yag daṅ spyan gsum ma
c. gco mo'i k'a dog žal rnams so
d. gyon na t'od pa daṅ ni k'a ṭwāṁ ga daṅ pad ma duṅ daṅ lcags sgrog dag daṅ p'ub daṅ ni

कुण्डीपात्रञ्च खट्वाङ्गमहिरपि च ततः तोयजं रत्नमेव
योगिन्योऽष्टाष्टकायाः कमलवसुदले शस्त्रहस्ताश्च तद्वत् ।
भीमोग्रा कालदंष्ट्रा ज्वलदनलमुखा वायुवेगा प्रचण्डा
रौद्राक्षी स्थूलनासा कमलवसुदले चर्चिकायाः स्वदिक्षु ॥ २९ ॥

ᵃश्रीमाया[1] कीर्त्तिलक्ष्म्यौ सुपरमविजया[2] श्रीजया श्रीजयन्ती
श्रीचक्री चाष्टमा वै कमलवसुदले वैष्णवी दिक्प्रदेशे ।
कङ्काली कालरात्री प्रकुपितवदना कालजिह्वा कराली
काली घोरा विरूपा कमलवसुदले शूकरी यत्र देवी ॥ ३० ॥

पद्मानङ्गा[b] कुमारी मृगपतिगमना रत्नमाला सुनेत्रा
ᶜक्षीना भद्राब्जपत्रे वरशिखिगमना नायिका यत्र राजन् ।
वज्राभा वज्रगात्रा वरकनकवती चोर्वशी चित्रलेखा
रम्भाहल्यासुतारा कमलवसुदले वज्रहस्ताधिदेवे[3] ॥ ३१ ॥

सावित्री पद्मनेत्रा खलु जलजवती बुद्धिवागीश्वरी द्वे
गायत्री विद्युदेव स्मृतिरपि कमले वेदवक्त्राधिदेवे[4] ।
गौरीगङ्गा च ᵈनित्या सुपरमतुरिता तोतला लक्ष्मणा च
पिङ्गा कृष्णा तथाष्टौ कमलवसुदले नायिका[5] यत्र रौद्री ॥ ३२ ॥

1. CLDV. श्रीर्माया
2. D. °परमविषया ; rab mčʻog rnam par rgyal ma
3. CLD. °हस्तादि° V. शुकरी यत्र देवी
4. CLDV. °वक्त्रादि°
5. CLDV. नायकी

a. gyuṅ mo sgyu ma grags dpal rab mčʻog rnam par rgyal ma dpal ldan rgyal ma dpal ldan rgyal byed ma
b. pad ma lus med gžon nu ma daṅ
c. rul ma bzaṅ mo gaṅ na goo mo mčʻog gi rma byas ʼgro maʼi čʻu skyes ʼdab la rgyal po kye
d. rtag ma šin du mčʻog tu myur ma to ta lā daṅ moʻan byed ma

श्रीश्वेता चन्द्रलेखा शशधरवदना [a]हंमवर्णा धृतिश्च
पद्मेशा तारनेत्रा विमलशशधरा चेशपद्मे सचिह्ना ।
तद्बाह्ये सूर्यपद्मे [b]दनुकवलयमाः पावकः षण्मुखश्च
यक्षः शक्रोऽब्धिवक्त्रः पशुपतिरुदधिः श्रीगणेन्द्रश्च विष्णुः ॥ ३३ ॥

खड्गः[1] कर्त्री द्रुमेन्द्रः सुरतरुकुसुमं दण्डखड्गश्च शक्ति-
र्दण्डः शक्तिश्च कुन्तो मणिरपि च गदा वज्रमेवाग्निबाणः ।
सूची[2] चाप्यक्षसूत्रं भवति करतले शूलबाणश्च पाशो
रत्नं पशुश्च वज्रं भवति हरिकरे चक्रदण्डश्च सव्ये ॥ ३४ ॥

वामे खेटं कपालं त्वसितमणिरपि ह्युत्पलं शृङ्खला च
पाशाब्जं कुण्डिका वै[c] भवति नरपते वामहस्ते क्रमेण ।
[d]रत्नादर्शश्च तद्वत् सनकुल[3]जलजं वज्रघण्टा च चापं
[e]पद्मं वै कुण्डिकाहिर्धनुरपि च तथा नागपाशश्च रत्नं[4] ॥ ३५

पाशो रत्नञ्च पद्मं भवति दनुरिपोः पाञ्चजन्यश्च शङ्खः
[f]चैत्राद्याः पद्मपत्रे वसुकरतिथयः कर्णिकायां द्विपूर्णाः ।
सर्वाः शून्यत्तलोकाः परमशशिकला वेदितव्याब्दयोगात्[5]
द्वारे देव्योरथस्यास्त्वसिकुलिशधराः[6] साङ्कुशा बाणहस्ताः ॥ ३६ ॥

1. D. खड्गं V खड्गं वीणा
2. P. शुचि D. शूचीः ; k'ab dan
3. P[1]. सुनकुल° 4. P[1]. वक्त्रं
5. D. वेदितव्याब्ज° ; lo yi sbyor bas rig par bya
6. P. °कुलिशकराः ; rdo rje 'jin dan

a. dan pa'i mdog dan 'jin ma dan
b. lha min gyo ba gšin rje
c. žags pa č'u skyes spyi blugs dag ni
d. rin č'en me lon dan ni de bžin ne le dan bčas č'u skyes rdo rje dril bu gžu dan mi
e. pad ma dan ni spyi blugs sbrul dan gžu dan de bžin klu yi žags pa dag dan rin č'en dan
f. pad ma'i 'dab ma dag la nag pa sogs kyi nor lag c'es rnams lte ba la ni rjogs pa gñis

श्रीचक्रा दण्डहस्ता प्रकृतिगुणवशान् मुद्गरा कुन्तहस्ता
श्रीकर्त्री वज्रहस्ता खलु परशुकरा शूलहस्ता तु सव्ये ।
वामे खेटाहिहस्ता[a] प्रकृतिगुणवशात् पाशकोदण्डहस्ता
श्रीशङ्खा[1] रत्नहस्ता कमलशशधरादर्शहस्ता च तद्वत् ॥ ३७ ॥

श्रीघण्टा शुक्तिहस्ता खलु भुजगकराप्येव खट्वाङ्गहस्ता
[b]मारीच्याद्येकवक्त्रा युगकरकमलाः वेदितव्या क्रमेण ।
स्तम्भाघोप्यष्टनागा घटकुलिशकराः पद्ममाणिक्यहस्ता
[c]वाय्वादौ मण्डले वै युगकरकमलाः पद्मकर्कोटकाद्याः[2] ॥ ३८ ॥

श्वानास्या शूकरास्या खलु चलवलये जम्बुकास्या च दिक्षु
व्याघ्रास्या चोत्तरस्था चितिभुवनगता कर्त्तिकाशुक्तिहस्ता ।
काकास्या गृध्रवक्त्रा खगपतिवदनोलूकवक्त्रा च कोणे
[d]वज्राक्षी चातिनीलाऽवसि[3] नभसिगते भूतयोनिश्चलान्ते ॥ ३९ ॥

[e]रक्तप्रेतं खगेन्द्रो महिषशिखिगजा हंसगो पद्मवक्त्रा-
श्चामुण्डादेः क्रमेण प्रभवति कमलान्यासनं[4] दिग्विदिक्षु ।
दैत्यादीनाञ्च तद्वद्धनपतिशिखिनोरब्धिवाय्वोर्गणस्य
[f]मातङ्गेशश्च मेषो मकर इति मृगो मूषकश्च क्रमेण ॥ ४० ॥

---

1. CLD. शङ्खश्री
2. CLD. °कर्कोटनाद्याः 3. CLD. °नीलाऽसि
4. P. कमलस्या° ; gdan du 'gyur te p'yogs dań p'yogs bra pad ma rnams su'o

a. gyon gyi p'yag na p'ub dań sbrul te
b. 'od zer čan la sogs pa žal gčig dus kyi p'yag gi pad ma rnams ni rim pas rig par bya
c. rluń la sogs pa'i dkyil 'k'or la ni pad ma stobs kyi rgyu sogs dus kyi p'yag gi pad ma rnams
d. rdo rje'i mig dań šin tu sňon mo sa 'og nam mk'a' la gnas 'byuń po'i skye gnas gyo ba'i mt'ar
e. yi dwags dmar dań mk'a' 'gro'i dbań po ma he rma bya glań po dań ba glań dań k'a lňa pa
f. glań po'i dbań po dań ni lug dań č'u srin žes dań ri dwags dań [illegible] kyi ba rim pas so

भेरुण्डः कृष्णनीलेक्षणगुदवदनाः[1] काकवक्त्रादि कोणे
खड्गो ऋक्षश्च सिंहः प्रभवति चमरी श्वानवक्त्रादि दिक्षु।
[a]वज्राक्षा[2] अष्टपादस्त्ववनितलगतौ[3] व्योम्नि नीला रथस्य
[b]सक्रूरः पञ्चवर्णस्त्वनिल इति खगः स्फीतगात्रस्त्रिनेत्रः ॥ ४१ ॥

मारीच्याः शूकराः स्यु र्हयगजहरयः सप्तसंख्या रथेषु
चुन्दायाः शृङ्खलायाः सुरयमवरुणो चोत्तरे वै भृकुट्याः।
[c]गन्धा माला च पूर्वे यमवरुणगते धूपदीपे च लास्या
[d]हास्या वाद्या च नृत्या धनदभुवितले चाम्बरे गीतकामा ॥ ४२ ॥

गर्भेऽष्टौ वेदिकायां गगनतलगते [e]तोरणाधो नियोज्यो
धारिण्यः पट्टिकायां फणिकुलसहिता वेदिकायां प्रतीच्छाः।
[f]विद्वेषस्तोभनेच्छा भवति[4] नृप तथा पौष्टिक स्तम्भनेच्छा
तारा देव्यादिशुद्धा त्रिभुवनजननी मारणोत्पादनेच्छा ॥ ४३ ॥

वाद्येच्छा भूषणेच्छा भवति नरपते भोजनेच्छा तृतीया
गन्धेच्छा चांशुकेच्छा प्रकटितनियता मैथुनेच्छा च षष्ठी।
काये कण्डूयनेच्छा वदनगतकफोत्सर्जनेऽङ्ग[5]मलेच्छा
नृत्येच्छा वासनेच्छा पयसि च शयने प्लावने मज्जनेच्छा ॥ ४४ ॥

1. Refers to a *bat* according to Me p'am
2. Refers to a *śarabha* according to Me p'am
3. CLP¹DV. °गतो   4. CLD. प्रभवति नृपते पौष्टिकं
5. CLPDV. °अङ्ग° ; lus kyi dri ma 'dod ma daṅ

a. rdo rje mig gi rkaṅ pa brgyad pa sa 'og šiṅ rta la gnas mk'a' la sṅon mo'i šiṅ rta yi
b. mk'ar bgrod k'ro ba daṅ bčas k'a dog lṅa pa lus rgyas mig gsum ldan pa a ni la žes pa
c. šar du dri daṅ p'reṅ ba ma ste gšin rje č'u la gnas pa spos ma mar me sgeg mo daṅ
d. bžad ma'o rol mo ma daṅ gar ma nor sbyin sa gži la ste mk'a' la glu ma 'dod m'ao
e. rta babs 'og tu ṅes par sbyar
f. dbye ba daṅ ni bskyod pa 'dod mar 'gyur te mi yi bdag po de bžin rgyas daṅ reṅs 'dod ma

चामुण्डाद्यष्टकृत्यान्यपि च भुवितले क्रोधजानां तथेच्छा
सन्तापे बन्धनेच्छा खलु मृदुवचने शोषणोच्चाटनेच्छा ।
स्पर्शाकृष्टौ च बन्धे भवति नरपते कीलने धावनेच्छा
सर्वाङ्गक्षोदनेच्छा प्रकटितनियता मूत्रविट्स्रावणेच्छा ॥ ४५ ॥

सत्त्वानां वञ्चनेच्छा खलु बहुकलहे पञ्चमोच्छिष्टभक्ते
[a]संग्रामेच्छाहिबन्धे भवति दनुकुले दारकाक्रोशनेच्छा[1] ।
सप्तत्रिंशत् प्रतीच्छा पुनरपि च ततो मण्डले बाह्यवेद्यां
यत्किञ्चित् सत्त्वकृत्यं प्रतिदिनसमये योगिनीकृत्यमत्र ॥ ४६ ॥

इत्येवं वज्रिणश्च त्रिभुवनसकलं मण्डलाकारमुक्तं[2]
[b]बाह्ये देहे परे च स्फुरणनिधन ते संस्थिते वस्तुजातेः ।
तस्मिन्नित्यः खवज्रस्त्रिविधभवगतोऽनित्यतां न प्रयाति
[c]नोनित्यं भूतवृन्दं भवति नरपते शक्रजालं यथैव ॥ ४७ ॥

नित्यानित्यञ्च दृष्ट्वा तदपि जडधियां[3] चित्तशुद्ध्यर्थहेतो-
र्वक्तव्यं साधनं वै नहि हृदयगतः साध्यते कश्चिदत्र ।
[d]यत् साध्यं साधकः स भ्रममिति सकलं साधनं वज्रिणो यत्
तस्माद्राजन् स्वचित्तं व्यपगतकलुषं मण्डलेशं प्रकुर्यात् ॥ ४८ ॥

1. CLD. °क्रोधनेच्छा
2. CLDV. °कार युक्तं , dkyil 'k'or rnam par gsuṅs
3. D. जलधियां blun po'i blo čan

a. gyul 'dod ma daṅ sbrul 'č'iṅ ma daṅ byis pa k'ro bar 'dod ma rnams ni lha min rigs la 'gyur
b. p'yi daṅ lus daṅ gžan la yaṅ ni spro daṅ bsdu pa dag la dṅos po'i skye ba yaṅ dag gnas
c. 'byuṅ po'i ts'ogs ni rtag pa min par 'gyur te mi yi bdag po mig 'p'rul ji bžin ñid du'o
d. gaṅ žig bsgrub bya sgrub pa de ñid 'k'rul pa žes pa rdo rje čan gyi sgrub t'abs mt'a' dag gaṅ

श्रीवज्री चित्तवज्रं भवति नरपते मण्डलं कायवज्रं
वाग्वज्रं देवतानामालिकालिकुलजं चक्रमिन्द्वर्कमूर्ध्नि[1] ।
[a]स्कन्दं नालंत्वकारो दलमपि च तथा केशराण्यप्युकारो
मध्ये श्रीकर्णिका च द्विविधपदगतौ चन्द्रसूर्यौ मकारः ॥ ४९ ॥

होःकाराद्यन्तगर्भे समसुखफलदे कायवाक्चित्तवज्रं
[b]प्रज्ञारागद्रुतं तत् शशिनमिव विभुं वज्रिणं वीक्षयित्वा[2] ।
गीतं कुर्वन्ति देव्यस्त्वमपि हि भगवन् सर्वसत्त्वोपकारी
अस्मान् रक्षा हि वज्रिन् त्रिदशनरगुरोः कामकामार्थिनीश्च[3] ॥ ५० ॥

गीतं श्रुत्वा स वज्री त्रिभुवनसकलं त्विन्द्रजालोपमं वै
दृष्ट्वोत्पत्तिं[4] करोति स्फुरदमलकरं स्फारयित्वा स्वचिह्नं ।
वज्रालङ्कारयुक्तो जिनपतिमुकुटः प्रज्ञयालिङ्गितश्च
प्रज्ञोपायेन राजन् पुनरपि सकलं मण्डलोत्सर्जनञ्च ॥ ५१ ॥

नीलाभं भीमकायं प्रहसितवदनं चार्द्धदंष्ट्राकरालं
गर्जन्तं सूर्यनेत्रं द्व्यधिकजिनकरं वेदववत्रं द्विपादं ।
[c]प्रज्ञोपायोद्भवन्तं प्रहरणसहितं प्रेषयेद्वज्रवेगं
अष्टांघ्रि स्यन्दनस्य जिनरिपुमथनं ज्ञानचक्रस्य हेतोः ॥ ५२ ॥

1. CLD. °मिन्द्वग्निमूर्ध्नि V. चन्द्रमिन्द्वर्क° ; zla ba ñi ma'i steṅ du'o
2. CLDV. चेक्षयित्वा
3. V कामकः कामिनी च
4. D. धृष्ट्वो°

a. rca ba sdoṅ bu dag ni a yig 'dab ma daṅ ni de bžin ge sar rnams kyaṅ u yig go

b. de ni šes rab č'ags pas žu ba k'yab bdag rdo rje čan yaṅ ri boṅ 'jin pa bžin bltas nas

c. šes rab t'abs las rab byuṅ mc'on č'a rnams daṅ bčas pa rkaṅ pa brgyad pa'i šin rta dag la gnas
rgyal ba'i dag ni 'joms par byed pa rdo rje šugs de ye šes 'kor lo'i slad du bskul bar bya

नाभौ हत्वाङ्कुशेन स्फुरदमलकरं ज्ञानचक्रेश्वरं वै
हस्तेष्वेवं प्रबद्धा[1] स्वकुलिशफणिना भीषयित्वा च शस्त्रैः।
[a]साध्यं कृत्वा समस्तं व्रजति पुनरसौ चालयित्वा सुचक्रं[2]
वेशं बन्धश्च तोषं समरसकरणं जम्भकादिः करोति ॥ ५३ ॥

चित्तं निष्पत्तियोगे भवति सगगनं गर्भपद्मेऽग्निमूर्त्तिः
पूर्वे श्रीकृष्णदीप्ता वरकमलदले दक्षिणे रक्तपीता।
वामे श्रीश्वेतदीप्ता भवति कुलवशात् पश्चिमे पीतदीप्ता
[b]धूमाग्नेय्यां मरीचि र्दनुजदिशि तथा[3] द्योतकेश प्रदेशे ॥ ५४ ॥ *

वायव्यां श्रीप्रदीपा मणिरपि च तरु र्धर्मगण्डो[4] च शङ्खो
वह्नौ वायौ च दैत्ये हरदिशि च तथाभ्यन्तरे कोणभागे।
पूर्वे संस्कार पृथ्वी खलु कमलगतौ दक्षिणे वेदनाम्भः[5]
वामे संज्ञा च वह्नि भवति हि पवनं रूपमेवापरे च ॥ ५५ ॥

अग्नेय्यां वायुरूपे भवति दनुपतौ वह्निसंज्ञाद्वयश्च
[c]ईशेम्भो वेदना वै मरुति च धरणी स्कन्धसंस्कारयुक्ता।
[d]देवी बुद्धान्तरालेष्वमृतरसघटाश्चाष्टकक्षप्रदेशे
घ्राणा गन्धश्च पूर्वे पुनरपरपुटे दक्षिणे नेत्ररूपे ॥ ५६ ॥

1. CLDV. प्रबद्धाः 2. CLDV. स्ववज्रं
3. P[1]. न खद्योत दीपदेशे 4. A bell to call forth the bhikṣus.
5. CD. वेदनाम्भो

* This verse has been left out in V. See note under 75

a. mt'a' dag bsgrub byar byas śiṅ 'k'or lo bzaṅ po bskyod par byas nas 'di ni slar yaṅ 'gro ba ste
b. mer ni du ba da nu'i bu yi p'yogs su smig rgyu ma daṅ dbaṅ ldaṅ p'yogs su mk'a' snaṅ ma
c. dpal ldan du ni č'u daṅ c'or ba dag ste rluṅ du 'jln ma 'du byed p'uṅ por ldan pa'o
d. lha mo saṅs rgyas bar rnams su ni le c'e brgyad kyi gnas su bdud rci'i ro yi bum pa rnams / slar yaṅ 'p'ar ma p'yi ma la ni śar du sna daṅ dri ste lho ru mig daṅ gzugs dag go

वामे जिह्वारसः स्याद् भवति हि वरुणे स्पर्शकायस्तथैव
पाताले शब्दकर्णौ भवति कुलवशाद् दक्षिणे द्वारवामे ।
[a]चित्तं वै धर्मधातु र्भवति च गगने सर्वतो द्वारवामे
आदौ चोपायषट्कं भवति जिनवशान्मण्डलस्याधिदेवं ॥ ५७ ॥

पश्चात् प्रज्ञादिषट्कं प्रकटमधिपतिः स्व स्व पद्मासने च
पूर्वद्वारे प्रचण्डस्त्वसिघृगतिबलः स्तम्भकी तस्य मुद्रा ।
सव्ये जम्भश्च मानी भवति च धनदे मानको जम्भकी च
स्तम्भश्चानन्तवीर्या भवति हि वरुणे द्वारमध्यस्य पद्मे ॥ ५८ ॥

मारीची नीलदण्डोऽचल इति भृकुटी शृंखलाऽनन्तवीर्यः
टक्किश्चन्दारथस्या[b] सुरधनदपरे दक्षिणे द्वारमध्ये ।
[c]सुम्भो रौद्रेक्षणाद्यो भवति नभसि चोष्णीष एवातिनीला
पूर्वद्वारापरोर्ध्वे[1] भवति च नियतं स्यन्दनश्च द्वयोश्च ॥ ५९ ॥

वाग्जाते मण्डले वै भवति वसुदिशाश्चासनं[2] भूतजानां
चामुण्डेन्द्रश्च पूर्वे भवति शिखिनि वै वैष्णवो वेदवक्त्रः[3] ।
याम्ये रुद्रो वराही भवति दनुपतौ षण्मुखी विघ्ननाथः
ऐन्द्री दैत्यो परे स्यात् खलु युगवदना[4] मारुते विष्णुरेव ॥ ६० ॥

1. CD. °परार्धे , šar gyi sgo yi steṅ daṅ gžan du yaṅ ni
2. CLDV. स्वासनं , 'byuṅ po las skyes rnams kyi gdan du 'gyur
3. CD. °वक्त्राः ; rig byed gdoṅ
4. Refers to ब्रह्माणी according to Me p'am.

a. nam mk'a' la ni ṅes par sems daṅ č'os kyi dbyiṅs su 'gyur te šar gyi sgo yi gyon du'o
b. 'dod pa cun dā šiṅ rta la gnas
c. gnod mjes drag spyan ma ni 'og tu 'gyur žiṅ mk'a' la gcug tor daṅ ni šin tu sṅon mo ñid

यक्षे रौद्री यमः स्याद् भवति पशुपतौ षण्मुखश्चैव लक्ष्मीः
बाह्येन्द्रद्वारसव्ये भवति दनपती राक्षसी तस्य मुद्रा ।
वह्नौ वायुः प्रचण्डा हवि[1]रपि वरुणा दक्षिण[2]द्वारसव्ये
लक्ष्मीः श्री[3]षण्मुखो वै भवति दनुपतौ पश्चिमे वायवीन्द्रौ ॥ ६१

वायौ ब्रह्मा च विद्युद् भवति हि धनदे सागरः शूकरी च
[a]कौमारीशे गणेन्द्रः खलु धनदयमद्वारयो र्वामभागे ।
रुद्रः कालश्च विष्णु र्धनद इति सुरे चापरे द्वारवामे
[b]तेषां मुद्रा प्रसिद्धा भवति गिरिसुता यामिनी श्री र्धनेशा ॥ ६२ ॥

बाह्ये नागाः समस्ताः सुरयमधनदे पश्चिमे वेदिकायां
पद्मः कर्कोटको वै चलवलयगतौ वासुकिः शंखपालः ।
वह्निस्थौ[4] तोयमूर्ध्नि प्रभवति कुलिकोऽनन्तनागः प्रसिद्धः
[c]तद्वद् भूमण्डलस्थो भवति कुलवशात् तक्षको वै महाब्जः ॥ ६३ ॥

तेषां प्रज्ञाः प्रचण्डाश्चितिभुवनगताः श्वानवक्त्रादयश्च
तासां पद्माद्युपायास्त्वपरकुलवशात् सत्सुखार्थं भवन्ति ।
[d]श्वानास्या पूर्वचक्रे चलवलयगता शूलभेदे श्मशाने
याम्ये वै शूकरास्या खलु शवदहने चोत्तरे व्याघ्रवक्त्रा ॥ ६४ ॥

1. CLDV. हरि° ; rab gtum ma ste me daṅ
2. CD. दक्षिणे ; lho yi gyas su'o
3. CD. श्रीः षण्° ; dpal ldan gdoṅ drug pa daṅ dpal mor 'gyur te
4. D. वह्निस्थौ ; me la gnas pa dag ste

a. dpal ldan du ni c'ogs kyi dbaṅ po gžon nu ma ste nor sbyin gšin rje'i sgo yi gyon gyi c'ar

b. de dag rnams kyi p'yag rgyar rab grags ri sras gšin rje ma daṅ dpal mo nor gyi dbaṅ mor 'byuṅ

c. de bžin sa yi dkyil 'k'or la gnas rigs kyi dbaṅ gis 'jog po daṅ ni pad ma c'en por 'gyur

d. gyo ba'i k'or yug la gnas šar kyi dur k'rod rce mos 'bigs par 'k'or lo la ni k'yi gdoṅ ma

[a]स क्लिन्ने पूतिगन्धे भवति च वरुणे जम्बुकास्या तथैव
उच्छिष्टे घोरयुद्धे शिखिनि दनुपतौ काकवक्त्रा सगृध्रा ।
वायव्ये सर्पदष्टे[1] खगपतिवदना चेश्वरे[2] बालमृत्यौ
चक्रस्थोलूकवक्त्रा महिषवलयगतौ चन्द्रसूर्यौ च माध्यौ ॥ ६५ ॥

[b]प्रत्यालीढं हि मातु र्भवति समपदं यत्र देवीगणस्य
प्रत्यालीढं विशाखं[3] दशवसुगणयो र्मण्डलब्रह्मासुराणां
प्रत्यालीढे स्थितानां खलु भवति समापत्तिरालीढपादः
वैशाखाख्यं विशाखे भवति च नियतं मण्डलं मण्डले च ॥ ६६ ॥

[c]शेषाः वज्रासनस्थाः प्रकटितनियता देवता मण्डले च
देव्यः पद्मासनस्थाः स्वकुलदिशिगताः स्व स्व पद्मेन्दुमूर्ध्नि ।
देवाः वज्रासनस्थाः फणिकुलसहिताः स्व स्व दिग्वाहनस्थाः
[d]पद्मे देव्यः सुराणां खलु ललितपदा भूतजानां तथैव ॥ ६७ ॥

सव्यैराकुञ्चितैश्च क्षितितलनिहितैः सारितै र्वामपादैः[4]
प्रत्यालीढं पदं तद् भवति नरपते सार्धहस्तद्वयेन ।
आलीढं वामयोगाद् भवति समपदं पादयुग्मे समे च
वैशाखं मण्डलं यद् भवति गुणवशाज् जानुयुग्मप्रसारात् ॥ ६८ ॥

1. CD. सर्पदंशे V. सव्यतस्ते ; sbrul gyis zos par
2. CD. चोत्तरे ; dbaṅ ldan du yoṅ
3. V. हि शाखं
4. CD. °बालपादैः ; rkaṅ pa gyon pa brkyaṅ ba dag

a. stag gdoṅ ma ste ču ru rnag gi drir ni de bžin ñid du če spyaṅ dag gi gdoṅ mar 'gyur
b. gyoṅ brkyaṅ ba ni yum gyir 'gyur te mñam pa'i stabs ni 'dab ma rnams kyi lha mo'i c'ogs kyi'o
c. dkyil 'k'or du yaṅ lhag ma'i lha rnams rab tu gsal žiṅ ṅes par rdo rje gdan gyis gnas pa ste
d. lha rnams 'dab mar lha mo rnams ni rol pa'i stabs te 'byuṅ po las skyes rnams kyi de bžin ñid

किञ्चिज्जान्वर्धवक्रे[1] भवति हि ललितं शेषमेवं प्रसिद्धं
[a]ज्ञातव्यं योगिना वै पुनरपि भरते[2] वज्रनृत्यस्य हेतोः ।
वज्रस्यान्योन्य वज्रो भवति हि मुकुटे पञ्चबुद्धाः कदाचित्
रूपस्याक्षोभ्य ऊर्ध्वं स्फुटकमलवरस्यैव वैरोचनः स्यात् ॥ ६९ ॥

[b]रत्नेशस्याब्जधारी प्रवरमणिकरोऽमोघसिद्धेश्च मौलौ
[c]षण्णां मौलि र्जटाख्या[3] भवति गुणवशाच्छेषचक्रस्य चान्यत् ।
भूमौ चक्रप्रसूति र्भवति हि कमलस्योदकेऽग्नौ मणेश्च
वायौ खड्गस्य शून्ये भवति हि कुलिशस्याक्षरे कर्त्तिकायाः ॥ ७० ॥

वस्त्रं पीयूषपात्रं प्रभवति हि तथादर्शमाला च वीणा
[d]षष्ठो धर्मोदयो वै क्षितिजलहुतभुग् मारुताकाशशान्तात् ।
खेटं कुन्तश्च बाणं परशुडमरुकौ पञ्चचिह्नानि तद्वत्
दण्डः पाशोङ्कुशो वै भवति खलु तथा मुद्गरश्च त्रिशूलं ॥ ७१ ॥

कोदण्डश्चोत्पलं वै पुनरपि च तथा वक्त्र[4] खट्वाङ्गघण्टाः
[e]एवं वै शृङ्खलाद्यं जलचर[5] चषकं द्वीपिचर्मेभचर्म ।
शेषाण्यत्रोपचिह्नान्यवनिजल हुताशानिलाकाशजानि
ज्ञातव्यान्येव तानि प्रकृतिगुणवशाद् देवता दैवतानां ॥ ७२ ॥

1. D. वज्रे ; čuṅ zad pus mo p'yed ni 'k'yog pa
2. CDV. पुनरपि च भवेद्
3. D. यथाख्या
4. CD. वज्र ; mgo bo daṅ ni
5. CD. जलधर चमकं ; č'u na rgyu ba t'od pa

a. slar yaṅ rnal 'byor pa yis bha ra ta las šes par bya ste rdo rje gar gyi slad du'o
b. rin č'en dbaṅ po'i č'u skyes 'jin daṅ don yod grub pa'i čod pan la ni rab mč'og nor bu'i p'yag
c. drug ni rol pa'i čod pan čan du 'gyur te yon tan dbaṅ gis lhag ma'i 'k'or lo yi yaṅ gžan
d. drug pa č'os 'byuṅ ṅes par sa daṅ č'u daṅ bsreg za rluṅ daṅ nam mk'a'i ži ba dag las so
e. de bžin lčags sgrog la sogs č'u na rgyu ba t'od pa stag lpags daṅ ni glaṅ po'i pags pa ste

लाद्या[1] स्त्रिंशत्स्वरा ये क्षितिजलहुतभुग् मारुताकाशजाताः
चिह्नानां ते स्वमन्त्राः[3] क्रमपरिरचिता ह्रस्वदीर्घप्रभेदैः ।
चक्रादीनां समस्ताः खलु कमलगताश्चन्द्रसूर्यासनस्थाः
षष्ठं यत्रैव चिह्नं भवति गुणवशात् तत्र चानाहतं स्यात् ॥ ७३ ॥

नादः श्रीवज्रसत्त्वो भवति नरपते चित्तवज्रस्त्वकारः
[a]ह्रस्वेकारश्च खड्गी भवति च पुन ऋकारश्च वै रत्नपाणिः ।
[b]ह्रस्वोकारोऽमिताभो भवति पुनर्लृकारोऽत्र वैरोचनश्च
दीर्घं भावप्रभेदैः सुरगणसकलं षड्जिनानां क्रमेण ॥ ७४ ॥

श्रीमाताऽनाहताख्या भवति खलु [c]तथाकारजाकाशधातुः
[d]ईॠऊॡ क्रमस्था मरुदनलजल[2]क्ष्मासु सर्वा भवन्ति ।
अन्योन्यं कायभावौ परमजिनपति विश्वमाता सुखार्थं
अक्षोभ्यः शून्यधातुस्त्वसिकरकमलौ लोचना कायभावौ ॥ ७५ ॥ *

रत्नेशा मामकी च त्वपि कमलधरः पाण्डरा कायभावौ
तद्वच्चक्री च तारा प्रकृतिगुणवशात् ह्रस्वदीर्घस्वरैश्च ।
अंकारो विश्वभद्रो भवति तनुवशाद् वज्रपाणिस्त्वकारः
[e]ह्रस्वेकारः[4] खगर्भोऽरि[5] भवति तथा भूमिगर्भश्च सम्यक् ॥ ७६ ॥

---

1. CD. नाड्या ; gaṅ žig li la sogs pa
2. P स्वमन्त्रा ; raṅ gi sṅags   3. CD. °जलहुतभु
4. CD. ह्रस्वोकार ; e yig t'uṅ ṅu   5. P¹ गर्भोऽपि च तथा

* This verse has been marked 75 instead of 74 in V and the total number of verses in V in this paṭala has thus become identical with other Mss. See note under 54.

a. i yig t'uṅ ṅu ral gri ldan par 'gyur te slar yaṅ ri yig dag ni p'yag na rin č'en no
b. u yig t'uṅ ṅu snaṅ ba mt'a' yas su 'gyur slar yaṅ 'dir ni li yig rnam par snaṅ mjad do
c. de bžin ā yig las skyes nam-mk'a'i k'ams
d. rluṅ daṅ me daṅ č'u daṅ sa rnams la ni ī ṝ ū ḹ t'ams čad rim pas gnas par 'gyur
e. e yig t'uṅ ṅu nam mk'a'i sñiṅ po ar yig dag kyaṅ de bžin yaṅ dag sa yi sñiṅ por 'gyur

ओकारो लोकनाथोऽलपि भवति ªतथा चात्र विष्कम्भिकायः
आकारो[1] धर्मधातु र्भवति खलु तथा[2] ःकारजा शब्दवज्रा ।
ऐकारः[3] स्पर्शवज्रा खलु ᵇरसकुलिशार्कारजा कायभेदात्
औकारो रूपवज्रा भवति नृप ᶜतथाल्-कारजा गन्धवज्रा ॥ ७७ ॥

ᵈश्रीभद्रो धर्मधातुस्त्वपि रव[4]कुलिशा वज्रपाणिश्च युग्मं
वैगर्भो गन्धवज्रा वररसकुलिशा लोकनाथश्च युग्मं ।
भूगर्भो रूपवज्रा भवति हि युगलं स्पर्शविष्कम्भिनो च
एवं वै कुलानि प्रकृतिगुणवशाद् वेदितव्यानि सम्यक् ॥ ७८ ॥

हंकारोष्णीषचक्रो भवति तनुवशादत्र हश्चातिनीला
सुम्भो ह्रस्वो हकारो भवति नृप तथा दीर्घजा रौद्रनेत्रा ।
यंलाः युग्मक्रमेण प्रकटप्रतिबलः स्तम्भकी चैव युग्मं
रंवाः जम्भश्च मानी वमपि र इति वै मानको जम्भकी स्यात् ॥ ७९ ॥

लं याः स्तम्भोऽतिवीर्या भवति यवरलं नीलदण्डोऽचलश्च
ᵉटक्किश्चानन्तवीर्यो भवति तनुवशाद् देवतोनाश्च दीर्घाः ।
यावारालास्तथा स्यु र्गजतुरगहरि स्यन्दने शूकरे च
मारोच्चो नीलदण्डोऽचल इति भृकुटी शृंखलानन्तवीर्यः ॥ ८० ॥

1. D. आः कारो
2. D. तथा आकार° ; de bžin āḥ yig las skyes sgra yi rdo rje ma
3. D. एकारः ; ai yig
4. CD. वरकुलिशा

a. de bžin 'dir ni rnam par sel bar 'gyur te lus kyis so
b. lus kyi dbye bas ār yig las skyes ro yi rdo rje ma
c. de bžin āl yig las skyes dri yi rdo rje ma
d. dpal ldan bzaṅ po č'os kyi dbyiṅs daṅ p'yag na rdo rje daṅ ni sgra yi rdo rje ma dag zuṅ
e. 'dod pa daṇ ni mt'a' yas bcon 'grus su 'gyur lus kyi dbaṅ gis lha mo rnams kyi riṅ po ste

टक्किश्चुन्दा च युग्मं भवति नरपते मण्डले सत्सुखार्थं
[a]आकारा[1]वं विसर्गो ह-मपि ह-इति हहा-कारजाः शक्तयोऽष्टौ ।
कुम्भेष्वेवं हकारो मरुदनलजलक्ष्मासुरे भेदितः स्यात्
ॐ हूं हो: आश्च शंखस्त्वमलगुणमणिश्चांघ्रिपो धर्मगण्डी ॥ ८१ ॥

चामुण्डा वै हकारो ह-मपि हः-इति चापीश्वरी शूकरी च
हा क्ष क्षा क्षं क्ष ऐन्द्री खगपतिगमना [2]ब्रह्मिका श्रोः कुमारी ।
ह्री ह्ली हू ह्लो[3] च पृष्टे वरकमलदले ह्रस्वमात्राग्रतश्च
क्षो क्षृ क्षू क्ष्लो[4] तथैव प्रकटितनियता ह्रस्वमात्राश्च तद्वत् ॥ ८२ ॥

[b]पूर्वे सव्येऽवसव्ये वरुणहविदनावीश वाय्वोश्च पद्मे
याद्याः षण्मात्रभिन्नाः क्रमपरिरचिताः षड्दले ह्रस्वदीर्घाः ।
[c]हिक्ष्यादावन्तसर्वा वसुफणिगुणिता देवतीनां दलेषु
चामुण्डाद्येरुपायो भवति कुलवशात् सम्मुखो मन्त्रभेदैः ॥ ८३ ॥

तं नः शक्रोऽब्धिवक्त्रः वर्मिति मः-इति वै सागरः श्रीगणेन्द्रः
टं णोः वह्निः कुमारो चमपि ञः-इति वै राक्षसेन्द्रश्च वायुः ।
कं ङोः विष्णुश्च कालो हर इति धनदो वै [5]समत्र ङकः एव
[d]चाद्याः वर्गाः समात्राः सुरकमलदले देवतीनां भवन्ति ॥ ८४ ॥

1. CD. आकारावं V. माकाराद्य
2. CD. ब्रह्मका
3. CD. डाहीह्रह्रत पृठे
4. CDV. क्षो क्षृ क्षु क्षू
5. CDV. षमत्र ; san dan 'dir ni

a. a yig dag dan am dan rnam par bčad pa ham dan hab dan ha hā las skyes nus ma brgyad

b. šar dan gyas dan gyas min č'u dan me dan lha min dban ldan dan ni rlun gi pad ma la

c. hi kṣi la sogs la mt'a' t'ams čad nor ni gdeṅs čan gyis bsgyur lha mo rnams kyi 'dab ma la

d. rca sogs sde pa dbyaṅs dan bčas pa rnams ni lha yi pad ma'i 'dab mar lha mo rnams kyir 'gyur

चैत्रादिनां तिथीनां ऋतुनियमवशात् शून्यषड्वह्निसंख्या
तत्त्वारूढो हकारो मरुदनलजलक्ष्मासु पूर्वाद्यहीनां ।
कूटस्थाः सप्तवर्गाः क्ष-य-र-व-ल-युताश्चासुरीणां श्मशाने
प्रज्ञोपायाङ्गभावे भवति कुलवशात् सम्मुखो [1]योऽत्र यस्य ॥ ८५

श्रीवज्री विश्वभद्रो भवति कुलवशाद् वज्रधृग् वज्रपाणिः
वेगर्भोऽमोघसिद्धि र्विमलमणिकरो भूमिगर्भश्च सम्यक् ।
विष्कम्भो चक्रपाणि र्भवति कुलवशाल्लोकनाथोऽमिताभः
श्रीमाता धर्मधातुस्त्वपिरवकुलिशा [2]वज्रधात्वीश्वरी च ॥ ८६ ॥

श्रीतारा स्पर्शवज्रा खलु रसकुलिशा पाण्डरा जातिभेदात्
रूपाख्या मामकी वै भवति कुलवशाल्लोचना गन्धवज्रा ।
क्रोधेन्द्रो वज्रवेगो भवति जिनपति र्विश्वभद्रः स एव
उष्णीषोऽक्षोभ्य एवात्र पुनरतिबलोऽमोघसिद्धिः प्रसिद्धः ॥ ८७ ॥

जम्भो वै रत्नपाणि र्भवति कुलवशान् मानकश्चामिताभः
[a]स्तम्भो वैरोचनश्च प्रभवति बलवान् वज्रपाणिश्च सुम्भः ।
[b]वेगर्भो नीलदण्डः प्रकृतिगुणवशाद् भूमिगर्भश्च टक्किः
विष्कम्भी चातिवीर्यो भवति कुलवशाल्लोकनाथोऽचलश्च ॥ ८८

---

1. CD. °मुखोऽत्र V. °अत्रे व
2. CD. धर्मधात्वीश्वरी ; rdo rje dbyiṅs kyi dbaṅ p'yug ma

a. riṅs byed daṅ ni rnam par snaṅ mjad du 'gyur stobs ldan p'yag na rdo rje dag daṅ gnod mjes so

b. mk'a' sñiṅ daṅ ni dbyug pa sṅon po raṅ bžin yon tan dbaṅ gis sa yi sñiṅ po 'dod pa'o

मारता क्रोधेन्द्रमुद्रा भवति कुलवशाद् धर्मधातुस्तथैव
शून्याख्या चातिनीला मरुदनलजलक्ष्मादयोऽनन्तवीर्या ।
जम्भी मानी क्रमेण प्रकटितनियता स्तम्भकी च प्रसिद्धा
रौद्राक्षो शब्दवज्रा भवति कुलवशात् शृङ्खला स्पर्शवज्रा ॥ ८९ ॥

मारीचो गन्धवज्रा प्रभवति भृकुटी चैव चुन्दा प्रसिद्धा
ज्ञातव्या जातिभेदात् खलु रसकुलिशा रूपवज्रा नरेन्द्र ।
स्तम्भः कालान्तकोऽत्रैव पुनरतिबलो विघ्नशत्रुः प्रसिद्धः
[a]जम्भः प्रज्ञान्तको वै प्रभवति च तथा मानकः पद्मशत्रुः ॥ ९० ॥

चामुण्डा [1]शूकरीशा मरुदनलजलक्ष्मा तथैन्द्री चतुर्थी
गन्धो रूपं रसः स्पर्श इति [b]चलहरे[2] दैत्यवह्नौ स्थिताश्च ।
ब्रह्मा वैरोचनो वै भवति कुलवशात् सागरश्चामिताभो
वह्निः श्रीरत्नपाणि र्भवति हि पवनोऽमोघसिद्धिस्तथैव ॥ ९१ ॥

अक्षोभ्यो दैत्यशत्रु र्भवति [3]जिनपतिः शङ्करश्च प्रसिद्धः
विष्कम्भो यः स शक्रो भवति[c] गणपति र्लोकनाथस्तथैव ।
भूगर्भः षण्मुखः स्याद् भवति दनुपतिः श्रीखगर्भः प्रसिद्धः
कालः श्रीवज्रपाणि र्भवति धनपति र्विश्वभद्रश्च षष्ठः ॥ ९२

---

1. D. शूकरी सा ; p'ag mo dbaṅ p'yug ma daṅ de bžin dbaṅ mo
2. P. बलहरे
3. CD. वरपते: ; rgyal ba'i bdag po

a. rmugs byed šes rab mt'ar byed rtag tu rab tu 'gyur te de bžin k'ens byed daṅ ni pad ma'i dgra
b. gyo ba 'k'rog byed lha min mer ni gnas pa yaṅ
c. rnam par sel ba gaṅ de brgya byin du 'gyur

ᵃषड् विद्याः षट् च वज्राः प्रकृतिगुणवशात् स्व स्व मुद्राश्च तेषां
मुद्रा विद्यादयोऽर्काः सुरवरपतयः श्वेतकृष्णाश्च पूर्णाः ।
तेषां याः पद्मपत्रे वसुकरतिथयो माघमासादयस्ताः
षण्मासे पूर्वषट्कं भवति कुलवशाच्चापरं देवतोनां ॥ ९३ ॥

ये नागाष्टौ घटास्ते विभुकमलदले शक्तयस्ताः प्रचण्डाः
श्रीवृमा काकवक्त्रा भवति कुलवशात् गृध्रवक्त्रा मरीचिः ।
खद्योतोलूकवक्त्रा खगपतिवदना श्रीप्रदीपा प्रसिद्धा
ᵇश्वानास्या कृष्णदीप्ता सुविकृतवदना शूकरास्यार्कदीप्ता ॥ ९४ ॥

व्याघ्रास्या श्वेतदीप्ता भवति कुलवशाज्जम्बुकी पीतदीप्ता
एवं लास्यादि सर्वाः प्रकटदशविधा विश्वमातावशेषाः ।
दिव्या बुद्धाश्च विद्याः सतरुसकलशाः शुद्धकायो जिनस्य
क्रोधेन्द्राः बोधिसत्त्वाः खलु रसकुलिशा धर्मकायः स एव ॥ ९५ ॥

योगिन्यो भोगकायः प्रवररथगताः सूर्यदेवाः प्रसिद्धाः
अष्टौ नागाः प्रचण्डाः परिजनसहिताः बुद्ध निर्माणकायः ।
ᶜएवं भूयो द्विभेदो भवति जिनतनु र्बाह्यतोऽभ्यन्तरे च
गर्भोत्पत्ति र्यथैव प्रभवति नियता मण्डले तद्वदेव ॥ ९६ ॥

---

a. rig ma drug daṅ rdo rje drug ni raṅ bžin yon tan dbaṅ gis de rnams raṅ raṅ p'yag rgya ste (The Derge version reads here : rig ma drug daṅ p'yag rgya drug ni···षड्विद्या षट् च मुद्रा, which does not agree with any of the Mss.)

b. nag mo 'bar ma, k'yi gdoṅ ma ste dmar mo 'bar ma šin tu rnam 'gyur bžin ldan p'ag gdoṅ ma

c. de bžin slar yaṅ rgyal ba'i sku ni dbye ba gñis su 'gyur te p'yi rol dag daṅ naṅ la yaṅ/mṅal nas skyes pa ji lta ba ñid de bžin k'o na dkyil 'k'or la ni ṅes par rab tu 'gyur

शास्ता दिव्यादिकुम्भाः सहजिनतनु मण्डले गर्भमध्ये
बुद्धाद्या धर्मकायः खलु [1]रसकुलिशाद्याश्च संभोगकायः ।
[a]क्रोधा निर्माणकायो भवति कुलवशान् मण्डले गर्भसंस्थाः
चामुण्डाद्यष्टदेव्यः परिजनसहिताः शुद्धकायो हि बाह्ये ॥ ९७ ॥

देवाद्या धर्मकायः सकलफणिकुलं चात्र संभोगकायः
चण्डा निर्माणकायो भवति नरपते सर्वसत्त्वार्थहेतोः ।
[b]युग्मं स्यात् कायवज्रं सहजजिनतनु बिम्बनिष्पत्तिहेतोर्
वाग्वज्रं धर्मकायो भवति च युगलं धर्मता देशनार्थं ॥ ९८ ॥

चित्तं संभोगकायो युगलमपि भवेत् सर्वसत्त्वार्थकर्ता
ज्ञानं निर्माणकायो भवति हि युगलं प्राणिनां मोक्षदं वै ।
प्रज्ञोपायाङ्गभावैः समविषमकुलै र्योगिना वेदितव्यं
चन्द्रादित्यादिकाद्यैस्त्रिविधभवगतै र्ज्ञानविज्ञानभेदैः ॥ ९९ ॥

वज्रैः स्वाहानुयुक्तैः [c]शिरसिगलहृदो नाभिगुह्ये च मूर्ध्नि
एतैश्चाधिष्ठिताङ्गं परमजिनपतिं स्थापयेद् दैवतोभिः ।
शून्ये वै धर्मधातौ त्रिकुलिशसमये ज्ञानपूजानुरागे
वक्तव्यं साधकेन त्रिशरणगमनात् तत्स्वभावात्मकोहं ॥ १०० ॥

1. P. रव ; ro yi rdo rje

a. k'ro bo sprul pa'i sku ru 'gyur te rigs kyi dbaṅ gis dkyil 'k'or gyi ni sñiṅ por yaṅ dag gnas

b. sku yi rdo rje lhan čig skyes pa'i sku ni zuṅ du 'gyur te gzugs ni rjogs pa'i slad du'o

c. mgo daṅ mgrin pa sñiṅ ga lte ba gsaṅ ba spyi bor te

कुम्भे धूमादिभिश्च प्रभवति हृदये चाष्टभि धर्मचक्रं
विद्याभिश्चैव बुद्धैः शिरसि च सहजं षोडशारं प्रसिद्धं ।
कण्ठे संभोगचक्रं द्विगुणनृपतिभि र्बोधिसत्त्वादिभिः स्यान्
नाभौ निर्माणचक्रं वसुफणिगुणिताभिश्च भीमादिभिः स्यात् ॥ १०१ ॥

[a]बाह्वोः पादस्य सन्धौ नवतियुगहतैः कर्मचक्रं सुरैश्च
[b]चण्डा नागैः क्रियाख्यं भवति नृपतिभिश्चाङ्गुलीपर्वसन्धौ ।
श्रीवज्री कालशुद्धा भवति नरपते वर्षमासादिभेदैः
चित्ताकारो न चार्कः प्रतिदिवसवशाद् विश्वमाता विशुद्धा ॥ १०२ ॥

धूमाद्या वायुशुद्धाः स्वहृदयकमले नाभिचक्रे स्थिताश्च
[c]रुद्रः क्लेशैः सभार्यो विभुचरणतले मारवृन्दैश्च मारः ।
शंखो गण्डो मणिश्च द्रुम इति च तथा कायवज्रादिभिश्च
कुम्भाश्चाष्टामृताङ्गं जयविजय[1]घटो बोधिचित्तादिना च ॥ १०३ ॥

संस्कारोऽमोघसिद्धि र्विमलमणिकरो वेदना चामिताभः
संज्ञारूपं हि चक्री [2]शशिबलरुधिरै मूत्रविट्भ्यां विशुद्धाः ।
षट् देव्यो धातुभि वैं विषयविषयीभि र्बोधिसत्त्वाः समुद्राः
[d]पञ्च क्रोधाबले वैं खलु पुनरपराश्चेन्द्रियैः पञ्च चान्यैः ॥ १०४ ॥

---

1. 1. CLD °घटैर्
2 CLDP. शशिपल ; ri boṅ čan daṅ stobs k'rag.

a. lag pa rkaṅ pa'i c'igs la lha rnams kyi ni las kyi 'k'or lo dgu bču dus kyis bsnun pa ste
b. klu daṅ gtum mo mi yi bdag po rnams kyis sor mo'i c'igs kyi mc'ams la bya ba žes byar 'gyur
c. ñon moṅs rnams kyis drag po č'uṅ mor bčas pa k'yab bdag žabs kyi 'og tu bdud kyi c'ogs kyis bdud
d. k'ra bo lṅa ni stobs rnams kyis te ṅes par slar yaṅ gžan pa lṅa ni dbaṅ po gžan rnams kyis

चामुण्डाद्यष्टयामैः कमलदलगताः सूर्यलग्नै घंटोभि-
र्दैत्याद्याः सूर्यमासैः कमलदलगता नाडिकाश्वाससंख्यैः ।
नागाश्चण्डाश्च गुह्ये द्विगुणनृपतिभि र्नाडिकाभि र्विशुद्धाः
एवं चेष्ट्याद्यस्ताः प्रकृतिगुणवशात् कायकृत्ये विशुद्धाः ॥ १०५ ॥

केशैः [1]सिद्धाः समस्ताश्चितिभुवनगतं लोमभि [2]र्भूतवृन्दं
तत्त्वैरस्त्राणि[3] मन्तुः प्रकृतिगुणवशाद् धातुभि र्बाह्यमुद्राः ।
वज्रैरध्यात्ममुद्राः पविधरहृदये संस्थिताश्चन्द्रमूर्ध्नि
श्रीवज्री विश्वमाता त्रिविधभवगता चाक्षरज्ञान[4]योगात् ॥ १०६ ॥

[5]श्रीशुद्धात् धर्मकायो भवति खलु सुसंभोगकायो हि धर्मात्
भोगान् निर्माणकायो भवति जिनपतेः सर्वसत्त्वार्थहेतोः ।
तुर्यावस्था सुसुप्ता खलु पुनरपरा कायभेदात् तु जाग्रा
एवं [6]कायप्रभेदै र्विहरति च मनः प्राणिनोऽङ्गे चतुर्धा ॥ १०७ ॥

[7]निर्माणे भोगकर्त्तृ प्रभवति हि मनः कायवागिन्द्रियैश्च
[a]संभोगेऽदृष्ट[8]चिन्तां व्रजति गुणवशाद् धर्मकाये च निद्रां ।
[b]शुद्धे सौख्यं प्रयात्यत्र[9] दिननिशिसमये बिन्दुमोक्षे श्रयान्ते
तस्मात् तद् भावनीयं[10]दिननिशिसमये योगिना चाक्षरार्थं ॥ १०८ ॥

---

1. V. शुद्धाः ; skra rnams kyis ni grub pa
2. CV. भूत्यवृन्दं ; 'byuṅ po'i ċ'ogs
3. CD °रन्त्राणि V. रत्नाणि ; de ñid rnams kyis gco bo'i mc'on c̆'a
4. All the Mss.read योगात् but the Derge version reads *dbye ba las* (भेदात्)
5. CDV. शुद्धा ; dpal ldan dag pa las ni
6. P' काये ; de ltar sku yi rab tu dbye bas
7. CD. निर्माणो 8. CD. संभोगे दृष्टि° V. संभोगेऽदृष्टि
9. CDV. प्रयाति त्वनुदिनसमये
10. CDV. प्रतिदिनसमये ; ñin mc'an dus su

a. loṅs spyod rjogs la ma mt'oṅ sems par 'gyur te yon tan dbaṅ gis c̆'os kyi sku la gñid kyaṅ ṅo
b. dag pa la ni bde bar rab 'gyur 'dir ni ñin mo'an dus su t'ig le grol ba gsum gyi mt'ar

[a]वामे प्राणप्रचारः प्रभवति [1]च [2]तथाकुञ्चनं दक्षिणे यत्
प्रत्यालीढं पदं तत् समपदमपरालीढ[3]मग्न्यर्कचारात् ।
वैशाखं मण्डलं वै वरललितपदं पद्मवज्रासनञ्च
व्योमादौ च प्रचारः समविषमगतो पञ्चधा प्राणवायोः ॥ १०९ ॥

चण्डाली नाभिचक्रे नवहृतभुजगे चर्चिकाद्याधिदेवे
होःकार ज्ञानगर्भे तडिदनलनिभा ज्ञानतेजः प्रबुद्धा ।
नाभौ वैरोचनादीन् दहति नरपते लोचना चक्षुरादीन्
[b]सर्वान् दग्ध्वा सुचन्द्रात् स्रवति शिरसि यो [4]बिन्दुरूपं स वज्री ॥११०॥

प्रज्ञा धर्मोदयस्थं पुनरपि सकलं स्फारितं बिन्दुना वै
[c]नानालङ्कारयुक्ता [5]दर्पणगतमिव ज्ञानचक्रं स्वयंभूः ।
कामं रूपं ह्यरूपं त्रिविधमपि भवं [6]शोषयित्वा क्रमेण
[d]पश्चात् [7]ज्ञानार्चि सा वै त्रिभुवनसकलं ह्येकदा कर्षनीयं ॥ १११ ॥

चन्द्रादित्यादिकाद्यैस्त्रिविधगतिगतः कायवज्रादि जापः
प्रत्याहारादिषड्भिः सुकनककमले कायवाक्चित्तयोगः ।
आनन्दाद्यैस्तु वज्राब्ज समरसगते भावनेयं त्रिवज्रा
प्रज्ञाब्जे चित्तबिन्दौ सहजसुखवशाद् भावनाऽनाहता स्यात् ॥ ११२ ॥

---

1. CD. हि
2. CD तथाङ्क चित्ते V. तथाकुंचिते
3. CDV. °लीढमग्न्यर्क ; me dan ñi ma'i rgyu ba las
4. CD. °रूपः
5. CD. युक्तादरश V. युक्तादरश
6. CDV. शोषयित्वा ; rim pas sbyans byas te
7. CD. ज्ञानार्चिरेषा

a. gyon tu srog ni rṅo tu rgyu bar 'gyur ba de bžin du ni gyas pa bskum pa gaṅ yin pa

c. t'ams čad bsregs nas mgo bor zla ba bzaṅ las t'ig le'i gzugs ni 'jag pa gaṅ de rdo rje čan

c. sna c'ogs rgyan daṅ ldan žiṅ me loṅ dag la gnas pa lta bu'i ye šes 'k'or lo raṅ byuṅ ba

d. p'yi nas ye šes me lče dag gis srid pa gsum po mt'a' dag dus gčig tu ni dgug par bya

सेवा पञ्चामृताद्यै र्जलनिधिकुलिशै र्मन्त्रजापादिभिश्च
[a]प्रत्याहारादिभिः स्यात् कुलिशकमलजेनामृतेनोपसिद्धिः ।
आनन्दाद्यैस्त्रिवज्राब्ज समरसगता भावना साधनं स्यात्
प्रज्ञासङ्गेऽच्युतं [1]सम्भवति खलु महासाधनं सूक्ष्मयोगात् ॥ ११३ ॥

आदौ वै शून्यता बोधिरपि खलु ततः संग्रहश्चन्द्रबिन्दोर्
बिम्बोत्पत्तिश्च तस्मात् प्रवररसकुलैरक्षरन्यास एव ।
[b]एषा सामान्यसेवा जलनिधिकुलिशैः साधनं मध्यमञ्च
अत्रोपायश्चतुर्धा भवति मृदु दृढः साधनाङ्गे तथैव ॥ ११४ ॥

प्रत्याहारो जिनेन्द्रो भवति दशविधो ध्यानमक्षोभ्य एव
प्राणायामश्च खड्गी पुनरपि दशधा धारणा रत्नपाणिः ।
डोम्ब्यां चानुस्मृतिः स्यादपि कमलधरः श्रीसमाधिश्च चक्री
एकैकः पञ्चभेदैः पुनरपि च यतो भिद्यते ह्यादिकाद्यैः ॥ ११५ ॥

प्रत्याहारो दशानां विषयविषयिणामप्रवृत्तिः शरीरे
प्रज्ञातर्कौ विचारो रतिरचलसुखं ध्यानमप्येक[2]चित्तं ।
[c]प्राणायामो द्विमार्गस्खलनमपि भवेन् मध्यमे प्राणवेशो
बिन्दौ प्राणप्रवेशो ह्युभयगतिहृतो धारणा चैकचित्तं ॥ ११६ ॥

1. CLD. यद् भवति
2. D. °चिह्नम्

a. so sor sdud pa sogs daṅ rdo rje pad ma las skyes bdud rci yis ni ñe ba'i sgrub par 'gyur
b. č'u yi gter gyi rdo rje 'di ni spyi yi bsñen par 'gyur te sgrub pa dag ni dbu ma yaṅ
c. srog gi rcol ba dag kyaṅ lam ni gñis po bskyil žiṅ dbu mar srog ni žug pa dag tu 'gyur

चण्डाल्यालोकनं यद् भवति खलु तनौ चाम्बरेऽनुस्मृतिः स्यात्
प्रज्ञोपायात्मकेनाक्षरणसुखवशात् ज्ञानबिम्बे समाधिः।
एतन् मुद्रादि[1]भेदैस्त्रिविधमपि भवेत् साधनं विश्वभर्तुस्
तिस्रो मुद्रास्त्रिमात्रास्त्रिविधगतिवशात् कर्मसंकल्पदिव्याः ॥ ११७ ॥

प्रत्याहारेण योगी विषयविरहितोऽधिष्ठ्यते सर्वमन्त्रैः
पञ्चाभिज्ञानलाभी भवति नरपते ध्यानयोगेन शुद्धः।
प्राणायामेन शुद्धः शशिरविरहितः पूज्यते बोधिसत्त्वैः
मारक्लेशादिनाशं विशति दशबलं धारणाया बलेन ॥ ११८ ॥

[a]संशुद्धोऽनुस्मृतेः स्याद् विमलमपि [2]च भामण्डलं ज्ञानबिम्बात्
तस्मात् [3]शुद्धः समाधौ कतिपयदिवसैः सिध्यते ज्ञानदेहः।
[b]प्रत्याहारादिभि र्वै यदि भवति न सा मन्त्रिणामिष्टसिद्धिः
[c]नादाभ्यासाद्धठेनाब्जग कुलिशमणौ साधयेद् बिन्दुरोधात् ॥ ११९ ॥

सेवायामादियोगो नभसि दशविधश्चक्रिणः क्रोधदृष्ट्या
[d]दृष्ट्या विघ्नान्तकस्यामृतपथगतया [4]चोपसाध्ये षडङ्गः।
प्रज्ञा[5]सृष्टेन्दुबिन्दारपि कुलिशमणौ त्र्यक्षरः साधने स्यात्
सौख्यानष्टैकशान्तः सहज [6]इह महासाधने ज्ञानयोगः ॥ १२० ॥

---

1. P' भेदौ
2. CD. विमलमनसि भामण्डलं
3. CD. बुद्धः ; de nas tiṅ ṅe 'jin gyis dag pa
4. CD चोपमध्ये
5. CV. स्पष्टेन्दु D स्पर्शेन्दु ; šes rab la spros zla ba
6. P. इति ; ye šes rnal 'byor 'dir ni sgrub pa č'en po la

a. rjes su dran pa legs par dag pa dri med 'od kyi dkyil 'k'or dag kyaṅ ye šes gzugs las so
b. so sor sdud pa da sogs rnams kyis gal te sṅags pa rnams kyi 'dod pa grub par ma 'gyur na
c. nā da goms pas bcan t'abs č'u skyes su gnas rdo rje nor bur t'ig le bkag nas bsgrub par bya
d. bgegs mt'ar byed pa'i lta ba bdud rci'i lam du soṅ pa yis kyaṅ ñe ba'i sgrub la yan lag drug

प्राणायामः समन्तात् समसुखफलदो मस्तके यावदिष्टस्
तस्मादूर्ध्वं ह्यनिष्टो मरणभयकरः स्कन्धनिर्नाशहेतुः ।
उष्णोषं भेदयित्वा परमसुखपदे योजनीयो [1]व्रजन् वै
स्कन्धाभावेपि योगी विशति समसुखं किन्तु लोकेऽप्रसिद्धिः ॥ १२१ ॥

मध्ये प्राणप्रवेशो विषयविरहितालिङ्गनं विश्वमातुः
पद्माविष्टं स्ववज्रस्फुरणमपि तथेन्द्वर्कमध्ये प्रवेशः ।
सौख्यं बीजाप्रपाते सुरतरतिगतं योगिनां योगमेतत्
मुद्रा सिद्ध्यर्थहेतोः परममपि विभोः श्रीरहस्याद् रहस्यं ॥ १२२ ॥

ऊष्णोषे पञ्चशूकं भवति हि कुलिशं बाह्यशूकं द्विगुण्यं
[a]वज्रं स्याद् धर्मचक्रे द्विगुणित[2]मपरं तस्य चान्यद् द्विगुण्यं ।
तस्याप्यन्यद् द्विगुण्यं भवति सहजसंभोगनिर्माणचक्रे
तद् गर्भण्येकशूकं समसुखफलदं गुह्यपद्मादरस्थं ॥ १२३ ॥

योगी प्राणातिपातं दिननिशि कुरुते [b]प्राणनाशः स उक्तः
यः शब्दो वज्रहीनः प्रभवति हृदयेऽसो मृषा वाद एव ।
सर्वज्ञज्ञानभूमे ग्रहणमपि च यद्योगिनः स्तेयमुक्तं
सौख्यं [3]बिन्द्वप्रपाते भवति च परदारस्य सेवाविरागात् ॥ १२४ ॥

1. CD. यो व्रजन् The metre is disturbed with this reading
2. CD. परमं
3. CDV. बिन्दुप्रपाते ; t'ig le ma lhuṅ ba las

a. rdo rje č'os kyi 'k'or lor 'gyur žiṅ ñis 'gyur gžan ma daṅ ni de yi ñis 'gyur dag kyaṅ gžan
b. de ni srog ñams par gsuṅs te

प्राणायामानले न द्रवमपि शशिनः पानकं मद्यपानं
ऊष्णीषेऽङ्गुष्ठपर्वाद् व्रजति तिथिवशात् पूर्णिमान्ते स्वचित्तं ।
ऊष्णीषादङ्गुलीषु व्रजति पुनरिदं कृष्ण[1] पक्षावसानं
सा चर्या योगिनो वै प्रतिदिनसमये त्विष्टसिद्धिप्रदा या ॥ १२५ ॥

[2]चिन्ताकांक्षाज्ज्वरोऽङ्गे [3]वरमुखकमले [4]शुष्कोऽन्नाप्रवृत्तिः
कम्पोन्मादश्च घर्मो[a] प्रभवति मनसो विभ्रमस्तीव्रमूर्च्छा ।
धूमाद्या वज्रिणस्ताः प्रकटदशविधाः प्राणिनोऽङ्गेष्ववस्था
लोके ता मन्मथस्य प्रकटितनियता को जिनः कः स कामः ॥ १२६ ॥

या बिन्दोः श्वेतधारा पतति दिननिशं मामकी सा सुरा [5]न
[b]गोक्वाद्यं चक्षुरादेः स्फुरणमनुदिनं नान्यमांसं कदाचित् ।
सेवा पञ्चामृतानां स्वकुलभुविगतै दैवतैः [6]शुद्धिकाये
शून्ये चित्तप्रवेशात् [7]समरसकरणं मैथुनं तत्र योनौ ॥ १२७ ॥

दानं त्यागो धनस्याच्युतिरपि मनसः स्त्रीप्रसङ्गाच्च शीलं
क्षान्तिः शब्दाद्यवेशो ह्यभयगतिविनाशोऽनिलस्यैव वीर्यं ।
ध्यानं प्रज्ञा च चित्तं सहजसुखगतं सर्वगा सर्वभाषा
तस्याः [8]सत्त्वार्थमृद्धि [9]र्भवनिधनमजप्राप्तिरन्याश्चतस्रः ॥ १२८ ॥

1. CD. पक्षावसान
2. CD. चित्ता ; bsam dan 'dod dan lus la rims dan
3. CLD. वरसुखं ; k'a mč'og pad ma
4. CLD. शुक्तिरन्ता ; skam dan zas la rab tu mi 'jug dan
5. CDV. सुरानो ; č'an ma yin
6. CDV. सिद्धि ; dag pa'i lus la
7. P. सहजचित्तसुखं ; ro mñam byed pa
8. L. सत्त्वार्थसिद्धि॰
9. CD. भवति धनमज॰

a. 'dar dan bsño dan rab tu rmon par 'gyur ba
b. go ku la sogs mig la sog pa ñin žag so sor spro ste ša gžan res 'ga' dag kyan min
c. de las sems čan don dan rju 'p'rul sri l pa mt'ar byed mi skye 't'ob ste gžan pa bži rnams so

[1]एकाङ्गे शक्तियुक्ते नवपदसहिते पञ्चविंशात्मकाद्ये
[2]ध्याते मुद्रादयो वै कतिपयदिवसैः सिद्धयः संभवन्ति ।
स्तम्भं शान्तिञ्च वश्यं भुवननिधनतां वक्त्रभेदैः करोति
भूतानां मण्डलस्थो दनुभुजगकुलं साधयेद् भावितोसौ ॥ १२९

श्वेतः शान्तिं च पुष्टिं स्वमनसि कुरुते [3]रक्तमाकृष्टिवश्यं
पीतः स्तम्भञ्च मोहं कपणघननिभो मारणोच्चाटनञ्च ।
ध्यातं जप्तं तथैव [4]स्वमनसि कुरुते कायवाक्चित्तवज्रं
भूतानां मण्डलस्थं त्रिभुवननिलये साधयेत् कर्मभेदैः ॥ १३० ॥

[5]पक्षाधिक्योद्भवाभ्यां मणिकनकनिभाभ्याञ्च सव्येतराभ्यां[a]
[b]स्कन्धे[6]रिष्टेभचर्मोद्धृतमपि [7]सकलं पाटयित्वांघ्रियुग्मात् ।
[c]दैत्येन्द्रासृक्कपाल[8] प्रवरकरतलो[9] मृत्यु[10]र्मारास्यहस्तः
[12]क्लेशारिष्टांघ्रिघाती द्वयधिकजिनकरो भावनीयः परार्थं ॥ १३१ ॥

मातुस्तत्रैकवक्त्रं [d]यमकरकमले कर्तिकाश्चोकपालं
सूर्यादिन्दुः स्वचारं चरति गतिवशाद् द्वादशाधिक्यमेकं ।
तस्मात् कायप्रभेदे भवति जिनपति विश्वमाता तथैव
प्रज्ञापायाङ्गभावैः समसुखफलदैश्चन्द्रसूर्यप्रचारैः ॥ १३२ ॥

---

1. CLD एकांशे ; gcig pa'i sku 'am
2. CLD. ध्यान° V. ध्याने
3. CLDV. रक्त आकृष्टि ; dmar po yis ni dgug daṅ dbaṅ
4. V. सुमनसि
5. D. पञ्चाधिक्यो° 6. CLD. °दिष्वेभ°
7. CLD. कमल 8. CLD. °मृक्पान
9. P' °तले 10. CLD. °मारस्य
11. CLD. हन्त V. हन्तुः
12. CLD. क्लेशाधिष्ठां ; ñon moṅs bdud ni žabs kyis bsgyel ba

a. p'yogs ni lhag pa las byuṅ buṅ ba 'daṅ ni gser daṅ mc'uṅs pa gyas daṅ cig šos dag gis ni
b. p'uṅ po'i bdud la glaṅ č'en pags pa dag kyaṅ ma lus bšus te rkaṅ pa zuṅ žig dag nas 'jin
c. lha min dbaṅ po'i k'rag gi t'od pa rab mc'og p'yag mt'il na ste 'č'i bdag bdud kyi gdoṅ gi p'yag
d. zuṅ gi p'yag gi

एकाद्या[1] नन्तवक्त्रो बहुकरचरणोऽनेकवर्णस्तमोऽन्ते
प्रज्ञोपायात्मको वै ददति समसुखं नाडिकेन्द्वर्करोधात् ।
भूम्यादीनां समन्ताद[2]मलमणिनिभो भेदकः शून्य एको
[3]नाद्योनान्तो न मध्यस्त्वविषयविषयः साधितः कालचक्रः ॥ १३३ ॥

क्रोधेन्द्रं वज्रवेगं द्व्यचिकाजनकरं वेदवक्त्रं द्विपादं
पिङ्गाक्षं पिङ्गकेशं जिनपतिमुकुटं तीक्ष्णदंष्ट्राकरालं ।
[a]सर्प्यालं[4] व्याघ्रचर्मप्रवरनिवसनं भर्तृवत् शस्त्रहस्तं
[b]मूर्ध्नो मालानिबद्धं सकलजिनकुलैः पञ्चवर्णैः कपालैः ॥ १३४ ॥

विश्वाब्जे सूर्यमूर्ध्नि स्फुरदमलकरं मण्डले विश्ववर्णे
[c]पादाभ्यां भूतनाथाक्रमितमतिबलात् संस्थितालीढपादं ।
भूतानि त्रासयन्तं ह्यसुरफणिसुरान् ज्ञानसत्त्वैकभूतं
ध्यायन्नेवैकमासं त्रिभुवनगतं साधयेद् भूतवृन्दं ॥ १३५ ॥

नागानब्जाष्टपत्रेष्वपि जयविजयौ पातयित्वार्कमूर्ध्नि
पादाभ्यां स्तम्भयित्वा फणिपतिमिथुनं पद्मपत्रे स्थितानां ।
लाङ्गुलाग्रञ्च सर्वं घनकुलमुदरान् मुञ्चतो वै समन्तात्
ध्यातः क्रोधेन्द्र एवं कतिपयदिवसैः साधयेन् मेघवृन्दं ॥ १३६ ॥

---

1. CLD. °नन्दवक्त्रो ; gčig la sogs pa mt'a' yas žal te
2. CLD. °दनल° ; dri med
3. CD. नाद्यो नान्तो ; t'og ma med čiṅ mt'a' med
4. CD. सव्यालं

a. sbrul gyi rgyan daṅ rab mč'og stag gi pags pa'i šams t'abs daṅ ni gco bo'i bžin du mo'on č'a'i p'yag.

b. spyi bor mt'a' dag rgyal ba'i rigs kyi t'od pa k'a dog lṅa rnams dag gis p'reṅ ba ṅes par bčiṅs

c. žabs gñis dag gis 'byuṅ po'i mgon po lhag pa'i stobs kyis mnan žiṅ gyas brkyaṅ stabs kyis yaṅ dag gnas

इत्याद्यं देवतानां भवति नरपते साधनं देवतीनां
प्रत्येकं मण्डलेऽस्मिन् [1]स्वजिनकुलवशात् कर्मभेदैः समस्तैः ।
स्तम्भे शान्तौ च वश्ये परवनहरणे मारणोच्चाटनाद्ये
षट्त्रिंशद् योगिनीनां भवति खलु पुन र्जापहोमं स्वबीजैः ॥ १३७ ॥

शान्तौ ध्यानञ्च शान्तं शशधरधवला देवता शान्तरूपा
रौद्रे ध्यानञ्च रौद्रं कषणघननिभा देवता रौद्ररूपा ।
वश्ये ध्यानं सरागं दिनकरवपुषा देवता रागमूर्त्तिः
स्तम्भे ध्यानं समूढं वरकनकनिभा देवता [2]स्तब्धरूपा ॥ १३८ ॥

शान्तिः पुष्टिश्च राजन् समुतजिनकुलैः सिध्यते देवतोभिः
विद्वेषोच्चाटनञ्च प्रकृतिगुणवशात् सिध्यते क्रोधजाभिः ।
[a]वश्याद्यं भूतजाभिः प्रकटदनुकुले कीलनं चासुरीभिः
मातृभ्यां सर्वकर्माण्युभय[3]पविकुले मारणं जीवनञ्च ॥ १३९ ॥

[b]आदौ श्रीकालचक्रस्त्रिभुवनजननी यत्नतः साधनीयौ
पश्चात् कर्माणि साध्यानि च भुविनिलये शान्तिकादीनि यानि ।
मात्रा पित्रा विहीनो न हि भवति सुतः सर्वदा लोकसिद्धः
तस्माद् द्वौ साधनीयौ समसुखफलदौ नान्यथा कर्मसिद्धिः ॥ १४०

1. CLD. खजिन° V. सुजिन° ; raṅ gi rgyal ba'i rigs kyi dbaṅ gis
2. CLDV तत्त्वरूपा ; lha rnams reṅs pa'i gzugs
3. CLDV. °वरिकुले ; gñi g'i rdo rje'i rigs la

a dbaṅ sogs 'byuṅ skyes rnams kyis p'ur bus gdab p'aṅ lha min mo rnams kyis

b. daṅ por dpal ldan dus kyi 'k'or lo daṅ ni srid gsum skyed ma 'bad pa yis ni bsgrub par bya

मत्तु हृत्पद्ममध्ये शशिरविशिखिनि स्थापयेन् मूर्ध्निवज्रं
हूं-कारं ज्ञानजातं प्रलयघननिभं पञ्चशूकं सरश्मिं ।
ᵃतन्मध्ये [1]जोऽङ्कुशस्य त्रिभुवनसकलं रश्मिभिः पूरयित्वा
आकृष्य ज्ञानचक्रं त्रिविधभवगतं वज्रमार्गे [2]प्रवेश्य ॥ १४१ ॥

ᵇसर्वं चन्द्रद्रवाभं स्वकुलिशवदनादुत्सृज्यन् मातृपद्मे
तस्मिन् सूर्ये प्रविष्टं भवति समरसं चादिकादिप्रयुक्तं ।
तन्मध्ये ज्ञानबीजं भवति कुलवशात् कर्मणः शान्तिकादेः
तेनोत्पन्ना[3] च देवो भवति हि फलदा योगिना देवता वा ॥ १०२ ॥

जः हूं वं होः क्रमेणाङ्कुश इति कुलिशं वज्रपाशश्च घण्टा
ॐ आः हूं हो-स्तथोक्तं शशिरविकुलिशं चाक्षरं तद्वदेव ।
ई ऋ ऊ ऌ तथैव प्रकट य र व ला वायुवह्न्यम्बुपृथ्व्यः
हः हुं हं फट् तथोक्तं रविरपिकुलिशं चन्द्रमा कर्तिका च ॥ १४३ ॥

ध्यात्वा चन्द्रार्कमध्ये त्वलिकलिसहिते तोयबीजात्मकाब्जं
तेनोत्पन्नैकवक्त्रां यमकरकमलां देवतीं चन्द्रवर्णां ।
आरूढां श्वेतनागं सितजलजकरां चामयां श्वेतवस्त्रां
श्वेतालङ्कारयुक्तां प्रहसितवदनां प्रेषयेत् साध्यवेश्म ॥ १४४ ॥

---

1. CLDV. योऽङ्कुश°
2. CLDV. प्रविश्य
3. D. °पन्ने
4. CLD. °हे हो°

a. de ni dbus su jaḥ yi lčags kyu'i 'od zer rnams kyis srid pa 'gsum po mt'a' dag bkaṅ byas nas

b. t'ams čad zla ba žu ba daṅ mo'uṅs raṅ gi rdo rje'i k'a nas yum gyi pad mar spro bar bya

तस्मात् साध्यं गृहीत्वा पुनरपि च विभो मण्डले संप्रविश्य
भर्त्तुश्चाज्ञां प्रलब्ध्वा पुनरमृतघटै र्लोचनाद्याः प्रहृष्टाः ।
तं साध्यं स्नापयन्ति [1]प्रवरदशविधाः शक्तयः पूजयन्ति
[a]रूपाद्याः पोषयन्ति [2]प्रकटदशभिः लास्यादयस्तोषयन्ति ॥ १४५ ॥

[b]भूताख्याश्चाभयन्ते[3] प्रवरदशविधाः क्रोधजाः पालयन्ति
नागिन्यश्चुम्बयन्ति त्वमरयुवतयो द्वारशालिङ्गयन्ति ।
चण्डाः कुर्वन्ति रक्षां सकलभुवितले शान्तिपुष्ट्यर्थहेतोः
एवं साध्यस्य सर्वं परमसुखकरं योगिना भावनीयं ॥ १४६ ॥

[c]ह्रीश्चन्द्रादित्यगर्भे कुवलयकलिका बाणमेवेक्षुचापं
तेनोत्पन्नार्कभासोभयकरधनुषा पूरिताकर्णबाणा ।
प्रत्यालीढाश्चारूढा[d] कमलशशधरा प्रेषयेत् साध्यवेश्म
साध्यं हृत्वाभिगुह्य शिरसि च वदने ताडयित्वा शरेण ॥ १४७ ॥

कण्ठे [4]चापेन बद्ध्वा क्षुभितमपि तया मण्डले नीयमानं
चण्डाभि र्वस्त्रहीनं हृतमपि नियतं वेष्टितं नागिनीभिः ।
देवीभि र्भर्त्स्यमानं सलगुडमुषलैस्ताडितं क्रोधजाभि-
र्भूताभि र्भीष्यमानं खरनखनिहतं चैव लास्यादिभिश्च ॥ १४८ ॥

---

1. D प्रवर दशविधाः ; rab mč'og rnam pa bču yis
2. D. प्रकटदश च लास्या° CLP. °दशव°
3. CLD. भूताखग्राश्च भवन्ति
4. CLD. पाशेन ; gžu yis

a. gzugs la sogs pa rnams kyis gso bar byed čiṅ rab gsal sgeg mo la sogs bču yis c'im par byed
b. 'byuṅ por grags pa rnams kyis 'jigs pa med byed rab mč'og rnam bču k'ro skyes rnams kyis skyoṅ bar byed
c. zla ba ñi ma'i dbus su hrīḥ ste yud pal k'a ma bye ba'i mda' ñid daṅ ni i kṣu'i gžu
d. gyon brkyaṅ rta la žon pa

वज्राभि र्नष्टबुद्धि क्षितिजलहुतभुग्वातजाभिश्च बद्धं
भर्त्तुः पादे विवस्त्रं सकलमदहतं पातितं भक्तिभिश्च ।
एवं कृत्वा तु वश्यं पुनरपि च विमुस्तोषयेत् तत्र साध्यं
तद्वत् पाशाङ्कुशाभ्यां भवति बहुविधा कृष्टिकर्म [1]त्रिधातोः ॥ १४९ ॥

ध्यात्वा सूर्येन्दुमध्ये कषणघननिभं दोर्घहूं कारजासिं
तेनोत्पन्ना विवर्णा त्वसिकरकमला तर्जनो पाशहस्ता ।
प्रत्यालोढा[2]ग्रमूर्ध्नि प्रकुपितवदना प्रेरिता साध्यवेश्म
साध्यं पाशेन बद्ध्वा कुपितवदनया मण्डलद्वारनोतः ॥ १५० ॥

उष्ट्रे [3]यः-कारजाते वरपवनगतौ भर्त्तृवाक्येन साध्यं
तत्रारूढं प्रकृत्या शिखिचलवलयं प्रेरयेद् यावदेव ।
एवमुच्चाटनं वै भवति सुरपतेः किं पुन र्मानुषस्य
विद्वेषेऽप्युष्ट्रहीनौ बहुकृतकलहौ सव्यवामे च नेयौ ॥ १५१ ॥

ध्यात्वा सूर्येन्दुगर्भे [4]ल-इति परिणतं पोतवर्णं [5]सुचक्रं
तेनोत्पन्नै कवक्त्रा वरकनकनिभा शृङ्खलाचक्रहस्ता ।
कूर्मे दैत्यासनस्था त्वतिमृदुगमना प्रेरिता साध्यवेश्म
साध्यं चक्रेण भेध्यं प्रपतितमवनौ शृङ्खलाबद्धपादं ॥ १५२ ॥

---

1. CLDV. °धातौ
2. CLD. प्रत्यालोढोग्रमूर्ध्नि ; rṅa mo'i steṅ du
3. CLDV. जः कार ; yaṃ yig las skyes
4. CLDV. न इति ; laṃ žes
5. CLD. स्वधक ; 'k'or lo bzaṅ po

de bžin žags pa lčags kyu dag gis k'ams gsum po rnams dgug pa'i las ni rnam pa maṅ por 'gyur
ñi ma zla ba'i dbus su sprin nag daṅ mc'uṅs hūṃ yig riṅ po las skyes ral gri bsgoms byas nas
bsgrub bya 'k'or los 'jigs par byas nas sa la rab tu bsgyel te lčags sgrog gis ni rkaṅ pa bčiṅs

आनीतं मण्डले वै जिनपतिवचसा पातयित्वा धरण्यां
मेरुस्तन्मूर्ध्नि देयो वरकनकमयः स्तम्भने साध्यकाये ।
षट्सन्धौ कीलनार्थं त्वपि कुलिशमयैः कीलकैः [1]कीलनीयः
सर्पैः संदंश्यमानः पतित इह महौ मोहने [2]भावनीयः ॥ १५३ ॥

ध्यात्वा सूर्येन्दुगर्भे [3]तडिदमलनिभां कर्त्तिकां फें स्वभावां
तेनोत्पन्ना प्रचण्डा प्रलयघननिभा कर्त्तिका शुक्तिहस्ता ।
[a]प्रत्यालीढा विवस्त्रा ह्युपरि [4]हरिरिपोः प्रेरिता साध्यवेश्म
साध्यं केशेषु शीघ्रं धृतमपि च तया मण्डले वस्त्रहीनं ॥ १५४ ॥

आनीतं श्रीश्मशाने जिनपतिवचसा गृध्रकाकैः शृगालैः
[b]सर्वाङ्गात् पीतरक्तं [5]पललमपि तथा भक्षितं सर्वधातुं ।
साध्यस्यैवं समस्तं प्रवरभुवितले मारणे भावनीयं
ध्यानेनानेन शक्रो व्रजति यमपुरं किं पुन गर्भजातः ॥ १५५ ॥

शान्तौ पुष्टौ च शुक्लं भवति कुलवशात् ध्यानमप्यम्बुबीजाद्
वश्याकृष्टौ च रक्तं त्वपि तनुदहनं वह्निबीजात्मकञ्च ।
विद्वेषोच्चाटने च प्रलयघननिभं वायुबीजस्वभावं
[c]संस्तम्भे[6] कीलनाद्ये वरकनकनिभं भूमिबीजात्मकञ्च ॥ १५६ ॥

---

1. P'. कीलनायः
2. P'. भावनायः
3. CLDV. तडिदनल° ; dri med glog dan mo'uns pa'i
4. PP'. हयरिपोः
5. LD. पवनमपि   6. CD. सतुस्तम्भे

a. rta yi dgra yi sten du gyon pa brkyan žin gos dan bral bar bsgrub bya'i k'yim du bskul bar bya
b. če spyan rnams kyis bsgrub bya'i yan lag kun las k'rag 't'uns ša dan de bžin du ni k'ams kun zos
c. rens pa rnams ni p'ur bus gdab pa la sogs la gser žun dan mo'uns sa yi sa bon ran bžin no

नीलाभं शून्यबीजाद् भवति हि हरितं मारणे जीवने च
ᵃपृथ्वी कृत्स्नं समन्ताज् जलनिधिगमने वायुकृत्स्नञ्च वृष्टेः ।
नाशार्थं वह्निकृत्स्नं त्वपि महिवलयं द्रावणार्थञ्च वह्नेः
नाशार्थं [1]तोयकृत्स्नं भवति खगमने शून्यकृत्स्नं त्वदृश्ये ॥ १५७ ॥

ध्यानं पञ्चाननं वै भवति गजपते [2]भंङ्ग एवाग्निबीजात्
तार्क्षं नागेन्द्रभङ्गे भवति हि धवलं तोयबीजात्मकञ्च ।
अष्टाङ्घ्रिं खड्गिसिंहे प्रलयघननिभं वायुबीजात्मकं स्यात्
खड्गाख्यं वाजिशत्रोरवनिकुलवशात् क्रोधजं दैत्यभङ्गे ॥ १५८ ॥

ᵇश्रीमन्त्रं[3] बुद्धबिम्बं प्रथममपि विभो योगिना साधनीयं
पश्चात् सिध्यन्ति कर्माण्यपरिमितगुणान्यर्कभेदैः स्थितानि ।
मन्त्रे बिम्बे त्वसिद्धे त्रिभुवननिलये सिध्यते नैव किञ्चित्
तस्माद्राजन् स्वचित्ते व्यपगतकलुषे साधयेन् मन्त्रबिम्बं ॥ १५९ ॥

ᶜशूरः संग्रामभूमौ पतित इति [4]तथालम्बितस्तस्करो वा
अष्टम्यां भूतरात्रौ नृप चितिभुवने स्नापयेदष्टकुम्भैः ।
ᵈगन्धैर्धूपैः प्रदीपैर्बहुविधचरुकै रक्तपुष्पैः प्रपूज्य
वज्रन्यासं प्रकृत्वाᵉ शिरसि च हृदये मूर्ध्निनाभौ च कण्ठे ॥ १६० ॥

---

1. D. तोयकृत्स्ने
2. CLD. °भग्न
3. CLDV. श्रीमन्त्रं
4. D. तथा लम्बित°

a. sa yi zad par kun nas č'u yi gter du 'gro ba la ste rluṅ gi zad par č'ar pa ni
b. k'yab bdag gi ni dpal ldan sṅags daṅ saṅs rgyas gzugs kyaṅ rnal 'byor pa yis daṅ por bsgrub par bya
c. dpa' bo gyul gyi dus su lhuṅ bar gyur pa žes pa 'am ni de bžin č'om rkun sbyaṅs pa dag
d. dri daṅ spos daṅ mar me daṅ ni rnam maṅ k'a zas me tog dmar po rnams kyis rab mč'od nas
e. rab byas te

कृत्वा कुण्डे त्रिकोणे यदरुणरजसा गर्भपद्मं सचिह्नं
पत्रे चिह्नं जिनानां दिशिविदिशि तथा देवतानां स्वचिह्नं ।
बाह्ये रेखात्रये वै दशदिशिवलये क्रोधचिह्नानि तद्वत्
प्रेतं तस्यावसव्ये त्वसिकरकमलं मण्डलात् सव्यपादं ॥ १६१ ॥

पूर्वोक्तान् मातृदोषाज् जिनपतिकुलिशैरात्मरक्षां प्रकृत्य[a]
मन्त्री कुण्डस्य सव्ये सरुधिरपललै र्होममेवं प्रकुर्वन् ।
ॐ ह्री [1]फ्रें हूं फडन्तं दशगुणितशतं होमयेत् तस्य मन्त्रं
बद्ध्वा वज्रासनं वै अमरगिरिरिवाकम्प्य[2] एवार्धरात्रं ॥ १६२ ॥

[b]पूर्णे होमे ज्वलन् वै ललदसिरसन[3]स्तीक्ष्णदंष्ट्रस्त्रिनेत्रः
गर्जन् वै स्फोटयन् यः क्षितिमपि चरणैः साधकं भीषयन् सः ।
स्थित्वा कुण्डान्तराले [4]हसति कहकहं नृत्यते भीमकायः
तं दृष्ट्वा [5]भीतमन्त्री व्रजति यमपुरं नष्टचित्तः क्षणेन ॥ १६३ ॥

[c]भेतव्यं नासुरेन्द्रादपि त्रितिभुवने [6]मन्त्रिणा सिद्धिहेतो-
र्दृष्ट्वा निःकम्पचित्तं [7]वदति पुनरिदं साधितो भूतनाथः ।
सिद्धोहन्ते सुवीर वद सकलमहं साम्प्रतं किं करोमि
इत्युक्ते साधकेन स्वमनसि [8]रुचितं प्रार्थनीयं परार्थं ॥ १६४ ॥

---

1. CLD. ह्रूँ
2. CLD. °गिरिविवाकम्प
3. CLD °रसिम°
4. CL. सहति
5. CLD. भीममन्त्री
6. CLDV. मन्त्रसिद्ध्यर्थहेतो°
7. CLDV. भवति
8. L. रचितं

a. bdag ñid bsruṅ ba rab byas nas

b. sbyin sreg rjogs na ro 'jin ral gri lta bur 'k'yug ciṅ 'bar la mc'e ba rnon po mig gsum pa

ro bsreg gnas su sṅags pas dṅos grub rgyur ni lha min dbaṅ po las kyaṅ 'jigs par mi bya ste

स्पर्शं खड्गं रसेन्द्रामृतफलगुटिका रोचनं चाञ्जनञ्च
यल्लेपं पादुकाञ्चाददतु [1]मम भवान् लौकिकीमष्टसिद्धिं[a] ।
विद्वेषोच्चाटनं वै भुवननिधनतां स्तम्भनाकृष्टिवश्यं
सर्वं मे यातु सिद्धिं स च वदति पुनः सर्वमेतत् करोमि ॥ १६५ ॥

भूतेन्द्रं साधयित्वा व्रजति नरपते साधको यत्र तत्र
पाताले चान्तरीक्षे सुरवर[2]भवने मेरुश्रृङ्गेऽब्धिपारे ।
तत्रारूढोऽसिहस्तः क्षितितलनिलये लोककार्यं करोति
तस्मात् सत्त्वार्थहेतोः परमकरुणया साधनीयोऽसुरेन्द्रः ॥ १६६ ॥

नामाद्यं चित्तवज्रं भवति नरपते देवता दैवतानां
वाग्वज्रं सर्वनामाक्षरमपि च ततश्चाधिकं कायवज्रं ।
तस्मात् प्रत्यङ्गमन्त्रो भवति बहुविधः पाठसिद्धः कदाचित्
[b]भाव्यो [3]याज्यश्च जाप्यः स्वजिनकुलवशात् चित्तवाक्कायभेदैः॥१६७॥

प्रत्येकं मन्त्रजातैः प्रभवति नियतः कोटिजापः प्रसिद्धो
होमस्तस्माद् दशांशः प्रकृतिगुणवशात् सिद्ध्यते यावदेव ।
पश्चाच्छान्त्यादिकेषु प्रभवति फलदो नान्यथा सिद्धिरेति
[c]सध्याने जपहोमै र्व्रतनियमयुतै र्मन्त्रयोनिश्च साध्या ॥ १६८ ॥

---

1. CLDV. °वा ददतु सम
2. CLDPV. °भुवने ; lha yi mc'og gi gaṅ pa
3. D. भाबोऽजाप्यश्च

a. ral gri reg pa bc'ud kyi dbaṅ po bdud rci'i 'bras bu'i ril bu ro ca na daṅ mig smra daṅ/rkaṅ pa byug daṅ šiṅ lham dag daṅ 'jin rten pa yi dṅos grub brgyad po k'yod kyis bdag la scol
b. bsgom bya mc'od bya bzlas bya raṅ gi rgyal ba'i rigs kyi dbaṅ gis t'ugs gsuṅ sku yi dbye bas so
c. bsam gtan daṅ bčas bzlas daṅ sbyin sreg brtul žugs ṅes ldan rnams kyis sṅags kyi skye gnas bsgrub par bya

सिद्धा बद्धा त्रिलोहैः खगपललगुटी खेचरत्वं ददाति
श्वाश्वादीनां [1]प्रदोषैरपहरति तनौ क्षुत्पिपासादिरोगान् ।
नेत्रैः पित्तैश्च तेषां भवति वरनृणामञ्जनं भूप्रभेदं
अन्तर्धाने च वश्ये युवतिमनहरं साधितं श्रीश्मशाने ॥ १६९ ॥

कृष्णाष्टम्यां निशायामथ मनुदिवसे मण्डलं वर्त्तयित्वा
[a]रक्षां कृत्वा समन्ताच्च पललगुटिकां चाञ्जनं तस्य मध्ये ।
कृत्वा संपूजयित्वा सुसुरभिकुसुमैः मन्त्रजापं प्रकुर्याद्
रश्मिं मुञ्चन्ति यावत् नभसि रविरिव ग्राह्यमुद्धृत्य तस्मात् ॥ १७० ॥ *

जीवे [2]दूते स जीवे गगनदिशिगते मृत्युमाप्नोति दष्टः
दूतप्रश्नो[3]ऽसमो यो बहुसुखफलदो मृत्युदोक्तः समो यः[b] ।
दूतः [4]सर्पादिनाम प्रवदति हि कृतो मृत्युमाप्नोति दष्टः
पृच्छा प्राणप्रवेशे यदि भवति शुभा निर्गमे [5]साशुभा स्यात् ॥ १७१ ॥

दूतो वामाग्रपादः कथयति [6]युवतौ दक्षिणाग्रो नरश्च
स्वाङ्गं हस्तेन यत्र स्पृशति [7]स मनुजो दष्टमत्र प्रदेशे ।
[c]प्रोत्फुल्लं नेत्रवक्त्रं कथयति मरणं [8]कर्णमूले च कृष्णः
[d]शब्दो[9] क्षुतपुण्डरीके यदि भवति मनाक् संग्रहं तत्र कुर्यात् ॥ १७२ ॥

---

1. *meat* according to Me p'am
2. CL. °द्रुते V. °वृत्ते
3. CLDV. प्रश्नो समो
4. CLD. सर्वादि°
5. P'. निर्गमेनाशुभा ; 'byun ba la ni dge min 'gyur
6. CDV. युवतौ
7. D. समनुजो
8. V. वर्ण काले
9. CLD. शाको

* P' marks this verse wrongly as 171 and this wrong marking continues upto verse 230

a. bsrun ba drg kyan kun nas byas te de yi dbus su ša yi ril bu dag gam mig sman ni
b. 'c'o bar p'o ña de ni 'c'o la nam mk'a'i p'yogs su gnas na sos zin 'c'i ba t'ob par 'gyur/p'o ña'i dri ba mi mñam pa gan ñes par bde ba'i 'bras ster mñam pa 'c'i ba ster par brjod
c. mig dan k'a ni rab tu gdans pa dag can rna ba'i rca bar nag po yar ni 'c'i bar brjod
d. gal te sñin k'a'i pad ma dkar por sgra ni cun zad gyur na de ni rab tu bsdu bar bya

आदौ रक्षाविधानं भवति सुखकरं दष्टकस्यात्मनश्च
पृथ्वीतोयाग्नि[1]वाता गगनमपि तथाङ्गुष्ठकादौ नियोज्य।
लाद्या हान्ता क्रमेणारुजठरहृदये वक्त्रमध्ये ललाटे
[2]हुं क्षूं ह्यं ह्यादि नागा दशविषमसमा ह्रस्वदीर्घप्रभेदैः ॥ १७३ ॥

वामाङ्गे ह्रस्वबीजं श्रवणगलगतं कक्षकुक्ष्योरुदेशे
सव्याङ्गे दीर्घमेव प्रभवति फणिनां सृष्टिसंहारयोगैः।
[a]रक्षां कृत्वा जिनाख्यां[3]गुलसुमशरेणाग्निबीजान्वितेन
[b]हुं क्षूं युक्तेन शीघ्रं [4]सुनिहतहृदयः स्तोभमायाति दष्टः ॥ १७४ ॥

पृथ्वी बीजे ललाटे चरणगतखजे स्तम्भमायाति शीघ्रं
तोये मूर्ध्नि प्रविष्टे शिखिनि च जठरे निर्विषत्वं प्रयाति।
वायो बीजे ललाटे शिखिनि च हृदये संक्रमो वै विषस्य
शून्ये मूर्ध्नि प्रविष्टे चरणगत[5]मरुौ छेदनं वै विषस्य ॥ १७५ ॥

श्वेतो बिन्दु ललाटे त्रिविधमपि विषं निर्विषं वै करोति
रक्तः स्तोभं प्रवेशं कषणघननिभः स्तम्भनं पीतवर्णः।
[c]वर्त्तिं प्राणप्रवाहे त्रिकटुकलुलितां योजयेन् निर्विषत्वे
[d]अङ्गुल्या लम्बिकायां विकसितवदने [6]टङ्कणं योजयेद्वा ॥ १७६ ॥

---

1. P. वायु
2. CLD. हूं क्षु ह्यागादि
3. CLD. °गुण
4. CLD. सुनिहित°
5. CD. °गतनमौ V. °रतौ
6. *salt* according to Me p'am.

a. bsruṅ ba byas nas rgyal ba žes grags sor ni šin tu mñam pa'i 'dam bu sbrul gyi sa bon ldan
b. huṁ kṣūṁ ldan pas myur du so yis zin pa bskyod par byed par 'gyur
c. c'a ba gsum po sbyar ba'i sdoṅ bu srog ni rab tu 'bab par dug med byed la sbyar byas te
d. yaṅ na k'a ni rnam par p'ye ba'i lče'u č'uṅ la sor mo yis ni ṭaṁ ga na sbyar ba

वज्री जातिः कुमारी त्रिकटुकलवणं लाङ्गली देवदालिः
ब्राह्मी क्षारोऽश्वगन्धा दिनकरसहिता वन्ध्य कर्कोटकी च ।
विण्मांसं शुक्ररक्तं सममपि [1]गुलिका कारिताक्षोभ्यपिष्टा
भूतं भूतज्वरं वा स्थिरमुरगविषं घ्राणदत्ता निहन्ति ॥ १७७ ॥

सूर्यादौ सप्तवारे दिननिशिसमये सप्तभागावसाने
शून्या मन्दार्कमध्ये प्रवहति कुलिका मृत्युरूपार्धनाडी ।
नागक्रीडां न कुर्यात् त्रिविधमपि विषं भक्षनीयं न तत्र
[a]तस्यामेवाहिदष्टो व्रजति यमपुरं भूतलब्धोऽस्मिन्नः ॥ १७८ ॥

मध्याह्ने चार्धरात्रे दिननिशिसमये नित्यवारप्रभेदात्
[b]शून्याब्धौ[2] सन्धिमध्ये प्रवहति कुलिका कालदष्टकनाडी ।
प्रत्युषेऽस्तंगतेऽर्के पुनरपि च तथा कालनाडी च मृत्योः
[c]एतान्यास्थानि राहोः प्रतिदिनसमये वेदितव्यानि सम्यक् ॥ १७९ ॥

आदित्येऽनन्तभोगो दिननिशिसमये चादि[3]भागे दिनस्य
पश्चाच्छेषोरगाणामुदय [4]इह भवेत् सप्तवारप्रभेदात् ।
खत्तुः खच्छिद्रखेषू खयुगखवसवः खाद्रि खाग्निश्च नाड्यः
[d]भोगाः सूर्यादि वारादपि वसुफणिनां भुक्तिभेदाद् विषं स्यात् ॥ १८० ॥

---

1. CLD. गुटिका
2. CLDV. शून्यादौ
3. PV. °भोगे ; ñin mo'i dan po'i č'a la
4. CLD. इति ; p'yi nas lhag ma čan te 'dir ni

a. de ñid la ni sbrul gyi sos zin 'byun pos btab dan mc'on gyis p'ug pa gšin rje'i gron k'yer 'gro

b. t'un mc'ams dbus su ston pa č'u gter dag la rigs ldan dus kyis sos zin č'u c'od gčig rab rgyu

c. 'di dag sgra gčan gdon pa rnams su ñin žag so so'i dus su yan dag par ni rig par bya

d. ñi ma la sogs gza' yi lons spyod las kyan gdens čan nor gyi lons spyod dbye bas dug tu 'gyur

ᵃविप्रो[1]ऽनन्तो हिमाभः कुलिक इति नृपो वासुकिः शङ्खपालः
रक्तो वैश्यो महाब्जो वरकनकनिभस्तक्षकस्तद्वदेव ।
ᵇशूद्रः कर्कोटकोऽब्जः कषणघननिभश्चान्त्यजौ विश्ववर्णौ
जन्मस्थानञ्च तेषां जलशिखिधरणी मारुताकाशधातुः ॥ १८१ ॥

ᶜपादात् कट्यन्तपीतो गरुड इति तथा नाभिसीम्नो हिमाभः
आकण्ठाद्रक्तवर्णः कषणघननिभो भ्रूलतां यावदेव ।
तस्माद्वै विश्ववर्णः फणिकुलसहितो मुद्रितः पञ्चतत्त्वैः
ध्यातस्तन्मुद्रया वै हरति फणिविषं भूतरोगादिकञ्च ॥ १८२ ॥

[2]क्षेंकारं पक्षिनाथं स्वहृदयकमले भावयेत् सूर्यमूर्ध्नि
नागालङ्कारयुक्तं सकलकुलवशात् पञ्चवर्णं स्फुरन्तं ।
पक्षि[3]स्वाहान्तमादि [4]प्रणवमपि ततः पक्षिनाथस्य मन्त्रं
ᵈजप्त्वा तं कोटिमेकं फणिकुलसहितं साधयेत् पक्षिनाथं ॥ १८३

तार्क्ष्ये सिद्धे फणीन्द्राः फणिपतितनयाः किंकरत्वं प्रयान्ति
भूता यक्षा ग्रहाश्च प्रवरभुवितले [5]डाकिनीमातरश्च ।
मन्त्राकृष्टिं प्रयान्ति ग्रहगणसकलं जल्प्यते कालदष्टः
तस्मात् सत्त्वार्थहेतोः प्रथममपि नरैः साधनोयः खगेन्द्रः ॥ १८४ ॥

---

1. CLDV. विश्वे°
2. DV. मंकारं
3. V. °स्वाहान्तनाथं
4. D. °प्रवण°
5. PP'. साकिनी ; mk'a' 'gro ma

a. mt'a' yas rigs ldan žes pa bram ze k'a ba'i mdog ste nor rgyas bu daṅ duṅ skyoṅ rgyal rigs dmar

b. stoṅs kyi rgyu daṅ pad ma dmaṅs rigs sprin nag daṅ mo'uṅs mt'ar skyes dag ni k'a dog sna c'ogs so

c. mk'a' ldiṅ žes pa rkaṅ pa nas ni dpyi mt'ar ser po de bžin lte ba'i mc'ams su k'a ba'i mdog

d. de ni bye ba p'rag gčig bzlas nas gdeṅs čan rigs daṅ bčas pa'i 'dab č'ags mgon po bsgrub par bya

[1]वेदेष्वष्टौदलेष्वेव नृपतिषु [2]रदेष्वब्धि षट्सु द्विजेषु[a]
[b]गर्भे साध्यः स्वदिक्षु प्रथममपि युगं यादयोऽष्टौ दलेषु ।
[3]एयाद्याः[c] षोडशेषु त्रिगुणितदशकाः [d]कादि ह-क्षा द्विजेषु
सन्ध्यापत्रेषु साध्यस्तिथिगुणितयुगेष्वेव लान्ताः समात्राः ॥ १८५ ॥

आद्येकैकस्वराभ्यां मकरघटवशाद् दीर्घह्रस्वाश्च पञ्च
द्वात्रिंशद् बाह्यपत्रेष्वपि समहृदया वज्रतीक्ष्णादिवर्णाः ।
बाह्ये शान्त्यादिकर्मण्यपि च वयरला मण्डलान्येव तेषां
वर्णा गर्भोत्तमाङ्गाः [4]शिखिचलचरणा वश्य आकर्षणे च ॥ १८६ ॥

शान्त्यादे गर्भवादाः शिखिचलशिरसो मन्त्रिणा लेखनीयाः
पूर्वोक्तैः शान्तिपुष्टि भुवननिधनतोच्चाटनाकृष्टिवश्यं ।
[5]सस्तम्भं मोहनञ्च त्रिभुवननिलये चक्रमेतत् करोति
जापै र्होमैश्च साध्यः प्रथममिह महावज्रतीक्ष्णादिमन्त्रः ॥ १८७ ॥

अष्टारे द्वादशारे दिशिविदिशिगतं षोडशारेऽन्तरे च
साध्यः कोणेषु मध्ये प्रभवति [6]यमराजासदो मेरुणाद्या ।
तस्माद् गर्भारमध्याद् भवति [7]दनिरयक्षे च्छ तस्मात् निरून्ते
ॐ ह्रीः ष्टोः तस्य बाह्ये भवति च [8]विकृता दाननात्[9] हूं द्विधा फट् ॥ १८८ ॥

---

1. CLDV. देवे° 2. CLDV. नृपतिसुरदेवेष्व°
3. CLD. एताद्या V. एषाद्याः 4. CLDV. शिखिबल° ;
5. CLD. संस्तम्भं ; reṅs pa daṅ bčas
6, 7, 8. These seem to be *mantras*
9. CLD. विकृता नादनात्

a. rig byed daṅ ni 'dab brgyad ñid daṅ mi yi bdag po so daṅ bču gter drug daṅ gñis skyes la
b. sñiṅ por bsgrub bya raṅ gi p'yogs su daṅ por am a zuṅ ste ī la sogs pa 'dab brgyad la
c. e ya la sogs bču drug la ste
d. ka sogs gsum gyis bsgyur ba'i bču daṅ ha kṣa gñis skyes la
e. mt'ar ni ni ru 'gyur

कोष्ठात् कोष्ठान्तराले भवति नरपते साध्यनामैषमन्त्रो
विद्वेषे मृत्युवश्ये प्रभवति [1]यमरा क्षे दमे दोस चाद्याः ।
स्तम्भाकृष्टौ च मोहेऽपि च बलकरणे शान्तिकोच्चाटने च
गर्भात्तस्मिन् यकारो व्रजति गुणवशात् पूर्ववद् बाह्य सर्वं ॥ १८६ ॥

वर्णानामुत्तमाङ्गात् प्रभवति पुरतो यः स्वरालिङ्गितश्च
[a]वर्णे वर्गान्तवर्णः कुलिशकुलवशात् पञ्चमो [2]हुं सं उक्तः ।
प्रज्ञाबिन्दुद्वयेन स्वरपरमपुटे [b]स्यादियम्योरुकारं
मंमुः हंहुश्च सं सुः कमलवसुदले मञ्जुरेवार्कपत्रे ॥ १९० ॥

बाह्ये श्रीवज्रघोषः प्रभवति सयुतो मन्त्रभद्रोपि हूं फट्
[c]साध्योऽस्मिन् कर्णिकायाममुकमपि कुरु प्रेरणं श्री शमादेः ।
एवं पूर्वोक्तचक्रेष्वपि भवति सदालेखनं साध्यनाम्नः
एतत् सर्वं नराणां जिनपतिवचसा सिध्यते [3]मे प्रसादात् ॥ १९१ ॥

यः शब्दो हृत्प्रदेशे भवति वरनृणां श्रूयते श्रोत्ररन्ध्रै स
तस्मिंश्चित्तं नरस्य व्रजति समरसं योजितं चैकभूतं ।
यं शब्दं जीवलोके [4]वदति च भवजस्तत् [5]तदेव शृणोति
[d]विज्ञानं चैव दूरात् [6]श्रवणमपि विभो योगिना भावनीयं ॥ १९२ ॥

---

1. It seems to be a *mantra* again.
2. CLDV. हंस
3. CLD. तत्
4. CLD. भवति
5. D. °स्तत्त् देवं
6. CDV. श्रमण°

a. yi ge rnams kyis sde mt'a'i yi ge rdo rje rigs kyi dbaṅ gis lṅa pa haṃ daṅ saṃ du gsuṅs

b. yi ge u ru 'gyur

c. bsgrub bya 'dir ni lte ba la ste č'e ge mo yaṅ mjod čig dpal ldan ži ba sogs la bskul

d. k'yab bdag gi ni rnam šes ñid daṅ riṅ du t'os pa dag kyaṅ rnal 'byor pa yis bsgom par by.

कृत्वा पर्यङ्कबन्धं विकसितवदनोऽन्योन्यदन्तं स्पृशेन्न
आकृष्टो बाह्यवातस्तदमृतसहितो नाभिमध्ये प्रविष्टः ।
सन्तापं क्षुत्पिपासां हरति वरतनौ सन्निरुद्धो विषञ्च
[a]श्वेतो बिन्दु र्ललाटे [1]स्वरपरिकरितो मुञ्चमानोऽमृतं वा ॥ १६३ ॥

घ्राणे रन्ध्रद्वयेन त्वपि पिहितमुखे बाह्यवातः समस्तः
प्राणेनाकृष्य वेगात्तडिदनलनिभो घट्टितोऽपान[2]वायोः ।
कालेनाभ्यासयोगात् व्रजति समरसं चन्द्रसूर्याग्निमध्ये
अन्नाद्यं क्षुत्पिपासामपहरति तनौ चामरत्वं ददाति ॥ १६४ ॥

स्वच्छायामातपस्थामपरमुखरवे स्तब्धदृष्ट्यावलोक्य
पश्चाद् व्योमाभिवीक्ष्येत् समरसपुरुषो दृश्यते धूम्रवर्णः ।
[b]षण्मासाभ्यासयोगादवनिगतनिधिं दर्शयेद् [3]भूमिच्छिद्रं
वृक्षच्छायां प्रविश्य त्वथ गगनतले भाविता बिन्दुमाला ॥ १६५ ॥

या शक्ति र्नाभिमध्याद् व्रजति परपदं द्वादशान्तं कलान्तं
सा नाभौ सन्निरुद्धा तडिदनलनिभा दण्डरूपोत्थिता च ।
चक्राच्चक्रान्तरं वै मृदुललितगतिश्चालिता मध्यनाड्यां
[c]यावच्चोष्णीष[4]रन्ध्रे स्पृशति हठतया [5]सूचिवद् बाह्यचर्म ॥ १६६ ॥

---

1. CLDV. सुरपरि°
2. CLDV. °वायुः
3. CLDV. च्छिद्रभूमि
4. CLD. °रन्ध्रं
5. CLD. सूचिबद्धा ह्यचर्मं

a. dpral bar t'ig le dkar po dbyaṅs kyis yoṅs su bskor ba bdud rci spro bar byed pa yis kyaṅ ṅo

b. zla ba drug tu goms pa'i sbyor ba dag las sa la gnas pa'i gter ni sa yi bu gar mt'oṅ

c. ǰi srid gcug tor bug par bcan t'abs ñid kyis p'yi rol gyi ni pags pa la k'ab bžin reg

आपानं तत्रकाले परमहठतया प्रेरयेदूर्ध्वमार्गे
उष्णीषं भेदयित्वा व्रजति वरपुरं वायुयुग्मे निरुद्धे।
एवं वज्रप्रबोधान्मनसि सविषयात् खेचरत्वं प्रयाति
पञ्चाभिज्ञास्वभावा भवति पुनरियं योगिनां विश्वमाता॥ १९७॥

मुद्रा मायानुरूपा मनसि च गगने रूपवद् दर्पणे च
त्रैलोक्यं भासयन्ती तडिदनलनिभानेकरश्मीं स्फुरन्ती।
बाह्ये देहेष्वभिन्ना विषयविरहिता[1]भासमात्राम्बरस्था
[a]चित्तं चेतोमयालिङ्गयति च जगतोऽनेकरूपस्य सैका॥ १९८॥

त्यक्त्वेमां कर्ममुद्रां सकलुषहृदयां कल्पितां ज्ञानमुद्रां
सम्यक्सम्बोधिहेतो जिनवरजननीं भावयेद् दिव्यमुद्रां।
[b]निर्लेपां निर्विकारां खसमहततमां व्यापिनीं [2]योगगम्यां
[c]कूटस्थां ज्ञानतेजां भवकलुषहरां कालचक्रानुविद्धां॥ १९९॥

[d]विज्ञानं नाणुरूपं त्रिभव इह तथा नास्ति विज्ञानमेव
बुद्धप्रज्ञास्थिता न क्वचिदिति वचनं देशयिष्यन्ति बौद्धाः।
शून्यं यास्यन्ति येनाक्षररहितनराः शून्यतां तां गृहीत्वा
भर्त्रा तेनाच्युतं यत् सहजतनुसुखं देशितं मन्त्रयाने॥ २००॥

---

1. P'. आभासमात्रा°
2. CLDV. योगिगम्यां

a. sems la sems dag gis ni bdag gis 'k'yud te 'gro ba du ma'i gzugs čan de ni gčig pu'o
b. rnam par 'gyur ba med čiṅ mk'a' mñam mun bčom k'yab byed rnal 'byor dag gis bgrod bya t'er zug gnas
c. ye šes gzi brjid srid pa'i dri ma 'p'rog čiṅ dus kyi 'k'or lo rjes su rig pa bsgom par bya
d. srid gsum p'ra rab gzugs min 'dir ni rnam par šes pa de bžin rnam par šes pa ñid med de

गोखड्गाश्वेभनाथान्[1] व्रजतनुविषयानिन्द्रियं यज्ञकाले
यत्ते [2]शुद्धासि चैतद्द्विषयविवर्णानां ज्ञानयोगे निरोधः ।
यत्पानं दीक्षितानां भवति सरुधिरं गोऽजिने सोमवल्ल्या
मूर्ध्नः सोमामृतं [3]यद् भगरजमिगतं सर्वगानन्दरूपं ॥ २०१ ॥

ब्रह्माकायो हरोवाक् हरिरपि च मनः प्राणिनां ते त्रिवेदाः
ॐकारस्ते त्रिवर्णाः शशिरवि हुतभुक् ते त्रिनाड्यो गुणाश्च ।
कौलः काये [4]कुलेन्यो विषयगगतोऽथर्वणो नादरूपी
तन्मध्येऽनाहतं यद्विषयविरहितं निर्गुणं चाक्षरं तत् ॥ २०२ ॥

वेदान्ते गुह्यमेतत् कथितमपि पुरा ब्रह्मणा योगिनां वै
कालाज्ञानप्रनष्टै[5] र्मुनिभिरिह वचो देशितः प्राणिनाञ्च ।
जाता तस्मिन् प्रवृत्तिः कुनरकफलदा स्वर्गहेतो र्नराणां
अङ्गारो नेन्दुवर्णः क्वचिदिह हि भवेत् क्षीरधाराभिषिक्तः ॥ २०३ ॥

नियोगै र्वेदवाक्यैः समयविरहितै र्वञ्चिता ये नरास्ते
रक्षां कृत्वा स्वनार्याः [6]दिननिशिसमये स्वात्मपुत्रार्जनार्थं ।
दानं पुत्रेण दत्तं भवति किल पिण्डः प्रेतलोकं गतस्य
नेदं कामदानं समसुखफलदं गोपितं दुष्टविप्रैः ॥ २०४ ॥

---

1. CL. गोषण्डः श्वेतनायान् D. गोषड्भ्यः श्वेतनाथान्
2. C यत्तेखन्धासि L. यत्तेस्वभाषि D. यत्तेस्वन्वामि
3. CLD. तद्द
4. CLD. कुलान्यो
5. CL. तदज्ञान° D. चैतज्ञ°
6. CLD. प्रतिदिनसमये

a. ba laṅ bse rta glaṅ po'i mgon soṅ mč'od sbyin dus su lus kyi yul la k'yod kyi dbaṅ po ni

b. bde bar bzuṅ bgyi gaṅ de yul daṅ yul čan rnams ni ye šes sbyor ba dag las 'gog pa ste

c. dus kyis šes pa rab ñams t'ub pa rnams kyis 'dir ni srog č'ags rnams la gsod pa dag kyaṅ bstan

d. de rnams gžan gyi bu ni mi skyed don du ñin mc'an dus su raṅ gi bud med bsruṅ byas nas

जात्यश्वेनान्यपुंसो यदि भवति महानाटिकायां महाश्वः
लक्ष्मीश्चास्य[1] प्रभावात् पुनरपि न भवेत् स्वामिनः किं न लाभः ।
रक्षां कुर्वन्ति येन प्रतिदिनसमये रागिनः स्व स्व नार्याः
[a]कस्त्वं का ते [2]स्वनारी मरणमुप[3]गताहाऽशुभः कर्मबन्धः ॥ २०५

गोदानं भूमिदानं ह्यपरमपि तथा भोगदं मर्त्यलोके
भैषज्याहारदानं सकलरुजहरं क्षुत्पिपासाहरञ्च ।
सर्वस्मिन् कामदानं समसुखफलदं किं पुनश्चक्रकाले
इष्टा भार्या भगिन्यपि सुभगदुहिता गुह्यदाने प्रदेया ॥ २०६ ॥

सद्वेश्या कर्ममुद्रा भवति च समया गुप्तनारी परस्त्री
[b]स्वच्छन्दा धर्ममुद्रा बहुविषयरता ज्ञानमुद्रा स्वभार्या ।
[c]सद्वेश्या द्वादशाब्दा [4]परमसुखरता षोडशाब्दा कुलस्त्री
स्वच्छन्दा विंशदब्दा भवति [5]सुदुहिता त्रिंशदब्दा स्वभार्या ॥ २०७ ॥

पूर्वं बुद्धै र्धरित्रीगजतुरगरथानेकसौवर्णभावाः
दत्ता बुद्धत्वहेतोः पुनरपि च शिरो रक्तमांसं प्रदत्तं ।
एभि बुद्धत्वमिष्टं न हि भवति ततः कामदानं प्रदत्तं
बुद्धत्वं तेन जातं जिनजनककुले [6]गुह्यदानेन पुंसां ॥ २०८ ॥

---

1. CLDP. °श्वाश्व° ; 'di yis mt'u las
2. CLD. सुनारी 3. CLD. °गते
4. CLD. °दुःखकरा
5. CL. स्वदुहिता ; mjes pa'i bu mo
6. CLD. गुप्त° ; gsaṅ ba'i sbyin pa

a. ši bar gyur k'yed su k'yed kyi raṅ gi bud med su ste kye ma mi dge'i las kyis bčiṅ

b. raṅ dbaṅ č'os kyi p'yag rgya yul ni maṅ po la dga' raṅ gi č'uṅ ma ye šes p'yag rgya'o

c. smad 'c'oṅ dam pa bču gñis lo lon mč'og gi bde ba la dga' gžan gyi bud med bču drug lo

हेमं ताम्रेण तुल्यं सुरमकुटमणिः [1]काचखण्डेन तुल्यः
सद्वेश्या कामदानैरमरकुलवधू[2]श्चर्मखण्डेन नाभिः ।
[a]जात्यश्वो गर्दभेन प्रवरगजपति र्लभ्यते यद्यजेन
भार्यादानेन देवा जिनजनककुले तत्र किं नैष लाभः ॥ २०९ ॥

[b]मैत्रीस्थाने [3]न दानं समसुखफलदं तुल्यसत्त्वप्रभावात्
सूपेक्षास्थान एवं प्रवरजिनकुले मारसत्त्वस्वरूपात् ।
[c]हीनत्वादुत्तमत्वात् सकरुणमुदिता स्थानयुग्मे [4]प्रदत्तं
संभारौ द्वौ [5]प्रपूर्णाक्षयसुखफलदं सौगतानां परार्थं ॥ २१० ॥

वर्णो यस्य प्रमाणं भवति नरपते तस्य वेदः प्रमाणं
वेदो यस्य प्रमाणं खलु भुविनिलये तस्य यज्ञः प्रमाणं ।
यज्ञो यस्य प्रमाणं विविधपशुनृणां तस्य हिंसा प्रमाणं
हिंसा यस्य प्रमाणं नरकभयकरं तस्य पापं प्रमाणं ॥ २११ ॥

वास[6]ग्रासार्थमिष्टां कथयति भगवान् श्रीविहारप्रतिष्ठां[7]
भैषज्याहारदानं किल रुजशमनं तत्र दाता ददाति ।
दानाभावे विहारः क्षितितलनिलये तिर्यगावास एषः
ग्रामो यत्रैव संघो भवति नरपते तत्र धर्मश्च बुद्धः ॥ २१२ ॥

1. CLD. काल°
2. CLD. चर्म°
3. CLD. दानेन दानं
4. CLD. प्रदत्तः
5. CLD. प्रपूर्णक्षर°
6. D. °ग्रामार्थमिष्टं
7. CLD. प्रतीष्टं

a. boṅ bu yis ni rigs kyi rta daṅ ra yis rab mč'og glaṅ č'en bdag po gaṅ žig rñed pa daṅ

b. byams pa'i gnas la sbyin pa dag ni bde mñam 'bras ster ma yin sems čan mt'uṅs pa'i mt'u las so

c. sñiṅ rje dga' daṅ bcas pa'i gnas ni zuṅ la gžan gyi don tu bde bar gšegs pa ba rnams kyis / rab tu byin na dman pa ñid daṅ mč'od ñid p'yir na ts'ogs gñis rab rjogs mi zad bde 'bras ster

बुद्धं धर्मञ्च संघं शरणमुपगता मानुषा मोक्षहेतोः
ᵃनाथं[1] बुद्धा विहारे स्थित इह लिखितः पुस्तको धर्म एव ।
ᵇसंघः काषायधारी परमविमुखं जन्मलक्षं ददाति
आचार्यो बुद्ध एव प्रवरभुवितले देशना तस्य धर्मः ॥ २१३ ॥

ᶜसंघस्तस्मिन् स्थितो यः प्रमुदितहृदयः सर्वसत्त्वानुकम्पी
ᵈसोऽस्मिन्नुत्कृष्टचर्या द्विविध इह पुनः श्रावकोऽनुत्तरश्च ।
भिक्षुण्यो भिक्षवश्चापि[2] पुनरिह महोपासकोपासिकाश्च
योगिन्यो योगिनो वै सहजसुखरतोपासकोपासिकाश्च ॥ २१४ ॥

पुण्यज्ञानार्थहेतो विविधमपि सदा दानमत्यर्थमिष्टं
भोज्याद्यं [3]श्रावकेभ्यः परमसुखकरं योगिनामिष्टदानं ।
दातारो ये ददन्ति प्रमुदितहृदयाः सर्वदा रत्नि...
ते पुण्यज्ञानपूर्णाः परमसुखपदं जन्मनीह [3]व्रजन्ति ॥ २१५ ॥

आचार्यं निन्दयन्ति प्रकटमपि जिनं श्रावका [4]येऽप्रबुद्धाः
तेऽवीचिं यान्ति शीघ्रं परमभयकरं सारिता विघ्ननाथैः ।
स्वाधिष्ठानं करोति प्रवरजिनपतिर्यस्य मन्त्रप्रभावैः
को भिक्षुस्तस्य तुल्यो व्रतनियमपदे ब्रह्मचारी नराणां ॥ २१६ ॥

---

1. CLD. नायुं
2. CLD. भिक्षवश्च पुनरिह हि
3. P′. श्रावकाणां
3. CLD. जन्मनीहैव यान्ति
4. CLD. ये प्रबुद्धाः ; mk'as pa min pa'i ñan t'os gan žig smod byed pa

a. 'dir ni sans rgyas gcug lag k'an na gnas pa 'di dan yi ge bris pa'i glegs bam č'os ñid do
b. dge 'dun nur smrig 'jin pa mč'og gi k'yab bdag bde ba skye ba 'bum p'rag rnams kyis ster ba min
c. dge 'dun gan žig der gnas rab tu dga' ba'i t'ugs ldan sems čan kun la rjes su brce ba ste
d. de 'dir rnams bži rnam pa gñis gsuns 'dir ni slar yan ñan t'os pa dan bla na med pa'o

कष्टं कुर्वन्ति सर्वे परमसुखरता भिक्षुको वा परिव्राट्
नग्नो मौण्डी जटी च श्रुतपठनरतः पण्डितो [1]मार्गनष्टः ।
कर्त्तुश्चात्मग्रहेण स्वपरमिह सदा पुत्रदारग्रहेण
[a]भक्ष्याभक्ष्यग्रहेणाप्यकुलकुलरतापात्रपात्रग्रहेण ॥ २१७ ॥

बद्धक्षेत्रं च बुद्धं समसुखफलदं कायवाक्चित्तरागं
एतत् संहारयित्वा त्वपरमपि विभुं पापबुद्धिः समीक्षेत् ।
क्षेत्रे तीर्थेऽन्यदेशे व्रतनियमशतै लंङ्घनैः शैलपातैः
[b]संग्रामे ग्रस्तसूर्ये विषयसुखरतोऽनेकशस्त्राग्निपातैः ॥ २१८ ॥

मारैरेतत्समस्तं रचितमपि पुरा रक्तपानस्य हेतोः
स्वर्गस्तीर्थोपवासै र्मरणमुपगतस्याहतस्यैव युद्धे ।
[c]गोभानो र्मोचनार्थे गृहवनविषये विप्रकार्ये मृतस्य
तस्मादेष[2] स्वकायः[3] समसुखनिलयो रक्षणीयः परस्य ॥ २१९ ॥

श्रुत्वा यस्तन्त्रराजे[4] जिनवर[5]चरितं[6] चाभिषेकं गृहीत्वा
ईर्ष्यां भूयः करोति प्रविशति नरकं सोऽष्टमं यावदेव ।
यस्मिन् सूच्यग्रभूमावशुभफलवशान् नारकाः सञ्चरन्ति
तस्माद् ग्राह्योऽभिषेको न हि भवति नृणां यावदीर्ष्यास्ति चित्ते॥२२०॥

---

1. P. मन्त्रनष्टः ; lam ñams t'ams čad
2. CLD. °देकः
3. CL. सुकायः ; raṅ daṅ gžan gyi lus ni
4. CLD. °तन्त्रराजं
5. PP′. जिनपति ; rgyud kyi rgyal po las ni rgyal ba mč'og gi spyod pa
6. CLD. °रचितं

a. rigs daṅ rigs ni min pa la dga' snod daṅ snod min dag tū žen pas dka' ba byed pa'o
b. yul gyi bde 'dod gyul daṅ ñi ma gza' yis zin la du ma'i mc'on daṅ me la mč'on pas so
c. grol ba'i don daṅ k'yim daṅ nor gyi yul daṅ bram ze'i bya ba dag la ši ba; mt'o ris so

दानं शीलं प्रपूर्णं जिनजनककुले क्षान्तिवीर्यञ्च पूर्णं
ध्यानं प्रज्ञाभ्युपायः प्रणिधिरपि बलं ज्ञानपूर्णं ह्यनेन ।
भार्यादानेन शीघ्रं प्रमुदितमनसो योगिनो जन्मनीह
[a]तस्मिन् कृत्वानुबन्धं[1] नरकमुपगता मोहिता ये नरास्ते ॥ २२१ ॥

पृथ्वी लक्ष्मीनिमित्तं सुचपलहृदय[2]स्तीक्ष्णखड्गं गृहीत्वा
योधाकीर्णे समन्तात् प्रविशति हि रणे कातरश्चातुरङ्गे ।
दृष्ट्वा मातङ्गवृन्दं पतति करतलात्तस्य भीतस्य खड्गः
तस्मिन् खड्गस्य दोषो न हि भवति यथा मन्त्रजातेस्तथैव ॥ २२२ ॥

[b]मन्त्रे वीरक्रमेणाप्यसुरफणिसुरान् साधयेद्रौद्रभूम्यां
स्वाधिष्ठानेन देवीः समयकुलगता ध्यानजापैः सहोमैः ।
सेकं शुद्धक्रमेण त्वनवरतमहानन्दचित्तेन मन्त्री
ज्ञानं चिन्तामणि यत् प्रभवति च ततश्चेषमार्गो जिनस्य ॥ २२३ ॥

[c]सूतस्याग्ने रिपुत्वं न शिखिविरहितः सूतबन्धः कदाचित्
नाबद्धो हेमकर्ता कनकविरहिता वादिनां नैव भोगाः ।
एवं स्त्रीसङ्गहीनो न हि भवति सदा योगिनां चित्तबन्धः
[d]नाबद्धः कायवेधो सहजसुखमिहाविद्धकायो ददाति ॥ २२४ ॥

---

1. CLD. कृत्वास्मिन् रागबन्धं
2. CLD. °हृदयं तीक्ष्ण°

a. gaṅ ži̮g rmoṅs pa'i mi de rnams kyis de la rjes su 'čʿiṅ ba byas nas dmyal bar ñe bar 'gro

b. sṅags daṅ dpa' bo'i rim pa yis kyaṅ lha min gdeṅs čan lha rnams drag po'i sa la bsgrub par bya

c. me ni dṅul čʿu'i dgra ñid yin te me daṅ rnam par bral na nam yaṅ dṅul čʿu 'čʿiṅ ba med

d. bčiṅs pa med na lus 'bigs med de ma pʿug lus kyis 'dir ni lhan skyes bde ba ster ba min

उद्याने पर्वते वा जनमृगरहिते साधयेत् सौम्यमन्त्रान्
रौद्रान् रौद्रश्मशाने सुरवरभवने स्तम्भनं मोहनञ्च ।
[a]वश्याकृष्टि च मन्त्री परमविभुसुखं सर्वमुद्राप्रसङ्गे
[b]अन्यस्थानेऽन्ययोनौ न हि भवति नृणां जन्मलक्षेश्च सिद्धिः ॥ २२५ ॥

वेश्मग्रामेऽक्षसूत्रै दिननिशिसमये मन्त्रजापं हि कृत्वा
श्रान्तो मूढो विरक्तो वदति पुनरिदं मन्त्रसिद्धिश्च नास्ति ।
स्थानं शून्यञ्च कालं परमनिशिगतं नैव जानाति सम्यक्
रोगः पादाङ्गुलीषु प्रतिशिरसि करोत्यौषधीभिः प्रलेपं ॥ २२६ ॥

न ध्यानं मन्त्रजापः करणमपि महामण्डलान्यासनानि
होमो[1] मन्त्रप्रतिष्ठा रजसि [2]जिनकुलावाहनं प्रेषणञ्च ।
[c]मुद्रासिद्धिं ददाति प्रवरविभुसुखं स्त्रीप्रसङ्गं विहाय
तस्मात् तद् भावनीयं प्रतिदिनसमये योगिना मोक्षहेतोः ॥ २२७ ॥

मूर्च्छां निद्रां प्रविष्टं भवति नरपते निःस्वभावं स्वचित्तं
[d]जाग्रायां सस्वभावं प्रकटयति न तत् प्राणिनां मोक्षमार्गं ।
[e]भावाभावैश्च [3]भिन्नं न हि समसुखदं योगिनां चित्तवज्रं
ख प्रज्ञालिङ्गितं यत् सहजसुखगतं मोक्षदं तत् स्वचित्तं ॥ २२८ ॥

---

1. CLDP'. होमं
2. CLD. निजकुला° ; rgyal ba'i rigs rnams spyan draṅ ba
3. CLD. °भावैर्विभिन्नं

a. dbaṅ daṅ dgug pa sṅags pas mc'og gi sa la bde ba p'yag rgya kun daṅ rab tu sbyor ba la
b. gnas gžan daṅ ni skye gnas gžan du mi rnams kyi ni skye ba 'bum p'rag gis kyaṅ 'grub mi 'gyur
c. bur med sbyor ba rnam par spaṅs nas rab mc'og k'yab bdag bde ba p'yag rgya'i dṅos grub ster bar byed
d. sad la raṅ bžin daṅ bcas gsal bar byed de de dag sreg c'ags rnams kyi t'ar pa'i lam ma yin
e. dṅos daṅ dṅos med kyis p'ye sems kyi rdo rje rnal 'byor ba rnams dag la bde mñam ster ba min

ॐ आः हुं होः क्रमस्थैः प्रथममिह सदा बोधयेच्छोधयित्वा
मद्यं ᵃप्रज्वालयित्वा द्रुतशशिनमिवाभावयित्वा क्रमेण ।
तत् पात्राद् बिन्दुना वै शशिकरकमलानामिकाग्रेण भूम्यां
कृत्वा बाह्ये त्रिकोणं दिनकरसदृशं वर्त्तुलं तस्य मध्ये ॥ २२९ ॥

तन्मध्ये ज्ञानचक्रं त्रिभवमपि गतं भावयित्वा स मन्त्री
अङ्गुष्ठानामिकाभ्यां प्रतिदिनसमये तर्पणाद्यं करोति ।
देशग्रामाधिपानां प्रथममिह बलिं चादिमध्यान्तनाम्ना
हारीत्या पिण्डके द्वे पुनरपि च बलिं क्रोधराजाय मन्त्री ॥ २३० ॥

दूतीनां ग्रासमग्रं क्षितितलनिलये भर्त्तुवज्रे ददाति
भूतानां [1]भुक्तशेषं पठति पुनरिमां दानगाथां शुभार्थं ।
[2]अङ्गन्यासं [3]स्ववज्रैः शिरसि गलहृदोर्नाभिगुह्ये च मूर्ध्निᵇ
निद्राकालेऽङ्गवक्त्रैरुभयकुलगतैरर्चने मैथुने च ॥ २३१ ॥

प्रत्यक्षं चानुमानं द्विविध[4]मिह भवेद् देवतालम्बनं यत्
ᶜप्रत्यक्षं तत्त्वयोगादुडुरिव गगनेऽनेकसंभोगकायं ।
अप्रत्यक्षेऽनुमानं मृतकतनुरिवातत्त्वतः कल्पनं यच्-
चित्रादौ दर्शनीयं ह्यपरिणतधियां योगिनां भावनार्थं ॥ २३२ ॥

---

1. CLD. भक्त° 2. CLD. सर्वे सत्त्वाः
3. CLD. सुखस्थां 4. CLD. °मपि

* See note under verse 170 regarding the numbering of verses in P'.

a. rab tu 'bar bar byas te ri boṅ čan ni žu ba bžin du rim pas bsgom par byas nas ni

b. mgo daṅ mgrin pa sñiṅ ga lte gsaṅ goug tor du ni raṅ gi rdo rje rnams kyis yan lag dgod / gñi ga'i rigs la gnas pa'i yan lag sgo' rnams kyis ni gñid kyi dus daṅ mčod daṅ 'k'rig pa la

c. mṅon sum daṅ ni de ñid sbyor bas mk'a' la skar ma bžin du ma loṅs spyod rjogs pa'i sku

रूपं वा मण्डलं वा प्रथममपि [1]पटे [2]ऽतत्त्वतो भावनीयं
आकाशे तत्त्वयोगात् सकलमविकलं दृश्यमानं स्वचित्तं ।
वर्षार्धं वर्षमेकं गुरुनियमवशाद् यावदेव स्थिरं स्यात्
[a]मुद्रासङ्गेन तस्मात् कतिपयदिवसैरक्षरत्वं प्रयाति ॥ २३३ ॥

सर्वस्मिन् तन्त्रराजे खलु कुलिशपदं योगिनामेतदुक्तं
बालानां [3]पाचनार्थं परमकरुणया गोपितं विश्वभर्त्रा ।
तस्मात्तं भेदयित्वा प्रतिदिनसमये योगिना भावनीयं
मुद्रा सिद्धयर्थहेतो जिनवरजनकानाहृतं कालचक्रं ॥ २३४ ॥

इति श्रीमदादिबुद्धोद्धृते [4]श्रीकालचक्रे [5]साधनपटलश्चतुर्थः ॥

---

1. CLD. तटे ; bris sku la ni
2. D. तत्त्वतो ; de ñid min pas bsgom par bya
3. CLD. पाठनार्थं ; byis pa rnams ni smin par byed pa'i...
4. P. श्रीमहाकाल°
5. P. साधना पटल°

a. de nas p'yag rgya'i sbyor bas ñin žag 'ga' žig rnams kyis 'gyur ba med pa ñid du rab tu 'gyur

पञ्चमः पटलः

किञ्चित् [1]ज्ञात इह भत्तु जिनवरसहितं साधनं यत्त्वयोक्तं
भूयोऽहं श्रोतुकामस्त्रिदशनरगुरो मण्डलं धातुभेदैः ।
बुद्धानां षट्कुलानि त्वलिकलिषु गतान्येव षड्योगिनीनां
श्रुत्वा सौचन्द्रवाक्यं गदति जिनपति र्धातुभि मण्डलाद्यं ॥ १

[a]स्तम्भान् वज्रावलीं वै कुरु मह्विलयं भित्तिमेवास्थिभिश्च
मांसासृक्तोयविड्भिः सुरयमधनदे चापरे रज्जुपातं ।
पित्तेन श्लेष्मेणार्कं शशिनमपि तथा स्नायुभिस्तोयजानि
पञ्चप्राकाररेखाः क्षितिजऋतुभुग्मारुताकाशवाभिः ॥ २ ॥

[b]भर्त्तृकजं कालनाड्या [2]चलशिखित्वल्याद्यश्च चर्मादिमिश्च
अर्कद्वाराणि रन्ध्रे मणिमयरचनां दन्तपंक्त्या तथैव ।
चक्राण्यष्टौ श्मशाने चलवलयगतान्यङ्गुलीनां नखैश्च
[c]वर्षार्चि र्लोमभि र्वै दिशिविदिशिगता मण्डलस्यावसाने ॥ ३ ॥

एवं वै कायवज्रं वरविविधगुणं [d]मण्डलाकारमुक्तं
वाग्वज्रं चादिकाद्यं सकलजिनकुले देवताकारमेव ।
षट्शून्यैश्चित्तवज्रं त्रिविधभवगतं नायकाकारमेकं
एवं वै ज्ञानवज्रं भवभयमथनं [e]विश्वमातृस्वरूपं ॥ ४ ॥

---

1. CLD. ज्ञानं
2. CLD. °नाड्याश्चल°

a. ka ba rnams dan rdo rje p'ren ba sa yi 'k'or yug rcig pa ñid ni rus pa rnams kyis mjod

b. dus kyi ros yis gdo bo'i č'u skyes gyo ba me yi 'k'or yug la sogs lpags pa la sogs kyis

c. ba spu rnams kyis rdo rje me lče dkyil 'k'or gyi ni mt'a' ru p'yogs dan p'yogs bral dag tu gnas

d. dkyil 'k'or gyi ni rnam par gsuns

e. sna c'ogs yum gyi ran bžin no

[a]वर्गाणां कादिषण्णां क्रमपरिरचितानां कुलानि क्रमेण
वज्रासी रत्नचक्रं जलजमपि तथा कर्त्तिका वै जिनानां ।
भूयश्चैकैकवर्गः सकलजिनवरै र्भिद्यते पञ्चभेदैः[1] ।
प्रत्येकं वर्णभेदात् क्षितिजलहुतभुग्मारुताकाशभावात्[2] ॥ ५ ॥

आदौ शून्यप्रभेदास्त्वपि ङ-ञ-ण-म-नाः ठ्क[3]स्तथादिस्वरश्च
वायोर्भेदस्त्विकारस्तु घ-झ-ढ-भ-ध-शा वह्नि [4]भेदास्त्वगाद्याः ।
अम्भोभेदोप्युकारः ल-ख-छ-ठ-फ-थ-वा[5]भूमिभेदे लृकाद्याः ।
एवं पञ्चप्रकारैः परमजिनकुलैः कादिवर्गा विभिन्नाः ॥ ६ ॥

[6]उष्णीषं पञ्चशून्यं त्रिकुलमपि तथा कायवाक्चित्तवज्रं
आद्या [7]मुद्राकुलं वै हयरवलयुताः कादिवर्गाः समस्ताः ।
लोकालोकं समात्रा हयरवलयुता लोकलोकोत्तरञ्च
काद्या [c]विद्याधरेन्द्रं भवति हि सकलं चाष्टकूटस्थवर्गाः[8] ॥ ७ ॥

त्रिंशद् वै कादिवर्णा[9] हयरवलयुताः [b]सक्ष षट्त्रिंशदेव
भिन्ना मात्राविकारै रसगुणितरसाश्चक्रनाथा भवन्ति ।
[d]एकाङ्गश्चैकया वै द्वि सपरिकरितः प्रज्ञयालिङ्गितोऽभूत्
पञ्चात्मा पञ्चभिः स्यान् नवपरिकरितश्चक्रनाथो नवात्मा ॥ ८ ॥

---

1. CLD. पञ्चवर्णैः ; rgyal ba mc'og gi dbye ba lṅa rnams dag gis dbye
2. CLD. °मारुताकाशयोगात् ; nam mk'a'i dṅos po dag las sc
3. CLD. °मनष्का°
4. CLD. °भेद°
5. CLDP. °फथ युग् भूमि°
6. CLD. उष्णीषे
7. CLD. मुद्रामूलं
8. L. °कूटंस्तवर्गाः
9. L कादिवर्गाः

a. sde pa ka la sogs pa drug po rim pas yoṅs su bkod pa rnams kyi rigs ni rim pa yis
b. kṣa daṅ bcas pa sum cu rca drug ñid
c. rig sṅags 'c'aṅ gi dbaṅ por
d. sku ni gcig pa ṅes par gcig gi 'k'or daṅ bcas pa gñis ni śes rab dag gis 'k'yud par 'gyur

"मात्रासंख्यात्मको वै त्रिदशनवदिशाभिश्च षट्त्रिंशदात्मा
[a]याद्याभि र्द्वारपालाः सकलगणकुलं शेषमात्राभिरेव ।
षट्क्रोधाः हादिभिः स्युः स्वकुलदिशिगता वायुमात्रादिभेदैः
प्रत्येकं वर्णभेदै रसगुणितरसा योगिनी योगतन्त्रं ॥ ९ ॥

एवं प्रत्येकवर्णो रसगुणितरसे मण्डले मण्डलेशः
[b]स्कन्धै र्भूतेन्द्रियाद्यैः सकलगणकुलं शोधयेन्मातृभेदैः ।
शून्यैश्चानाहताद्यैः सकलजिनकुलै र्मुद्रणं देवतानां
ऊष्णीषादम्बुजान्ते विषमसमकुले चक्रमध्यासने च ॥ १० ॥

वज्रै र्वक्त्रप्रभेदो भवति जिनपते र्मातृभेदै[1] र्भुजानां
तत्त्वै र्मुद्राप्रभेदस्त्वपरमपि तथा कायवज्रादिभिश्च ।
षट्त्रिंशद् योगतन्त्रे त्वपरिमितगुणेऽनेकवर्णप्रभेदे
प्रत्येके [2]वर्णनामे समविषमकुले [3]देवती देवतानां ॥ ११ ॥

[c]बीजैकत्वैकवीरो रजसि समरसः प्रज्ञयालिङ्गितोऽभूत्
स्कन्धैः पञ्चात्मकोऽधिष्ठितमपि नवको भूमिधात्वादिभिश्च ।
पाय्वाद्यैश्चक्षुराद्यैः परिकरितमिदं पञ्चविंशात्मकश्च
एवं दन्तोद्भवे वै पुनरपि दशनैरीश्वरोऽनन्तचक्रो ॥ १२ ॥

---

1. D. मातृभेदै° P. मात्रि° ; p'yag rnams dbyaṅs kyi dbye ba yis
2. CLD. वर्णमाने ; yi ge so so'i miṅ čan
3. CLDP'. देवता देवतीनां ; lha mo daṅ ni lha rnams dag gi'o

a. dbyaṅs kyi graṅs kyi bdag ñid bču gsum dgu daṅ p'yogs rnams kyis kyaṅ sum ču rca drug bdag ñid te
b. ya la sogs pa rnams kyis sgo skyoṅ mt'a' dag c'ogs kyi rigs ni lhag ma'i dbyaṅs rnams ñid kyis so
c. p'uṅ po 'byuṅ ba dbaṅ po la sogs dbyaṅs kyi dbye bas mt'a' dag c'ogs kyi rigs ni sbyaṅ bar bya
d. sa bon gčig pu dpa' bo gčig pa rdul la ro mñam pa ni šes rab dag gis 'k'yud par 'gyur

शुद्धे संशुद्धतोयाच्छशधरधवलः पद्मचिह्नोऽमिताभः
मानो लोकेश्वरो वै हयरथगमना मामकी रूपवज्रा ।
[a]रौद्रो चाब्धि र्गणेन्द्रो द्विजफणिसहितो व्याघ्रवक्त्रा [1]सलूका
एते श्रीवामवक्त्रात् परमकरुणया स्फारिता वज्रिणा च ॥ १३ ॥

धर्मे संशुद्धवायोस्त्वसिकरकमलोऽमोघसिद्धिश्च तारा
वैगर्भः स्पर्शवज्रा त्वतिबलसहिता चर्चिका शृङ्खला च ।
[b]नैर्ऋत्यः [2]शूद्रनागाः पवन इति तथा श्वानवक्त्रा सकाका
मैत्रीचित्तेन चैते त्रिभुवन[3]पतिना स्फारिता पूर्ववक्त्रात् ॥ १४ ॥

सम्भोगे शुद्धवह्ने रुदयरविनिभो रत्नधृक् पाण्डरा च
[c]भूगर्भो जम्भको वै वररसकुलिशा शूकरी षण्मुखाग्निः ।
राजानौ द्वौ फणीन्द्रौ प्रकटितभृकुटी शूकरास्या सगृध्रा
एते श्रीसव्यवक्त्रात् परममुदितया स्फारिता विश्वभर्त्रा = १५ ॥

नाभौ संशुद्धभूमे र्वरकनकनिभश्चक्रपाणि र्मुनिश्च
विष्कम्भी लोचना च प्रवरनरपते स्तम्भको गन्ध[4]वज्रा ।
[d]मारीचीन्द्रो च शक्रो युगमुखसहितो वैश्यनागादि सर्वे
भर्त्रा चोपेक्षया वै सकल[4]जनहिताः स्फारिताः पश्चिमास्यात् ॥ १६ ॥

---

1. P'. सुयूका
2. CLD. सूत्रनागाः
3. CLD. °गुरुणा ; gsum gyi bdag pos
4. CLD. °वज्रो
4. CLD °सकलजिन° ; skye bo kun la p'an rnams

a. drag mo č'u gter o'ogs kyi dbaṅ po gñis skyes gdeṅs čan daṅ ni stag gdoṅ ma daṅ 'ug par bčas

b. bden bral daṅ ni rluṅ žes bya daṅ dmaṅs rigs klu daṅ de bžin k'yi gdoṅ ma daṅ bya rog bčas

c. sa yi sñiṅ po rmugs byed daṅ ni ro mč'og rdo rje ma daṅ p'ag mo gdoṅ drug me yi lha

d. 'od zer čan daṅ dbaṅ mo brgya byin dus kyi gdoṅ pa daṅ bčas rje rigs klu la sogs pa kun

ऊष्णीषे शुद्धशून्याद्वरकुलिशकरोऽक्षोभ्यधात्वीश्वरो द्वे
ऊष्णीषो धर्मधातु र्गगनगुणवशाद् वज्रपाण्यादयोऽन्ये ।
ᵃगुह्ये शुद्धात् समस्ताः समसुखनिधयः शब्दवज्रादयश्च
ऊर्ध्वाधः स्फारिता वै बहुगुणनिलयाः प्राणिनां मोक्षहेतोः ॥ १७

ᵇदिक्पत्रे लोचनाद्या विदिशदलगतं रक्तपूर्णं कपालं
ᶜप्रत्यालीढोऽर्कमूर्ध्नि प्रलयघननिभाक्रान्त सोमेश्वरो वै ।
ᵈमालाबद्धः कपालै र्जलनिधिवदनो हेरुकः सूर्यबाहुः
मुद्राद्विव्याघ्रचर्मा प्रलयगजपते र्दार्यचर्मार्द्रधारो ॥ १८ ॥

देवीभिः कृष्णरक्तामलशशितनुभिस्त्रीणि चक्राणि बाह्ये
[1]षट्वज्राः क्रोधजाभि र्द्विभुजशशिमुखाभिस्तथाभूतजाभिः ।
द्वारे चण्डाः शवस्था विदिशि च नियताः कर्त्तिका शुक्तिहस्ताः
वीराणां वेदहस्ते कुलिशडमरुकौ वज्रखट्वाङ्गघण्टे ॥ १९ ॥

श्रीमेरोरष्टदिक्षु क्षितिजलवलये सर्वपीठोपपीठं
क्षेत्रं छन्दोह मेलापक चितिभुवने वह्निवाय्वोश्च मध्ये ।
एवं देशे नगर्यां दिशिविदिशिगता देवता वेदितव्याः
प्रज्ञातन्त्राभिधानं त्रिभुवनगुरुणा स्फारितं पूर्वतन्त्रात् ॥ २० ॥

---

1. CD षट्चक्रो L °चक्रोधर्मजा° ; rdo rje drug daṅ k'ro skyes rnams ni

a. gsaṅ ba dag pa las ni mt'a' dag bde mñam gter rnams sgra yi rdo rje ma la sogs pa yaṅ

b. p'yogs kyi 'dab mar spyan ma la sogs p'yogs bral 'dab ma la gnas k'rag gis gaṅ ba'i t'od pa ste

c. ñi ma'i steṅ du gyon brkyaṅ u ma daṅ bčas dbaṅ p'yug mnan žiṅ 'jig pa'i dus kyi sprin daṅ mo'uṅs

d. t'od pa rnams kyis p'reṅ ba bčiṅs šiṅ č'u yi gter gyl žal daṅ ñi ma'i p'yag ldan he ru ka

गर्भे चक्रं नवांशं शशिरविकमले मण्डलादर्धभागं[1]
वज्रः स्तम्भावलीभ्यां रचितमपि महास्कन्धधात्वाधिदेवं[2] ।
बाह्ये प्राकारभित्तौ विषयविषयिनश्चन्द्रसूर्यासनस्थाः
[a]सूर्यस्था द्वारपालास्त्वपर[3]गणकुलं वेदिकायां समन्तात् ॥ २१ ॥

[b]इत्यादौ षट्प्रकारं [4]गदितमपि तथा योगतन्त्रं समाजं
क्रोधाः कोणेषु पार्श्वे विषयविषयिणो जम्भलो धान्यहस्तः ।
वाक्पादौ पाणिपायूभग-रविशशिनः कालनाडीस्वभावाः
प्रज्ञोपायं समस्तं त्रिमुखरसभुजं स्फारितं सव्यवक्त्रात् ॥ २२ ॥

चक्रं गर्भेऽ[5]ब्धिकोणं भवति नरपते मण्डलाद् वै त्रिभागं
[c]धातुस्कन्धाधिदेवं पुनरपरपुटे शब्दवज्रादयोऽष्टौ ।
बाह्यस्थे मण्डले वै दशदिशि[6]निहितं क्रोधवृन्दं रविस्थं
तस्मिन् प्राकारभित्तौ [7]जलधिहतयुगा बोधिसत्त्वाः समस्ताः ॥ २३ ॥

मायाजालं त्रिभेदं त्रिमुखरसभुजं देवताकायभेदात्

कल्पाद्यं यत् समस्तं जडहृदयवशात् स्फारितं वामवक्त्रात् ।
तन्त्रं योगानुबिद्धं द्विगुणमिह महासम्वरं डाकिनीनां
षट्चक्रैः षट् कुले वै नृपचितिभुवनैः स्फारितं पश्चिमास्यात् ॥ २४ ॥

---

1. L °दशभागं 2. L. °धिदेवं
3. CLD. °गुणकुलं 4. CLD. गमितमपि
5. अब्धिकोणं, ocean-cornered, signifies a square shape according to Me p'am
6. CLD. °दिशि नियतं ; p'yogs bcur bkod pa
7. Indicates number sixteen (4 × 4) according to Me p'am

a. sgo skyoṅ rnams ni ñi ma la gnas gžan pa c'ogs kyi rigs ni k'a k'yer dag la kun nas so
b. 'di la sogs pa la ni de bžin rnal 'byor rgyud kyaṅ 'dus pa rnam pa drug tu gsuṅs pa ste
c. p'uṅ po k'ams rnams lhag pa'i lha ñid slar yaṅ 'p'ar ma gžan la sgra yi rdo rje la sogs brgyad

ᵃसूत्रैः षट्रन्ध्रभागैश्चलवलयगतैर्मण्डलं सूत्रयित्वा
गर्भात् षट्षट्विभागैरपि कमलदलं कर्णिकार्धेन युक्तं
कर्त्रीं चक्राब्जरत्नैरसिवरकुलिशैश्चावलीं द्विद्विभागैः
ᵇनिर्यूहं द्वारमर्कै[1] ऋतुभिरपि[2] रसैर्वेदिकाहारभूमिं ॥ २५ ॥

पञ्चप्राकाररेखां त्रिभिरपि शिखिभिः पट्टिकां हारमूले
सूर्यैः पक्षं कपोलं त्रिगुणदिनकरैस्तोरणं स्तम्भमूर्ध्नि ।
अष्टद्वाराणि कुर्याद् दिशिविदिशि महामण्डलं वृत्तमेतत्
ᶜमध्येऽब्जं विश्ववर्णं रविशशिपुटितं[3] चासनं कर्णिकायां ॥ २६ ॥

ᵈचक्रं नीलावलीं च क्षितिरपि हरिता [4]क्ष्माऽसिता पीतचक्रं
ᵉरक्ताभूः श्वेतचक्रं क्षितिरपि धवला सावली रक्तचक्रं ।
पीता नीला च भूमिस्त्वसितमपि भवेत् श्यामवर्णञ्च चक्रं
ᶠषड्भागै[5] रङ्गभूमिं जनकमुखवशात् द्वारचक्राणि तद्वत् ॥ २७ ॥

बाह्ये द्व्यष्टश्मशानान्यपि च कुलवशात् गर्भदेव्यस्तथाष्टौ
अष्टौ पत्रे कपालान्यमृतरसयुतान्यष्टपत्रेषु देव्यः ।
बाह्ये लास्यादि देव्यो दिशिविदिशि महानागराजास्तथाष्टौ
तद्बाह्ये भूमितोयानलचलवलयान्येव वज्रावली च ॥ २८ ॥

---

1. CLD. °मेकै°   2. P'. °धातुभि°   3. CLD. °पचितं
4. D. क्ष्मा सिता   5. D. षड्भागे

a. t'ig ni drug daṅ bug pa'i č'a šas gyo ba'i dkyil 'k'or la gnas rnams kyis dkyil 'k'or t'ig btab nas

b. ñi ma rnams kyis sgo daṅ sgo k'yud dus daṅ ro rnams kyis kyaṅ k'a k'yer daṅ ni do šal sa

c. dbus su č'u skyes sna c'ogs mdog ste lte ba la ni ñi ma ri boṅ čan dag sbyar ba'i gdan

d. 'k'or lo daṅ ni p'reṅ ba sṅon po sa ni ljaṅ k'u dag daṅ sa gži nag po 'k'or lo ser

e. sa gži dmar la 'k'or lo dkar daṅ sa ni dkar po p'reṅ bar bčas pa'i 'k'or lo dmar po daṅ

f. č'a drug gis ni c'on gyi sa ste skyed byed žal gyi dbaṅ gis sgo yi 'k'or lo de bžin no

दीर्घं ह्रस्वैः स्वरैश्चापि ^a^स-त-प-ट-च-क-क्षमादि शून्यादिवर्गाः
^b^वाय्वाद्वारेषु दीर्घा रविचरणवशात् क्षमादिधातुस्वभावाः ।
^c^ऊर्ध्वाद्वारेषु ह्रस्वाः शशिचरणवशात् स्व स्व [1]चक्रारमूर्ध्नि
द्वारे द्वारान्तराले गगनतलगता ह-क्ष-युक्ताः ^d^सवर्गाः ॥ २९ ॥

डाकिन्यो ह्रस्वभावाः शशधरवदनाः कर्तिकाशुक्तिहस्ता
आलीढाः स्व स्व पात्रे दनुजरुधिरपा मुक्तकेशा विवस्त्राः ।
पादे कट्यां ललाटे श्रवणगलकरे घुघुराद्यस्थि मुद्रा
मालाखण्डैः कपालैः शिरसि कटितले पञ्चवर्णं जिनानां ॥ ३० ॥

^e^द्व्यास्या डाकाः करेषु [2]सुपविडमरुकौ वज्रखट्वाङ्गघण्टे
कण्ठे ^f^श्रीमुण्डमाला शिरसि च मुकुटो वज्रपट्टे मणिश्च ।
श्रीकण्ठौ नूपुरोङ्घ्रौ[3] रुचकमपि करे मेखला कुण्डलानि
मालापूर्णैः कपालैः सकलतनुगता दंष्ट्रिणो भस्ममुद्रा ॥ ३१ ॥

भर्तुः मालाकपालैः^g^ शिरसि च गलके मुण्डमाला शतास्यैः
अर्धेन्दुं वज्रमौलौ स्वकटिकरगतं द्वीपिचर्मेभचर्म ।
मारेशौ पादमूले शशिरविहुतभुङ् मण्डलेऽङ्गे च भस्म
मुद्रा नागेन्द्रयुक्ता प्रलयशिखिनिभा डाकिनी चुम्बमाना ॥ ३२ ॥

---

1. CLD. चक्रादि°
2. CLD. स्वपरिडमरुकै°
3. CLD. श्रीकण्ठान्नूपुरेंघ्रौ

a. sa ta pa ṭa ca ka sa sogs stoṅ sogs yi ge rnams

b. rluṅ sogs rcibs rnams la ni ñi ma'i rgyu ba'i dbaṅ gis riṅ po sa sogs k'ams kyi raṅ bźin rnams

c. steṅ sogs rcibs la zla ba'i rgyu ba'i dbaṅ gis t'uṅ ṅu raṅ raṅ 'k'or lo'i rcibs kyi steṅ du'o

d. sde par bcas pa rnams

e. mk'a' 'gro źal gñis p'yag na rdo rje mc'og daṅ ḍa ma ru daṅ rdo rje k'a ṭwāṃ ga dril bu

f. dpal ldan mgul rgyan rkaṅ la rkaṅ gdub p'yag la p'yag gdub daṅ ni ske rags dag daṅ rna rgyan te

g. gco bo'i dbu la t'od pa rnams kyi p'reṅ ba

दिक्पत्रे डाकिनीनामधिकडमरुकौ[a] वज्रखट्वाङ्गमेव
विण्मूत्रासृक् नृमांसे विदिशिदलगतं शुक्रपात्रं करे च ।
तद्वच्च चाष्टौ च देव्याप्युभयसुखसमापत्तिचक्रं समन्तात्
पीता श्वेतारुणाभाऽसितहरितवपु र्नीलवर्णाः [1]स्वदिक्षु ॥ ३३ ॥

वर्णाश्चिह्नानि मत्तु जिनजनककुले पूर्ववत् [2]त्र्यक्षिजालं
अन्योन्यालिङ्गनं च स्वपरकुलवशाद् वेदितव्यं समन्तात् ।
नानाद्यैः स्कन्धभूते विषयविषयिमिश्रान्यपठचेन्द्रियाद्यैः
[b]दिक्क्ष्माभि[3]र्दिग्बलैःश्रीजिनसुत[4]वसिताभिश्च देव्या विशोध्याः ॥३४॥

मेरो दिक्ष्वष्टभेदे दिशिविदिशिगतं सर्वपीठोपपीठं
क्षेत्रं छन्दोह मेलापक चितिभुवनं वेश्मवाप्यर्घसीम्नः ।
बुद्धस्यैतार्कभूम्यामणु तनुजनृणां भूतदेवासुराणां
शक्ते भेत्तु दिनेकं [5]विचरति कुलिका सूर्यचन्द्र[6]प्रचारात् ॥ ३५ ॥

[c]देवी पृष्ठेऽधिकारो [7]ऽस्य इह पुरतः पञ्चतत्त्व[8]स्वभावैः
वाय्वीशे दैत्यवह्न्योरघसि च खसुरे याम्ययक्षापरेषु ।
उष्णीषे हृत्प्रदेशे गलशिरसि गते नाभिगुह्ये तु चक्रे
[d]चक्रेऽष्टारे तलोर्ध्वं प्रतिदिनमकराद् द्विद्विलग्नान्तराले ॥ ३६ ॥

---

1. CL. सुदिक्षु D. °वर्णासु दिक्षु ; sṅon po'i mdog rnams raṅ p'yogs su
2. LD. त्र्यक्षजाला ; spyan gsum dag gi o'ogs
3. L. दिग्भूताभि° 4. D. °सुतवनिताभि°
5. D. विचरित
6. C. °प्रभावात् ; ñi zla'i rab tu rgyu ba las
7. D. नय 8. CLD. °प्रभावैः

a. p'yogs kyi 'dab mar mk'a' 'gro rnams kyi lag pa ḍa ma ru daṅ
b. p'yogs sa p'yogs kyi stobs daṅ dpal ldan rgyal sras dbaṅ rnams kyis kyaṅ lha mo rnam par sbyaṅ bar bya
c. rgyab tu lha mo dbaṅ byed t'im pa žes 'dir mdun du de ñid lṅa yi raṅ bžin rnams kyis te
d. 'k'or lo rtsibs brgyad 'og daṅ steṅ du ñin žag so so'i č'u srin nas ni dus sbyor gñis gñis bar

मत्तं ब्जं सर्ववज्रैः कुलिशमणिगतं चाक्षरे बिन्दुमिश्रं
सर्वानन्दं समन्तात् समसुखनिलयं वज्रिणः सर्वकालं ।
तस्मिन् चन्द्रद्रवे ये विशति गुरुमुखे कालचक्रः स एव
माराणां कालमुक्तं मरणभयकरं डाकिनी चक्रमेतत् ॥ ३७ ॥

प्रज्ञोपायाक्षराभ्यामुभयकुलवशात्[1] डाकिनी डाकनाम
[a]जाप्यं वज्रत्रयेणापरपद[2]सहितेनादिमध्यान्तभिन्नं[3] ।
[b]प्राणेनाधिष्ठितं यद् ह्यु भयगतिवशात्[4] स्वस्वकर्मानुरूपं
सिद्धिं गच्छन्ति शीघ्रं रसगतिषु[5]गता डाकिनी वज्रडाकाः ॥ ३८ ॥

ये श्वासा मध्यमायां [c]सपदरसशरा जन्मकाले बभूवुः
तेश्चक्राण्यष्टकैः [d]स्युस्तलगगन[6]वशाद् द्वारमध्यस्थ देव्यः ।
पादेनैकेन जाता[7] त्रिभुवनजननी कर्तिकाशुक्तिहस्ता
आक्रीडाऽर्केन्दुमूर्ध्नि स्वमृतसुखकलालिङ्गितः कालचक्रः ॥ ३९ ॥

पञ्चत्र्यष्टचन्द्रसूर्या[8] विषयगुणवशादासनान्यब्धिचाराः
वाराः[9] सप्तार्कपूर्णा[10] दिनकरशशिनश्चापराण्यसनानि ।
कृष्णा श्वेतार्कपूर्णा दिनकरशशिनश्चापराण्यासनानि
वाराः सप्तार्कपूर्णा समविषमपदे सूर्यचन्द्रासनानि[11] ॥ ४० ॥

---

1. D. °कुलवशा
2. D. पदमसितो
3. D. नादिमध्यान्त°
4. CLD. यत्त्वभय°
5. CLD. °गतियुगता
6. CLD. स्तनगमन°
7. D. वाता
8. CLD. पञ्चत्र्यष्टशी° ; lha gsum me lče
9. CLDV. omit
10. CLDV. सप्तार्कादिमपूर्णा
11. L. दिनकरशशिनश्चासनान्येव तानि

a. rdo rje gsum po rkaṅ pa gžan daṅ bčas pas t'og ma dbus daṅ mt'a' mar p'ye pa bzlas bya ste
b. srog gis byin gyis brlabs pa gaṅ žig gñi ga'i bgrod pa'i dbaṅ gis raṅ raṅ las kyi rjes mt'un pa'o
c. rkaṅ pa daṅ bčas ro daṅ mdar gyur pa
d. 'og daṅ mk'a' yi dbaṅ gis sgo yi dbus gnas lha mo rnams

[a]आराश्चन्द्रार्कचाराः कमलदलचतुर्द्वारकोणासनानि
भूयश्चाराः द्विगुण्या दिनकरशशिनश्चासनान्येव तानि ।
पूर्णा वारार्कचाराः समविषमपदे चासनान्यब्धिचाराः
[b]सूर्ये वा पूर्णचन्द्रे भवति कुलवशान्नायकः संपुटे[1] वा ॥ ४१ ॥

वायोः स्पर्शास्यमेकं त्वपरगुणवशान्मुद्रणास्यं द्वितीयं
[c]रस[2]स्पर्शद्वयास्यं भवति च शिखिनो मुद्रणास्यं तृतीयं ।
[d]स्पर्शोरूपं रसास्यं[3] मुखमपि[4] पयसो मुद्रणास्यं चतुर्थं
[e]गन्धाद्यं स्पर्शजान्तं[5] गुणमुखमवनेः[6] पञ्चमं मुद्रणास्यं ॥ ४२ ॥

शून्यं पञ्चप्रकारं मुखमपि[7] नभसो मुद्रणास्यञ्च षष्ठं
एवं वै ज्ञानधातो भवति गुणवशात् शून्यषट्केन वक्त्रं ।
एकं[8] मिश्रं चतुष्के समसुखफलदं पञ्चकं द्वित्रिमिश्रं
प्रज्ञोपायं दशास्यं त्रिविधगुणवशात् द्वादशास्यं चतुर्धा ॥ ४३ ॥

सन्ध्याभेदाच्चतुर्धा त्रिविधमपिमुखं लग्नभेदात् त्रिवर्णं
लग्नार्धाद् बाहुभेदो विषमपि समालिङ्गनं कायचित्ते ।
सन्ध्याङ्गे पूर्वपृष्ठे[9] त्रिमुखरसभुजालिङ्गनं मध्यमाङ्गे
प्रज्ञासङ्गः समापत्तिरपि हि हसिताद्यानि यामाभिसन्धो ॥ ४४ ॥

---

1. CLDV. संपुटो
2. CLDV. रूपं P. रूप°
3. CLDV. रसाख्यं
4. CLDV. सुखमपि
5. CLDV. स्पर्शजातं
6. CLDV. सुखगुण°
7. CLDV, सुखमपि
8. CLDV, एवं मिश्रं
9. L. पूर्ण°

a. zla ba ñi ma'i rkaṅ pa rcibs rnams daṅ ni pa dma'i 'dab ma sgo bži zur gyi ro rnams te

b. ñi ma 'am ni gaṅ ba'i zla ba la 'gyur rigs kyi dbaṅ gis gco bo yaṅ na k'a sbyor la

c. roe mo čan la ro daṅ reg bya'i žal ni gñis su 'gyur te rgyas gdab žal ni gsum pa'o

d. č'u la žal yaṅ reg bya daṅ ni gzugs daṅ ro yi žal te rgyas gdab žal ni bži pa'o

e. sa la dri la sogs pa reg bya'i mt'a' yi yon tan žal te rgyas gdab žal ni lṅa pa'o

f. dus sbyor p'yed kyis p'yag gi dbye ba mi mñam mñam pa 'k'yud pa dag kyaṅ lus daṅ sems la ni

प्रज्ञाङ्गे रक्तपीते प्रविशति नियतः कालचक्रस्य भावः
प्रज्ञाभावः सिताङ्गे कषणघननिभे वज्रिणो वामपूर्वं ।
प्रज्ञाभावेन भिन्नं भवति वरतनौ वामपूर्वाङ्गसौम्यं
रौद्रं सव्यापराङ्गं परमजिनपते भावभिन्नं तथैव ॥ ४५ ॥

प्रज्ञाभिन्नं जिनस्य प्रवरगणकुलं द्विस्वभावत्वमेति
प्रज्ञाया भर्तृभिन्नं विदिशि च नियतं [a]योगिनी छन्दमेव ।
युग्मं सव्यावसव्यं रविशशिवपुषाप्येव पूर्वापरञ्च
कृष्णं पीतञ्च नीलं हरितमपि तथाकाशपातालपंस्थं ॥ ४६ ॥

[b]प्रज्ञारक्ताः सितानां[1] शशधरधवला लोहितानां तथैव
पीतानां कृष्णवर्णा वरकनकनिभाश्चासितानां कुलानां ।
[c]नीलानां विश्ववर्णाः पुनरपि हरितानाञ्च नीलास्तथोक्ता[2]
एवं वै देवतानां स्वकुलदिशिगता देवता वेदितव्याः ॥ ४७ ॥

प्रज्ञातन्त्रं हि पूर्वात् पुनरपरमुखादेव योगानुविद्धं
सव्यास्याद् योगतन्त्रं गदति जिनपति र्वामवक्त्रात् क्रियाद्यं ।
योगाचारं हि पूर्वात् पुनरपरमुखान् मध्यमं वै समस्तं
सूत्रान्तं सव्यवक्त्रात् गदति सितमुखात् शुद्धवैभाषिकञ्च ॥ ४८ ॥

1. CLDV. °रक्तासिता°
2. CLDV. °यथोक्ता

a. rnal 'byor ma yi c'ogs ñid de
b. dkar po rnams kyi šes rab dmar mo dmar po rnams kyi ri boṅ 'jin pa ltar dkar de bžin ñid
c. sñon po rnams kyi k'a dog sna c'ogs slar yaṅ ljaṅ k'u rnams kyi sñon mo rnams su de bžin gsuṅs

ऋग्वेदं पश्चिमास्यादपि गदति यजु र्वामवक्त्राज्जिनेन्द्रः
सव्यास्यात् सामवेदं परमहरिकुलेऽथर्वणं पूर्ववक्त्रात् ।
पूर्वास्यात् कौलतन्त्रं पुनरपरमुखाद् गारुडं भूततन्त्रं
सिद्धान्तं वामवक्त्रादुदयरविनिभाद् विष्णुधर्मश्च सव्यात् ॥ ४९ ॥

"पृष्ठात् सद्यो[1] निवृत्तिः परमसितमुखाद्धु वामदेवः प्रतिष्ठा
[b]सव्याद् विद्या त्वघोरः पुनरनिलमुखान् मारुतब्रह्मशान्त्यो ।
शून्यास्यात् शून्यईशो त्रिभुवनपतिना स्फारिता लौकिकार्थं
कृत्ं ता द्वापरं वै कलियुगमपरं पृष्ठवक्त्राद्विभेदात् ॥ ५० ॥

एवं वीरक्रमाद्यं रविगमनवशादेव सन्ध्याचतुष्कं
आहारं सव्यवक्त्रात् परममपि भयं स्फारितं पृष्ठवक्त्रात् ।
पूर्वास्यान् मैथुनं वै परमसितमुखात् स्वप्ननिद्रा च राजन्
पृष्ठाद् वैश्यो द्विजः स्यान् नृपतिरपि तथा शूद्रजातिः[2] क्रमेण ॥ ५१

[c]पूर्वात् सर्वास्तिवादं गदति जिनपति साम्मितीयञ्च[3] सव्यात्
[d]पृष्ठास्यात् स्थावरीयं पुनरपि च महासांघिकं वामवक्त्रात् ।
मानुष्यं पूर्ववक्त्रात् पुनरपरमुखात् स्फारितास्तिर्यगा वै
सव्यास्यात् भूतदेवाः परमसित[4]मुखान् नारकाश्चासुराश्च ॥ ५२ ॥

1. CLD. सव्ये
2. P[1] शूद्रा°
3. CLD. सांविदीयं
4. D. अपरसित°

a. rgyab nas 'p'ral la ldog pa mo'og tu dkar ba'i žal nas gyon gyi lha daṅ rab tu gnas pa ste.

b. gyas nas rig pa' drag po min daṅ slar yaṅ rluṅ gi žal nas rluṅ skyes c'aṅs pa ži ba dag

c. rgyal ba'i bdag pos mdun nas t'ams čad yod par smra ba gsuṅs te gyas nas man pos bkur ba'o

d. rgyab kyi žal nas gnas brtan pa ste slar yaṅ dge ..un p'al č'en pa ni gyon gyi žal nas so

[a]ह्यचक्रात् पूर्ववक्त्रात् स्फरणमपि[1] भवेत् नाभिचक्रात् परास्यात्
संभोगात् सव्यवक्त्राद् भवति च सहजाद् वामवक्त्रात् समन्तात् ।
[b]चक्राणां वक्त्रमध्यात् स्फरण[2]निधनता याति[3] भावः शरीरे
त्रैलोक्यं चापि कृत्स्नं खलु जितजनकस्यास्यभेदैश्च सम्यक् ॥ ५३ ॥

[c]श्रीचन्द्राच्चन्द्रकान्ते स्रवति हि[4] सलिलं निर्विकल्पस्वभावात्
तद्वत् सर्वज्ञधर्मः स्रवति जिनपतेः स्कन्धमाश्रित्य लोके ।
धर्मस्तोयं यथैव व्रजति समरसं बीजधात्वाश्रयेण
सत्त्वानां चित्तशुद्ध्या भवति बहुविधं पूर्वकर्मप्रभावात् ॥ ५४ ॥

चिन्ता सर्वार्थकर्त्तुस्त्रिभुवननिलये नास्ति चिन्तामणेश्च
चित्तस्थं तन्न पश्यन्त्यशुभफलवशात् कर्मणः पापसत्त्वाः ।
दोषाच्चिन्तामणेर्नु[5] ह्यशुभशुभफलं सर्वसत्त्वः प्रभुंक्ते
[d]शुद्धे सत्त्वे जिनेन्द्रः स च भवति नरः किं जिनेनापरेण[6] ॥ ५५ ॥

[e]जातो येनाङ्कुरोऽसौ व्रजति स जनको जातभावाद् विनाशं
जातो नष्टस्य तस्य प्रभवति जनको बीजराजस्य भूयः ।
यः पूर्वः सोऽन्यभावान् मृत इति वचनं न स्वरूपेण जातः
शून्याद् येनागतः क्ष्मां व्रजति दशबलस्तेन सौख्यक्षणेन ॥ ५६ ॥

1. CLDV. स्फुरण°
2. CLDV. स्फुरण°
3. CLD. जातिभावः
4. CLD. च
5. CLD. °र्न
6. CLD. जनेन°

a. mdun gyi žal nas spros pa dag kyaṅ sñiṅ ga'i 'k'or lo nas 'gyur rgyab žal lte ba'i 'k'or lo nas
b. 'k'or lo rnams kyi žal gyi dbus nas lus la dṅos po spro ba daṅ ni sdud pa ñid du 'gyur
c. dpal ldan zla ba zla ba č'u šel rnam par rtog pa med pa'i raṅ bžin las ni č'u 'byuṅ ba
d. sems ni dag na mi de yaṅ ni rgyal ba'i dbaṅ por 'gyur te rgyal ba gžan gyis či žig bya
e. gaṅ gis myu gu 'di skyed skyed par byed pa de ni dṅos po skyes nas rnam par ñams par 'gyur

सौख्यात् सौख्यानुरक्तः[1] क्षण इह सहजो नान्यभावानुरक्तः
स्कन्धा ये तेन जाताः पुनरपि जनकास्तेऽस्य सौख्यक्षणस्य ।
शुद्धाद्धर्मस्ततोऽन्यः पुनरपि च ततोऽन्यश्च तस्माद्विशुद्धः
बीजान्मूलानि शाखाः कुसुमफलमिवारोपिताश्छुद्धभूम्यां ॥ ५७ ॥

भूवार्यग्निश्च वायु रसपरमरसौ चाणवः षट्प्रकाराः
गन्धाद्येकैकहीना विषयविरहिताश्चान्तिमा ज्ञानदृश्याः[2] ।
कामारूपास्त्वरूपा यमयमशशिनश्चान्तिमो धर्मधातुः
ᵃसर्वाकाराः सदा तेऽच्युतसुखसहजाधारभूताः समन्तात् ॥ ५८ ॥

ᵇअन्योन्यं स्कन्धभूता विषयविषयिनोऽन्योन्यमारास्त्वविद्याः
पञ्चान्योन्यानुरक्ता[3] रसगतिषु गता दुःखसौख्यक्षणस्य ।
ᶜसर्वाकाराः समन्तान्न परगुणरताः संस्थिताऽभेदवज्रा
अन्योन्यं क्ष्मादिधातौ पुनरपि च गता मुख्यभावेऽन्यभावाः ॥ ५९ ॥

तेश्चार्घं कालचक्रः प्रकटयति महानेकनिर्माणकायैः
वज्रज्वाला स्फुरद्भिस्त्वसुरसुरनृणां कामधातौ स्थितानां ।
संभोगैरूपिणां वै नभसि जिनसुताद्यर्हतां धर्मकायैः
ᵈशून्याङ्गैः शून्यकृत्स्नं त्रिभुवनसकलं वायुभि र्वियुक्तत्स्नं ॥ ६० ॥

1. L. °रक्ता 2. L. गतिदृश्याः
3. CLD. पञ्चान्यो मानु°

a. rnam pa kun ldan de dag kun nas rtag tu 'p'o med bde ba lhan skyes rten tu gyur pa'o

b. p'an c'un p'un po 'byuṅ ba daṅ ni yul čan rnams ni p'an c'un bdud daṅ ma rig" pa

c. rnam pa t'ams čad pa rnams kun nas gžan gyi yon tan mi dga' mi 'p'yed rdo rje yaṅ dag gnas

d. stoṅ pa'i c'a yis srid gsum mt'a' dag stoṅ pa'i zad par rluṅ rnams kyis ni rluṅ gi zad par te

तेजोङ्गै[1]र्वह्निकृत्स्नं ह्युदकमपि जगत् स्फारितैश्चोदकाङ्गैः
पृथ्वीकृत्स्नं धराङ्गैः[2] समुदितविषयैः[3] सर्ववस्तुस्वभावं ।
एकात्मानं समन्ताद् गगनसममिदं दर्शयेच्छुद्धभूम्यां
[a]एवं बुद्धस्य कायो भवति न म्रियतेऽप्येकसौख्यस्वभावात् ॥ ९१ ॥

पञ्चाकारात्तदेकात्[4] सकलजिनवरैश्चाभिसम्बोधिरेषा
[b]विंशत्याकाररूपा पुनरपि च ततोऽनेकमायास्वरूपा ।
तस्या एकक्षणा स्यात् समसुखफलदा नान्यकर्मस्वभावा
[c]अत्रोपायोऽच्युतो यः क्षण इह सहजो धर्मधातुप्रवेशे ॥ ९२ ॥

[d]बुद्धक्षेत्राण्यनन्तान्यपरिमितगुणा धातवश्चाम्बराद्याः[5]
स्थित्युत्पत्तिश्च नाशस्त्रिविध इति भवः षड्गतौ सर्वसत्त्वाः ।
बुद्धाः क्रोधाः सुराद्याः सकरुणहृदया बोधिसत्त्वाः सभार्याः
एतच्चक्रं जिनस्य त्रिभुवननमितस्यैकमेकस्य शम्भोः ॥ ९३ ॥

रोमत्वग्रक्तमांसं सरसमपि तथास्थीनि मज्जा च नाड्यः
तासु प्राणादिवाता रविशशिगमनं वायुमध्ये समन्तात् ।
विज्ञानं चन्द्रमध्ये विमलमणिरिवालिङ्गितं सर्वभावैः
[e]भावाभावाद्वयत्वं[6] परममृतपदं[7] व्यापकानाहतं[8] तत् ॥ ९४ ॥

1. D. तेजांशै°
2. L. धरांगे DV. धरांशै
3. CLDV. °हृदये°
4. CLDV. पञ्चाकारा तदेका
5. CLDV. °श्चासुराद्याः
6. CLDV. °द्वयं यत्
7. CLDV. °मृतमिदं
8. CLD. व्यापकाना हतं

a. de ltar saṅs rgyas sku r gyur bde ba gčig pu'i raṅ bžin p'yir na 'č'i bar yaṅ ni mi 'gyur ro

b. rnam pa ñi šu'i raṅ bžin daṅ ni slar yaṅ de nas sgyu 'p'rul du ma'i raṅ gi ṅo ṅo bo'o

c. 'dir t'abs 'p'o med skad čig gaṅ yin 'dir ni lhan skyes č'os kyi dbyiṅs su rab tu žugs pa'o

d. mt'a' yas saṅs rgyas žiṅ rnams daṅ nam mk'a' la sogs k'ams rnams daṅ

e. de ni dṅos daṅ dṅos med gñis med ñid daṅ mč'og gi bdud rol'i go 'p'aṅ k'yab byed gžom med de

[a]लोमाद्याश्चन्द्रमान्ताः[1] सकलतनुगता भूमयो या दशोक्ताः[2]
षड्वर्गा लादयो[3]ऽन्याः समसुखफलदा योगिनां सर्वदास्ताः[4] ।
तस्मादन्वेषणीया गुरुचरणगतैर्योगिभिर्मोक्षहेतोः
नान्यो बुद्धोऽस्ति कश्चित् त्वपितनुविरहाद् व्यापको मोक्षदो यः ॥९५॥

[b]सत्त्वा बुद्धा न बुद्धस्त्वपर इह महान्विद्यते लोकधातौ
तेषामाराधनेन त्वपरिमितभवश्छिद्यते निर्विकल्पात् ।
द्रोहं कुर्वन्ति योगी व्रजति हि नरकं रौरवाद्यं महान्तं
[c]तस्माच्चित्ते विशुद्धेऽप्यबुधबुधजनानां विरुद्धं न कुर्यात् ॥ ९६ ॥

लब्ध्वा सत्त्वप्रसङ्गं भवति नरपते शुद्धमैत्र्यादिचित्तं
[d]यद्वा संसारिणां स्यादकुशलगुणिनां द्वेषरागादिचित्तं ।
गच्छन्तं गन्तुकामं द्विविधमपि[5] भवेत् सर्वदा बोधिचित्तं
[e]मोक्षप्रस्थानहीनं प्रणिधिविरहितं सर्वदा मारचित्तं ॥ ९७ ॥

माराः कुर्वन्त्यशान्तिं त्रिभुवननिलये बोधिसत्त्वाश्च शान्तिं
मारेन्द्रश्चर्द्धिहीनः परमभयकरश्चर्द्धिमानेकशास्ता ।
[f]माराणां मारबुद्धिः परहृदयगता तायिनां सौख्यबुद्धि-
स्तस्माद् बुद्धानुभावैस्त्रिभुवनसकलं वर्त्ततेऽनन्तकालं ॥ ९८ ॥

---

1. P[1] °चन्द्रमोन्ताः
2. CLDV. द्वादशोक्ताः
3. CLD. °नादयो°
4. P[1] °दाताः
5. L. विविधमपि

a. spu la sogs pa zla ba'i mt'a' ni mt'a' dag lus la gnas rnams gan žig sa bčur gsuṅs pa rnams ·

b. sems čan rnams ni saṅs rgyas yin te saṅs rgyas č'en po gžan 'dir 'jig rten k'ams na yod ma yin

c. de p'yir sems ni rnam par dag pas mk'as daṅ mi mk'as skye bo rnams la 'gal ba mi bya'o

d. mi dge'i yon tan daṅ ldan 'k'or ba pa ni drug po rnams kyi že sdaṅ č'ags sogs sems su 'gyur

e. t'ar par 'jug pas dman žiṅ smon pa rnam par spaṅs pa dag ni t'ams čad dus su bdud kyi sems

f. bdud rnams kyi ni bdud kyi blo daṅ skyob pa rnams kyi bde ba'i blo gros gžan gyi sñiṅ la 'jug

ᵃयन्मानं लोकधातोः कथितमपि जिनैस्तन्नृणां ज्ञानतां[1] न
बुद्धानां नास्ति मानं सहजतनुवशादेकहस्तं ह्यनेकं ।
मानं सत्त्वानुरूपं प्रकटयति सदा प्राणिनां कर्मभूमौ
ᵇइच्छामानं त्विदं मे यदि वदति सुरा नास्तिकोयं वदन्ति ॥ ६९ ॥

येनोत्पन्ना जिनेन्द्राः प्रतिदिवसवशान्निर्गता येन गर्भात्
सिद्धा येन क्षणेन क्षरणविरहिताः स्पन्दनिःस्पन्दभूताः ।
त्यक्त्वा तद् बुद्धकृत्यं समसुखरहितं भावयेद् योऽन्यशून्यं
बुद्धत्वं तस्य दूरं सहजमपि सुखं कोटिकल्पैरनेकैः ॥ ७० ॥

ᶜन द्राक्षा निम्बवृक्षादमृतमपि[2] विषात् पङ्कजं ब्रह्मवृक्षात्
शून्यान् निर्वाणसौख्यं शुभमशुभवशात् सिद्धयः प्राणिघातात् ।
यज्ञात् स्वर्गः पशूनां परमशिवपदं नेन्द्रियाणां निरोधात्
ᵈवेदात् सर्वज्ञभावाऽक्षरसुखमचलं न क्षराशुद्धचित्तात् ॥ ७१ ॥

सत्त्वानां पापचित्तं भवति नरपतेऽधिष्ठितं मारकार्यैः
पुण्यज्ञानानुरक्तं सुखदमपि सदाधिष्ठितं बोधिसत्त्वैः ।
ᵉनिर्वाणं यान्ति यस्मात् सुखसमयवशात् क्लेशमारान् निहत्य
तस्मात् कुर्वन्ति माराः प्रतिदिनसमयेऽनेकविघ्नानि तेषां ॥ ७२ ॥

1. CLDV. ज्ञानिनां 2. P¹. °विषमपि

a. rgyal ba rnams kyis 'jig rten k'ams la ċ'ad gsuṅs gaṅ yin de yaṅ mi rnams kyi ni ye šes min

b. gal te ċ'ad 'di bdag gi 'dod pa brjod na lha rnams kyis 'di med pa ba žes brjod par 'gyur

c. nim pa'i šiṅ las rgun 'brum min te dug las bdud rci daṅ ni ċ'aṅs pa'i šiṅ las 'dam skyes daṅ

d. rigs byed las ni kun mk'yen gsuṅ daṅ 'gyur med bde ba g'yo med 'gyur ba ma dag sems las min

e. gaṅ p'yir bde ba'i dam ċ'ig dbaṅ gis bdud daṅ ñon moṅs bcom nas mya ṅan 'das par 'gro byed pa

ᵃसेव्यादौ कर्ममुद्रा जिनसहजसुखस्यास्य वृद्ध्यर्थहेतो-
स्तस्मादादित्यरूपा तनुमुखचरणोष्णीषसर्वाङ्गपूर्णा ।
ᵇविद्युद्दण्डानुरूपाच्युतसुखजननी लक्षणाङ्ग[1]प्रपूर्णा
वज्रे[2]रुद्ध्रासयन्ती त्रिभवगततनु धर्मधातुस्ततः स्यात् ॥ ७३ ॥

एता मुद्राश्चतस्रोऽक्षरसुखफलदा योगिना भावनीयाः
ᶜसर्वस्मिन् सर्वकालं सुरतरतिगतैर्लोकमार्ग[3]प्रयुक्तैः ।
ग्रामारण्यश्मशानेऽशुचिशुचिनिलये वेश्मदेवालये च
वर्णावर्णाभिचारैस्तनुबलसुखदैरन्नपानादिभोगैः[4] ॥ ७४ ॥

वातैः संघट्टमानैस्तडिदनलशिखा द्रावयेन् मूर्ध्निचन्द्रं
यो यो बिन्दुर्द्रुतोऽस्माद् गलद्धृदयगतो नाभिगुह्ये विरुद्धः ।
ᵈबिन्दोः स्पन्दद्रवं यत् कुलिशमणिगतं सन्निरुद्धं ध्वजाग्रे
ᵉप्रज्ञाज्ञानक्षणं तद् यदि ददति सुखं बिन्दुमालाच्युतेन[6] ॥ ७५ ॥

ᶠतस्मान् निःस्पन्दसौख्यं क्षणमिह सहजं धर्मधातु ददाति
प्राणेनाकृष्य सर्वान् रसगतिषु गतान् क्लेशमारान् निहत्य ।
ऋद्धिं सर्वज्ञभूमिं त्रिभुवनगुरुतां योगिनां जन्मनीह
मृत्युं मार्गप्रविष्टो व्रजति यदि तदा तद् ग्रहादन्यजात्या ॥ ७६ ॥

1. L. लक्षणाङ्गं 2. L. रजे°
3. CLDV. °मार्गः प्रयुक्तः 4. CLDV. °योगैः
5. CLDV. °चक्र ; spyi bo'i zla ba
6. L. °मालोक्यनेन

a. rgyal ba'i lhan skyes bde ba 'di ni 'p'el ba'i don slad daṅ por las kyi p'yag rgya bsten par bya
b. glog gi dbyug pa'i rjes mt'un 'p'o med bde ba skyed par byed pa mo'an ñid yan lag rab tu rjogs
c. mi gcaṅ ba daṅ gcaṅ ba'i gnas daṅ k'yim daṅ lha yi k'aṅ pa t'ams čad du ni dus kun du
d. t'ig le las ni gyo ba'i k'u ba rdo rje nor bu la gnas rgyal mo'an rce la 'gog pa gaṅ
e. de ni šes rab ye šes skad čig gal te t'ig le'i p'reṅ ba 'p'o ba med pas bde ster na'o
f. de p'yir gyo med bde ba'i skad čig lhan čig skyes pa 'dir ni č'os kyi dbyiṅs kyis ster byed te

या[1]नैगुण्याल्पभावा विषयविरहिता कायमुद्रा द्विधा सा
तस्याः रागानुरक्ता गुणनिधिरपरा वाक्स्वरूपा द्विधा च ।
कृष्णा श्वेतानुरक्ता विषयगुणरता चित्तमुद्रा द्विधा स्याद्
अष्टौ द्वौ पञ्च पञ्च स्फुटमपि खयुगं शून्यवेदश्चवर्षं ॥ ७७ ॥

रत्नेशो यावदस्या जिनवरजननी योगिभिः रक्षणीया
[a]रत्नेशोद्भूतकाले[2] सकल[3]गुणनिधिं मण्डलं वर्तयित्वा ।
बुद्धाधिष्ठानमन्त्रैः सृजति समसुखं गुह्यपद्मे समन्त्रं
[b]गुह्ये रक्षां प्रकृत्या कुलिशमणिगतं[4] स्वादयेद् बोधिचित्तं ॥ ७८ ॥

तस्मिन् पुत्रो भवेद् यो जिनजनकसुतो मञ्जुवज्रः स एव
प्रज्ञाधिक्यात् कदाचित् प्रभवति दुहिता बुद्धमाता ध्रुवं स्यात् ।
तस्मादन्यैस्त्रिपुष्पैः सितकमलधरो जम्भलो वज्रपाणि -
[c]रन्येऽष्टावष्टपुष्पै दिशिविदिशिगता महर्द्धिकाः क्रोधराजाः ॥ ७९ ॥

तस्मिन् मासे रजो यत् प्रभवति हि पुन र्मञ्जुघोषोद्भवन्तद्
विंशद्वर्षाणि यावत् प्रतिरजसि महासात्त्विको बोधिसत्त्वः ।
किञ्चित् सत्त्वांशहीनः प्रभवति च ततः शून्यवेदानि यावद्
[d]विंशद्वर्षाणि यावत् पुनरपि च ततश्चान्यसत्त्वोऽल्पवीर्यः ॥ ८० ।

---

1. CLD. यान्यै° ; gan žig yon tan med
2. CLD. रत्नेशोद्भूति° V. °रत्नेशोभूति°
3. L. सकुल° 4. L. °मपिगतं

a. rin č'en dbaṅ po rab tu 'byuṅ ba'i dus su mt'a' dag yon tan gter gyi dkyil 'k'or bžeṅs byas nas

b. gsaṅ bar bsruṅ ba rab tu byas nas rdo rje nor bu la gnas byaṅ č'ub sems ni myaṅ bar bya

c. me tog brgyad kyis gžan brgyad p'yogs daṅ p'yogs bral du gnas rju 'p'rul č'ad ldan k'ro bo'i rgyal po rnams

d. slar yaṅ lo ni ñi šu'i bar du de bas kyaṅ ni sñiṅ stobs č'uṅ žiṅ brcon 'grus č'uṅ ba'o

[a]तस्माद् योनौ रजो न प्रतिहतविषयस्तद् विनाशान्न सेकः[1]
किन्तु प्रज्ञाभिषेको जिनपतिवचने नष्टबीजस्य देयः ।
तासां भूतोयतेजोऽनिलगगनगुणान्वेषणीया जिनाङ्कैः
एषा सत्त्वार्थ कर्त्री भवति बहुफला बोधिचित्तस्य सेवा ॥ ८१ ॥

यासृक्पानं करोति प्रवरसुरनृणां भक्षिका सामृतैका
[b]च्छर्द्दिह्लदगुह्यवक्त्रात् कुलिशमणिगता[2] नाब्जमध्ये प्रविष्टा ।
विण्मूत्रं रक्तमांसं परमसमरसं च्छर्द्दिमध्ये प्रविष्टं
एतत् ज्ञानामृतञ्च त्रिभुवनगुरुणा देशितं सर्वतन्त्रे ॥ ८२ ॥

प्रज्ञाधर्मोदये यत् पतितमपि सुखं रक्षणीयं प्रयत्नात्
यः कश्चित्तेन सत्त्वो भवति जिनकुले बोधिसत्त्वः स एव ।
[c]तस्मात्तं भक्षयन्ति प्रतिदिनसमये राक्षसा मारभूताः
प्रज्ञापुष्पेण युक्तं शिवसुखफलदं भक्षितं देशयन्ति ॥ ८३ ॥

[d]नाकृष्यं वज्रमब्जात् परमसुखगतं संकुचं नैव यावद्
बुद्धाधिष्ठानमेतत् प्रभवति हि यदा ज्ञानसिद्धिस्तदा वै ।
वज्राब्जाभ्यां प्रविश्य स्वकुलिशहृदये ज्ञानचक्रं प्रविष्टं
सर्वाकारं[3] करोति ह्यभयतनुगतं रश्मिभिः पूरयित्वा ॥ ८४ ॥

1. V. °विनाचार्यं सेकः 2. CLD. कुलिशमपि गता
3. P¹. चका°

a. de nas skye gnas la ni rdul med yul ni rab bcom de ñams pa las dbaṅ bskur ma yin no
b. skyugs pa sñiṅ k'a gsaṅ ba'i k'a nas rdo rje nor bu la gnas c'u skyes naṅ du rab žugs min
c. de p'yir de ni ñin žag so so'i dus su bdud kyi p'o ña srin po rnams kyis za ru 'jug
d. mc'og gi bde ba la gnas rdo rje ma 'k'ums ñid kyi bar du c'u skyes las ni dbyuṅ mi bya

एषा सिद्धि र्यदि स्यान् न हि कुलिशमणो संस्थितं भक्षणीयं
प्रज्ञाधर्मोदयस्थे सत्त्वजिनकुलं स्थापयेद[1] रक्षणार्थं ।
प्रज्ञायुक्ते तत्रथैके पुनरपि वचनं प्रोच्यते बुद्धकायः[2]
[a]यः कश्चिच्चास्य नाशं ह्यभिलषति शठो मार्यते वज्रिणा सः ॥ ८५ ॥ *

ये प्रोक्ताऽनेकमन्त्रास्त्रिभुवनपतिना क्रूरकर्मस्वभावाः
ते सर्वे मारपक्षक्षयभयजनकाः प्राणिनां नो कदाचित् ।
[b]कर्त्तारो ये स्मृतोनां रणविषयरता मारकान्येपि तोर्थ्या-
स्तेषान्ते योजनोयाः[3] परमजिनसुतैः प्राणिनां रक्षणार्थं ॥ ८६ ॥

डाकिन्यो वज्रपूर्वाः [c]पशुजननिधनेष्येषनीया न विद्धिः
सत्त्वानां रक्षणार्थं त्रिभुवनगुरुणा स्फारिता लोकधातौ ।
तस्मात्ता रक्षयन्ति प्रतिदिनसमये साधकं द्वेषयन्ति
साध्यः कर्मप्रभावाद् व्रजति हि मरणं साधकस्यैष मारः ॥ ८७ ॥

पुंसां चित्तं समन्तादशुभफलवशात् क्षुद्रविद्यानुरक्तं
विद्येयं मे करोति त्रिभुवनसकलं वश्यमेकक्षणेन ।
इत्याशालुब्धचित्तः प्रविशति नरकं ज्ञानदानं विहाय
[d]पृष्ठे द्रव्यं स्वभार्या भवति परवशा ऽहो कुधर्मप्रवृत्तिः[4] ॥ ८८ ॥

---

1. CLD. स्फारयेद् ; bsrun ba'i don du dgod par bya
2. CLDV. बुद्धकाये
3. CLD. युञ्जनीयाः
4. CLD. कुकर्म°

a. gan su 'di ni ñams la mnon par dga' byed gyon čan de ni rdo rje čan gyis gsod par byed
b gan žig dran pa rnams dan byed po gyul gyi yul la dga' žin gsod byed gžan yan mu stegs pa
c. p'yugs kyi skye bo gsan p'yir mk'as bas gsol ba gdab mi bya
d rgyab tu njas dan ran gi k'yim t'ab gžan gyi dban 'gyur kye ma nan pa'i č'os la rab tu 'jug

* The first two feet of the verse appear differently in V which [illegible] to be a scribal error.

न प्रज्ञा नाप्युपायः सहजतनुरियं धर्मकायो बभूव
प्रज्ञोपायस्वरूपः खलु विगततमो ज्ञानविज्ञानभेदात् ।
^a^सोऽयं संभोगकायः प्रतिरवक इवानेकसत्त्वार्थकर्त्ता
सत्त्वानां पाकहेतो र्भवति पुनरसौ बुद्धनिर्माणकायः ॥ ८९ ॥

एकोऽसौ वज्रसत्त्वः प्रलयघननिभो हेरुको वै बभूव
रौद्राणां पाचनार्थं स च समयजिनो मोहितानां सुखार्थं ।
रत्नेशो दुःखितानां स च[1] कमलधरो रागिणां रागहेतो-
र्विघ्नानां ध्वंसनार्थं त्वसिकरकमलोऽमोघसिद्धि र्बभूव ॥ ९० ॥

^b^द्वेषाद्या विश्वमाता प्रलयशिखिनिभा डाकिनी सा बभूव
मोहात् सा लोचनाख्या परमकरुणया मामकी मानहेतोः ।
रागात् सा पाण्डराख्या सकलगुणनिधिस्तारिणी चेर्ष्यया सा
एतौ द्वौ विश्वरूपौ विषयविषयिनोऽन्ये च सर्वे बभूवुः ॥ ९१ ॥

पञ्चस्कन्धस्वभावे विहरति कृपया वज्रयोषिद् भगेषु
^c^सत्त्वानां पाचनार्थं त्वविहित[2]नियमानामपुण्यार्जितानां ।
शुद्धा वासादिके यद्विहरति भगवान् श्रावकाणां निमित्तं
एवंकारे स्थितिर्या परमनियमिनामुत्तरे स्थापनार्थं ॥ ९२ ॥

---

1. L. स कमल°

2. CLDV. त्वविदित

a. 'di ni loṅs spyod rjogs pa'i sku ste sgra brñan lta bu sems čan du ma'i don ni byed pa po

b. že sdaṅ las ni sna ċogs yum gaṅ dus me'a'i roe mo čan mo'uṅs de ni mk'a' 'gro mar byuṅ gyur

c. ṅes pa rnam par ma bsgrubs bsod nams min pa bsags pa min pa'i sems čan rnams ni smin pa'i don du ste

ᵃसत्त्वानां पाकहेतो स्त्रिविधविहरणं कायवाक्चित्तभेदै-
र्बाह्याध्यात्मं परञ्च प्रभवति नियतं वज्रिणः सर्वकालं ।
बाह्ये[1] नाना प्रदेशे भवति वरतनौ प्राणवायोः प्रचारः[2]
ᵇभूम्यादौ मण्डले यत् प्रभवति च विभा वज्रयोषिद्भगे तत्[3] ॥ ९३ ॥

शब्दादौ यच्च चित्तं व्रजति इह[4] विषये चापरं तद्वदेव
एवंकारे स्थिति र्या परमसुखदे कायवाक्चित्तवेगः ।
एको वज्रो त्रिभेदो विषयविरतीभिश्चावृतो धातुभिश्च
त्र्यध्वः त्रिस्थानवासी त्रिभवनपि[5] गतोऽनेकसत्त्वार्थहेतोः ॥ ९४ ॥

तन्त्रेष्वेवं[6] मया यत् श्रुतमिति वचनं तन्मया ज्ञातमेवं
वज्रो चन्द्रद्रवाद् यः शिरसिगलहृदब्जे[7] च नाभौ च गुह्ये ।
ᶜवज्रस्त्रीणां भगे तत् परकमलगतो बिन्दुमोक्षत्रयेण[8]
बुद्धक्षेत्रे प्रविष्टस्तदिह स भगवान् योगिभि र्वेदितव्यः ॥ ९५ ॥

एकं पश्यन्त्यनेकं प्रणिधिगुणवशाच्छान्तरागादिभावै-
श्चक्रस्थं पूर्वजन्म स्वहृदयजनितै र्वासनाया बलेन ।
एकार्थानन्तभाषा प्रविशति हृदये प्राणिनां स्वस्वभावै-
ᵈश्चक्रस्थः पिण्डपातं[9] व्रजति विहरितुं स्थायिनां पुण्यहेतोः ॥ ९६ ॥

1. CLDV. बाह्ये
2. CLD. प्रचारे
3. CLD. यत् V. °भगेषु
4. CDV. न
5. CLDV. त्रिभवमिह°
6. CLDV. तन्त्रेष्वेवं
7. CLDV. हृदोऽब्जे
8. CLDV. बीजमोक्ष°
9. L. पिण्डपात्रं

a. sems čan rnams ni smin pa'i slad du sku daṅ gsuṅ daṅ t'ugs kyi dbye ba rnams kyis dus kun du/ṅes par rdo rje čan gyi bžugs pa rnam gsum p'yi daṅ naṅ daṅ gžan du yaṅ ni rab tu gyur

b. k yab bdag gi ni sa sogs dkyil 'k'or dag la rab gyur gaṅ de rdo rje bcun mo'i bha ga la

c. rdo rje bcun mo rnams kyi bha gar de ni t'ig le grol ba gsum gyis mč'og gi pad mar gnas

d. gnas čan rnams kyi bsod nams slad du 'k'or lor gnas pa bsod sñoms la ni rnam par rgyu ru gšegs

[a]तिर्यक्प्रेतासुराणामुरगसुरनृणामार्य[1]भोटादिकानां[2]
[b]भूतंष्यद् वर्त्तमानं त्रिविधमपि सदा सत्यधर्मं ब्रुवन्तो ।
मार्गं संस्थापयन्तो त्रिभवमविकलं स्व स्व भाषान्तरेण
एषा सर्वज्ञभाषा समसुखफलदा देवभाषा न च स्यात् ॥ ९७ ॥

बुद्धानामप्यगम्या त्वपरिमितगुणा बुद्धनिर्माणमाया
आत्मानं दर्शयन्तो त्रिभुवननिलये शक्रजालं यथैव ।
नानाभावे विभिन्ना सजिनसुरनृणां स्वस्वचित्ते प्रविष्टा
एषा[3]मुत्पन्नधर्मा पयसि नभ इव भ्रान्तिदोत्पत्तिरत्र ॥ ९८ ॥

सर्वाकारं ह्यगम्यं विषयविषयिनां कायवज्रं जिनस्य
वाग्वज्रं सर्वसत्त्व स्वहृदयरुतकै धर्मसंपादकश्च ।
सत्त्वानां चित्स्वभावं सकलभुविगतं वज्रिणश्चित्तवज्रं
भावानां ग्राहकं यद् विमलमणिरिव ज्ञानवज्रं तदेव ॥ ९९ ॥

[c]दानाद्याः षट्चतस्रः समसुखफलदाः शक्तयस्ता दशोक्ताः
[d]तासां शुद्धा उपायाः परमदशविधाः पूर्णचित्ता घटान्ते ।
मारक्लेशक्षया वै मदन इति हरो वज्रवृन्दं द्रुमाद्याः
षण्मुद्राः शून्यषट्कं[4] त्रिभुवनजनका ज्ञानविज्ञानमेकं ॥ १०० ॥

---

1. CLD. °सुरगतिषु नृणाम्
2. CLDV. °श्रेष्ठादिकानां
3. DV. एषानुत°
4. CLD. शुकषट्कं

a. dud 'gro yi dwags lha min rnams dan lto 'p'ye lha dan mi ni 'p'ags pa bod la sogs rnams la
b. byun dan 'byun 'gyur te ltar byun ba rnam pa gsum dan rtag tu bden pa'i č'os ni gsun byed čin
c. sbyin pa la sogs bde mñam 'bras ster drug dan bži rnams nus ma bču po de dag rnams su gsuns
d. de dag rnams kyi t'abs ni dag pa mč'og gi rnam bču sems kyis gan ba'i bum pa de dag rnams

चक्रं स्वच्छं समन्तात् त्रिभव इति सुखं रत्नमस्यैव रागः
पद्मं क्लेशक्षयोऽसिः कुलिशमपि महाज्ञानकायो ह्यभेद्यः ।
[a]छेदोऽज्ञानस्य कर्त्रीवर षडपि कुलान्येभिरुत्पादिता ये
तेष्वेवं वेदितव्याः खमिव समरसाः स्कन्धधात्विन्द्रियाद्याः ॥ १०१ ।

यस्मिन् वै जातिरूपं व्रजति निधनतां तन्महारूपमुक्तं
[b]यस्यां संसारदुःखं व्रजति निधनतां सा महावेदनोक्ता[1] ।
यस्यां संसारसंज्ञा व्रजति निधनतां सा महावज्रसंज्ञा
यस्मिन् संसारबुद्धि र्व्रजति निधनतां वज्रसंस्कार एव ॥ १०२ ॥ *

यस्मिन्निद्राद्यवस्था व्रजति निधनतां तच्च[2] विज्ञानमुक्तं
यस्मिन्नज्ञानभावो व्रजति निधनतां तन्मुने ज्ञानमेव ।
एते वैरोचनाद्याः परमजिनवराः षड्विधाः षट्कुलानि
अन्ये षड्धातुभेदा अवनिशिखिपयो मारुताकाशशान्ताः ॥ १०३ ॥

यस्यां मोहः समस्तो व्रजति निधनतां लोचना सा धरित्री
यस्यां मानः समस्तो व्रजति निधनतां मामकी साऽम्भ एव ।
[c]यस्यां रागः समस्तो व्रजति निधनतां पाण्डरा सा हविः स्यात्
यस्यामीर्ष्या समस्ता व्रजति निधनतां [d]तारिणी सानिलश्च ॥ १०४ ।

---

1. CLD. °वेदिनोक्ता 2. CLD. यच्च

a. mi šes good pa gri gug mc'og gi rigs drug rnams te 'di dag rnar kyis bskyed pa gaṅ yin pa

b. gaṅ du 'k'or ba'i sdug bsṅal ñams pa ñid du gyur pa de ni c'or čen por gsuṅs pa ste

c. gaṅ du č'ags pa mt'a' dag ñams pa ñid du gyur pa gos dkar n ste de ni me yin no

d. sgrol ma yin te de ni rluṅ yaṅ ṅo

* This verse occurs in V in a very different form—obviously scribal error.

यस्यां द्वेषः समस्तो व्रजति निधनतां वज्रधात्वीश्वरी खं[1]
ᵃयस्यां मात्सर्यं सर्वं व्रजति निधनतां विश्वमाताक्षरं सा ।
दृष्टादृष्टं हि रूपं मनसि नभसि वै पश्यते यः स चक्षुः
दूराच्छब्दं शृणोति प्रकटमिव महाश्रोत्रमेतज्जिनस्य ॥ १०५ ॥

ᵇसर्वं गृह्णाति गन्धं परमसुखकरं सा सुनासा[2] विभोश्च
ᶜसा जिह्वा या[3] स्वचन्द्रामृतमपि[4] च सदा स्वादते सौख्यदञ्च ।
वज्रस्पर्शं समन्तादपहरति सदा वज्रकायेन्द्रियं तत्
प्रज्ञापायप्रसङ्गाद् विशति समसुखे यो मनः सोऽस्य धर्मः ॥ १०६ ॥

एते षड्भेदभिन्ना विषयविषयिणः बोधिसत्त्वाः सभार्या
विश्वे रूपादयोऽमी जिनवरविषयाः षट्प्रकाराः समन्तात् ।
स्वच्छाऽजाता निरुद्धाः परमसुखकरानाविला ज्ञानगम्याः
ᵈनान्या ग्राह्यास्त्रियातौ तु सकलजगत[5]श्चेन्द्रियद्वारगम्याः[6] ॥ १०७ ॥

ज्ञानाकृष्टिं करोत्यत्र पुनरतिबल[7]स्तत्प्रवेशञ्च जम्भः
स्तम्भस्तद्बन्धनं वै परमसुखवशान् मानकस्तोषणञ्च ।
चक्रस्य ज्ञानचक्रे समरसकरणं वज्रवेगः[8] करोति
एवं वै वज्रदेव्यः प्रकटितनियता योगिनीतन्त्रकाये ॥ १०८ ॥

---

1. CLD. सा V. च ; rdo rje dbyiṅs kyi dbaṅ p'yug ma ste mk'a'
2. D. सा सुता सा V. सा स्वनाशा
3. D. जिह्वाया
4. CLD. सुचन्द्रा°
5. CLD. जगच्चे°
6. CLDV. °द्वारमस्याः
7. CLD. पुनरतिकां तत V. °बल वेशन चैव
8. CLDV. वज्रवेशः ; rdo rje šugs kyis byed pa ste

a. gaṅ du ser sna t'ams čad ñams pa ñid du gyur pa sna ṡ'ogs yum ste de ni 'gyur med do
b. mč'og gi bde ba byed pa'i dri nams t'ams čad 'jin pa de ni k'yab bdag gi yaṅ sna bzaṅ po
c. raṅ gi zla ba'i bdud rci bde stein dag kyaṅ rtag tu myaṅ bar byed pa gaṅ yin de ni lče
d. k'ams gsum dag tu gžan gyis gzuṅ bya daṅ ni mt'a' dag 'gro ba'i dbaṅ po'i sgo yis rtogs bya min

मारणां ताडनं वै त्रिभुवननिलये नीलदण्डः करोति
ᵃबन्धं[1] क्रोधोऽचलश्च प्रलयरविनिभः कीलनश्चातिवीर्यः ।
टक्कि स्तद् वीर्यनाशं स्ववनितलगतं स्तम्भनं स्तम्भ एव
ᵇउष्णीषश्चक्रिनाशं[2] प्रकटितनियताः पूर्ववत् क्रोधदेव्यः ॥ १०९ ॥

ᶜप्रेतानां पाचनार्थं स्फुरणमपि ततश्चर्चिकादे र्बभूव
इन्द्रादीनां[3] सुराणां दिशिविदिशि तथा रक्षणार्थं जनानां ।
नागानां पावनार्थं फणिकुलसकलं स्फारितं वज्रिणा च
दैत्यानां पाचनार्थं स्फुरणमपि महाश्वानवक्त्रादिकानां ॥ ११० ॥

अन्यद् यत् किञ्चिदस्ति स्फुरणमपि विभो मण्डले वस्तुजातं
सर्वं सत्त्वार्थहेतो र्वरविविधगुणं वेदितव्यं स्वकाये ।
एवं तन्त्राणि मन्त्राः[4] विविधगुणगता योगिनी योगभेदात्
सेकोऽस्मिन् द्विःप्रकारोऽपि सुतगुण[5]वशाल्लोकलोकोत्तरश्च ॥ १११ ॥

प्रज्ञाया या स्तनस्पृष्टिरपरममृतास्वादनालिङ्गनं यत्
ᵈप्रज्ञासङ्गे चतुर्थक्षणममृतगतं बोधिचित्तद्रुते यत् ।
तत् सर्वं लौकिकं वै परमकरुणया दर्शितं[6] मार्गहेतोः
सेको लोकोत्तरो यः परमजिनपते र्दिव्यमुद्रानुषङ्गः ॥ ११२ ॥

1. L. स्कन्धं 2. CLD °श्चाविनाशं
3. CLDV. दुष्टानां वै , dban po la sogs lha rnams
4. CLDV. तन्त्राः समस्ता
5. CLDV. कुलगुण° , bu yi yon tan dban gis
6. CLDV. देशितं

a. bčiṅ ba k'ro bo mi gyo dus mt'a'i ñi ma daṅ mc'uṅs mt'a' yas brcon 'grus kyis ni p'ur bus gdab
b. gcug tor gyis ni rju 'p'rul ñams pa rab tu gsal žiṅ ṅes par snar bžin k'ro'i lha mo rnams
c. yi dwags rnams ni smin pa'i don du de nas car ci kā la sogs pa spros par gyur pa ste
d. šes rab daṅ 'grogs byaṅ č'ub sems ni žu ba dag la bži pa'i skad čig bdud rci rtogs pa gaṅ

"चित्तस्याभासमात्रा[1] स्वमनसि जनितादर्शबिम्बोपमा[2] वै
योगीन्द्रैः सेवनीया सकलजिनसुतैः सेविता या च बुद्धैः ।
[b]सा ज्ञानार्चिः प्रवृद्धा[3] दहति सविषयं मारवृन्दं समस्तं
रागादींश्चापि काये ददति समसुखं[4] योगिनां वर्षयोगात् ॥ ११३ ॥

प्रज्ञा ज्ञानञ्च चित्तं भवति दशविधस्तस्य चाभास एव
[c]सेकोऽस्मिन् मज्जनं यद्विमलशशिनिभादर्शबिम्बोपमा वै ।
तस्मिन्निर्वाणसौख्याच्युतमपि सहजं चाक्षरं वै चतुर्थं
यस्यैतद् बुद्धवक्त्रं हृदयसुखगतं वर्त्तते श्रीगुरुः सः ॥ ११४ ॥

[d]आकाशासक्तचित्तैरनिमिषनयनै वंज्रमार्गे[5] प्रविष्टैः
शून्याद्धूमो मरीचिः प्रकटविमलखद्योत एव प्रदीपः ।
ज्वालाचन्द्रार्कवज्राण्यपि परमकला दृश्यते बिन्दुकश्च
तन्मध्ये बुद्धबिम्बं विषयविरहितानेकसंभोगकायं ॥ ११५ ॥

[e]आकाशं स्तब्धदृष्ट्या[6] जलधरसहितं योगिनालोकनीयं
यावद्वै कृष्णरेखा स्फुरदमलकरा दृश्यते कालनाड्यां ।
तस्यां सर्वज्ञबिम्बं पयसि रविरिवानाविलं विश्ववर्णं
सर्वाकारं स्वचित्तं विषयविरहितं नापरं चित्तमेव ॥ ११६ ॥

---

1. D. °स्याभा समात्रा
2. D. स्वमनसिजनिभा°
3. D. प्रबुद्धा
4. D. शमसुखं । bde mñam
5. L. °मार्गे
6. D. तच्च°

a. sems kyi snaṅ ba cam ste raṅ gi yid las skyes pa me loṅ gi ni gzugs brñan lta bu ñid

b. yi šes me lče de ni rab tu rgyas pas bdud c'ogs yul daṅ bčas pa mt'a' dag sreg byed čiṅ

c. dbaṅ ni dri med ri boṅ čan mo'uṅs me loṅ gzugs brñan lta bu 'di la žugs pa gaṅ yin pa

d. nam mk'a' kun nas žen pa'i sems daṅ mig ni mi 'jums rdo rje'i lam du rab tu žugs pa yis

e. nam mk'a' č'u 'jin bral ba dag ni rnal 'byor pa yis bgrad pa'i mig gis blta bar bya ba ste

दृष्टे बिम्बे प्रकुर्यात् प्रतिदिनसमये प्राणवायो र्निरोधं
यावद्वै भ्राम्यमानं स्वतनुपरिवृतं दृश्यते रश्मिचक्रं ।
षण्मासैः स्पर्शहीनं व्रजति समसुखं मार्गचित्तं यतीनां
[a]रागारागान्तमाद्यं क्षणमपि च विभो वर्धते श्वाससंख्यं ॥ ११७ ॥

ओद्रा ज्वालान्तराले विरमसहजयो र्ज्ञानविज्ञानमध्ये
[b]निद्रा घूर्माभिसन्धौ कुलिशकमलयो र्यत्सुखं द्वन्द्वयोगे ।
वृद्धिं तस्य प्रकुर्याद् गुरुनियमवशाद् वर्धते नात्र चित्रं
हत्वा क्लेशांश्च मारान् विशति जिनपतिं वर्षयोगात् सुयोगी ॥ ११८ ॥

[c]भूम्याकारो दृढो न द्रुतसलिलवपु र्नद्रवस्त्वद्रवत्वाद्
वह्न्याकारो न वह्निश्चलपवनतनु र्निश्चलो योऽनिलो न ।
शून्याकारोऽपि दृश्यः सितहरित महाविश्ववर्णो न वर्णः
[d]सर्वाकारोप्यदृश्यः स्वहृदयकलुषक्लेशमारप्रभावात् ॥ ११९ ॥

नादो बिन्दुः कला ज्ञानममृतपदगाः शृङ्खलाबद्धनाड्यः
प्राणापान त्रिमार्गाः सकुलिशकमलं वज्रमेवाब्जयुक्तं ।
याय्वोः[1] संघट्टमध्ये विषयविषयिनां निर्गमश्च प्रवेशः
धूमादीनां निमित्तग्रहणमपि च यत्[2] सर्वमेतद् रहस्यं ॥ १२० ॥

---

1. CLD. वायोः, rluṅ gñis yaṅ dag
2. CLD. च तद् गोपनीयं, gaṅ žig 'di rnams t'ams čad gsaṅ bar bya

a. č'ags daṅ č'ags bral mt'a' t'og la gnas skad čig ma yaṅ k'yab bdag gi ni dbugs kyi graṅs 'p'el lo
b. gñid daṅ gñid yur mc'ams su rdo rje pad ma dag gi gñis gñis sbyor ba la ni bde ba gaṅ
c. sa yis rnam pa sra ba min žiṅ žu ba č'u lus k'u ba min te gšer ba ñid min p'yir
d. rnam pa kun ldan yin yaṅ mt'oṅ ba min te raṅ sñiṅ dri ma ñon moṅs bdud kyi mt'u las so

मध्ये प्राणप्रवेशः सरविशशिगते[1] बन्धनं सव्यवामे
[a]चित्तं मुद्राप्रसङ्गे परमसुखगतं वज्रसम्बोधनश्च
पद्मे वज्रध्वनि र्वा [b]स्वकरसलिलजोल्लालनं सौख्यहेतो-
र्बीजात्यागः ससौख्यो मरणभयहरः श्रीगुरो र्वक्त्रमेतत् ॥ १२१ ॥

पृथ्वी तोयं प्रयाति ज्वलनमपि जलं पावको मारुतश्च
वायुः शून्यश्च शून्यं व्रजति दशविधं वै निमित्तं निमित्तं ।
सर्वाकारं प्रयात्यक्षरपरमसुखानाहतं ज्ञानकायं
ज्ञानादृद्धिश्च सिद्धि र्भवति नरपते जन्मनीहैव पुंसां ॥ १२२ ॥

[c]कामा निर्माणकायः प्रभवति नियतस्तस्य वागेव पूर्णा
ज्वाला निर्माणचित्तं परमसुखकरं ज्ञानमेवास्य चोद्रा ।
आनन्दो भोगकायः सपरमविरमानन्दमस्य क्रमेण
[d]वाक्चित्तं ज्ञानवज्रं भवति हि सहजानन्दमेवास्य शम्भोः ॥ १२३ ॥

[e]कम्पा[2] वै धर्मकाय[3]स्त्रिभुवननमितस्तस्य वागुद्भवः स्यात्
[f]घूर्मा वै धर्मचित्तं भवभयमथनं ज्ञानमस्यैव निद्रा ।
वर्णो वै शुद्धकायः स्वररहितकला बिन्दुनादाः क्रमेण
वाक्चित्तं ज्ञानवज्रं त्रिविधभवगतं शुद्धकायस्य शम्भोः ॥ १२४ ॥

---

1. P[1]. सरविगते ; ñi ma daṅ bčas ri boṅ čan gyi bgrod pa
2. D. कस्या
3. CLD. कर्मकाय°

a. p'yag rgya rab tu 'grogs la sems daṅ mč'og gi bde ba la gnas rdo rje yaṅ dag bslaṅ ba yaṅ
b. raṅ gi lag pa'i č'u skyes dag gis gsor ba bde ba'i slad du sto
c. 'dod pa sprul pa'i skur ni ṅes par rab tu 'gyur te ljogs pa dag ni de yi gsuṅ ñid do
d. gsuṅ daṅ t'ugs so lhan čig skyes pa'i dga' ba ñid kyaṅ bde 'byuṅ 'di yi ye šes rdo rjer 'gyur
e. 'dar ñid ni srid pa gsum gyis btud pa č'os kyi sku ste 'byuṅ ba de yi gsuṅ du 'gyur
f. gñid yur gñid ni č'os kyi t'ugs te gñid ni 'di yi srid pa'i 'jigs 'joms yi šes k'o na'o

जाग्रत्स्वप्नस्वरूपं पुनरपरमिदं सुप्ततूर्यस्वभावं
कायस्थं श्वासलीनं विचरति विषयाग्निश्चलं चित्तलीनं ।
[a]ज्ञानस्थं स्त्रीप्रसङ्गात् क्षणमपि च भवेद् बोधिचित्ते द्रुते च
निर्माणादेः क्रमेण प्रभवति नियतं चित्तवज्रं चतुर्धा ॥ १२५ ॥

एवं चित्तं चतुर्धा त्रिविधभवगतं प्राणिनां बिन्दुमध्ये
भोगीन्द्रै रक्षणीयं समसुखफलदं[1] व्यापकं मोक्षहेतोः ।
बिन्दौ मोक्षे क्व मोक्षो गतपरमसुखे योगिनां जन्मबीजे
[b]तस्मात् संसारसौख्यक्षण[2] इह यतिभिः सर्वदा वर्जनीयं ॥ १२६ ॥

[c]एकत्वं ह्यादिकाद्योः शशिदिनकरयोरासनं वज्रिणो न
हूंकारेणैव चिह्नं परिणतमपरं नेष्यते वर्णरूपं ।
उत्पन्नस्याक्षरेण क्षरनिधनगतस्यास्य दिव्येन्द्रियस्य
सर्वाकारस्य बिन्दोः सकलजिनपते विश्वमायाधरस्य ॥ १२७ ॥

[d]लाद्या यास्त्वष्टमात्रा बिषयगुणगताश्चार्धमात्राविहीना
[e]अन्योन्यं भेदभिन्नाः सपदरसशरा मध्यमा श्वासवाहाः ।
दीर्घा लग्ने द्वितीये विषयगुणवशाद् भेदितान्योन्यभेदै-
र्भूयः सन्धौ तृतीये प्लुतविषयगुणा मध्यमा श्वासवाहाः ॥ १२८ ॥

---

1. D. शमसुख°
2. CLD. °सौख्यं, 'k'or ba'i bde ba'i skad čig

a. ye šes la gnas bud med rab tu 'grogs las byaṅ č'ub sems ni žu ba la yaṅ skad čig 'gyur

b. de p'yir 'k'or ba'i bde ba'i skad čig 'dir ni sdom brcon rnams kyis t'ams čad dus su sbaṅ bar bya

c. gaṅ p'yir a sogs ka sogs ri boṅ čan daṅ ñin byed gčig ñid rdo rje čan gyi gdan min źiṅ

d. li sogs dbyaṅs brgyad gaṅ dag yul daṅ yon tan du gyur dbyaṅs p'yed kyis ni rnam par dman pa rnams

e. p'an c'un dbye bas p'ye ba rkaṅ pa daṅ bcas ro daṅ mda' rnams dbu ma'i dbugs ni 'bab pa ste

एवं सन्ध्याचतुष्के सशरगिरिरसा मध्यमा श्वासमात्राः
[a]त्रिंशत् काद्यक्षराणि प्रकटनवशतान्येव त्रिंशद्धतानि ।
षण्मात्रा भेदभिन्नानि खखयुगशराणि त्रिलग्न त्रिनाड्यां
एवं दीर्घप्रभिन्नान्यपरदिनगतानि त्रिलग्न त्रिनाड्यां ॥ १२९ ॥

भूयः षण्मात्रभिन्नान्यपि निशिसमये च त्रिलग्न त्रिनाड्यां
एवं दीर्घप्रभिन्नान्यपरनिशिगते च त्रिलग्न त्रिनाड्यां ।
श्वासोच्छ्वासान् वहन्ति[1] प्रतिदिनसमये खंखषट्चन्द्रनेत्रान्
[b]पूर्वा आहत्य[2] शून्याः समविषमगते योजयेन् मध्यमायां ॥ १३० ॥

बाह्ये या चाष्टमार्धा प्रभवति घटिका राहुभोगात् परस्था
श्वासार्द्धं सा[3] स्वदेहे खलु विगततमा सर्वलोकावभासा ।
[c]पूर्वार्धा सान्धकारं त्रिभुवनसकलं लीयते[4] यत्र शून्ये
तस्मात्तां भेदयित्वा विशति गततमां कालचक्रैकयोगी ॥ १३१ ॥

[d]चन्द्रोना याधिकार्के[5] विभुपरमकला सात्र सन्ध्या चतुष्के
यामे यामे व्रजन्ती[6] निशिदिवसवशादर्द्धलग्नप्रभेदैः ।
षट्त्रिंशत्कालदूत्यो द्विगुणनृपतयोऽन्यास्तिथौ द्व्यष्टभेदे
वाराणाञ्चाष्टभेदे[7] खलु पुनरपरे नैकसन्धिप्रदेशे[8] ॥ १३२ ॥

---

1. CLD. वहन्ते
2. CLD. आकृत्य
3. CLD. श्वासदेहे, raṅ gi lus la
4. CLD. नीयते
5. D. चन्द्रो नायाधिकार्के
6. CLD. ब्रुवन्ती
7. D. चाराणां ; gza' rnams kyi yaṅ brgyad kyi dbye ba la ste
8. CLD. °प्रवेशे ; du ma'i c'igs kyi p'yogs la'o

ka la sogs pa'i yi ge su č̆u sum č̆u'i rab tu dbye bas rab tu gsal bar dgu brgya ñid

sña ma stoṅ pa rnams bsdus nas ni mñam daṅ mi mñam bgrod par dbu ma dag la sbyar bar bya

sña ma p'yed ni mun pa daṅ bčas srid pa gsum po mt'a' dag stoṅ pa dag tu t'im pa'o

zla ba dman žiṅ ñi mar lhag gaṅ k'yab bdag mč'og gi č̆'a de 'dir ni t'un 'c'ams bži la ste

वेदत्तुश्वासशेषा[1] त्रिभुवनजननी डाकिनी विश्वरूपा
या हीना चन्द्रमध्ये परमजिनपतेः सा स्वमुद्रा द्विधा स्यात् ।
यार्कस्था साष्टभेदा दिशिविदिशिदले यामभोगावसाना[2]
[a]शेषान्याश्चक्रदेव्यः परमभयकरा बाह्यदेहे समन्तात् ॥ १३३ ॥

मन्दे रन्ध्रा[3] दिनाख्या तमिनि सुरगुरौ सार्घनेत्राक्षिसंख्याः
सार्घाः[4] षड्वेदजाताः परमजिनपतेश्चित्तवज्रोद्भवास्ताः ।
भौमे शून्याहिचन्द्रा रविबुधभृगु[5]केतोश्च शून्याहिखैका
[b]खाक्ष्यक्ष्येकाश्चजाताः खलु परमविभोः शुद्धवागुद्भवास्ताः ॥ १३४ ॥

या चन्द्रस्यत्तुभुक्तिः खखरसशिखिनः कायवज्रोद्भवास्ताः
एकीभूताः समस्ताः रसषडहि[6] युगाश्चार्द्धनाडीस्तथैव[7] ।
[c]डाकिन्यः कालरूपाः सकलतनुगताः प्राणिनां प्राणहन्त्र्यः
तस्मात्ताः साधनीयाः प्रतिदिनसमये रोत्रयित्वा[8] स्वमार्गं ॥ १३५ ॥

यावद्भुक्ति ग्रहाणां स्वपरगतिगता श्वासनिःश्वासचारात्
तावत् किं कालदूती प्रभवति वरदा व्यापिनी या त्रिधातौ ।
[d]दूती सूक्ष्मप्रचारो गुरुवचनगतो बोधिचित्तेऽक्षरे च
[e]ज्ञातव्यो योगयुक्तै र्व्यपगतकलुषै र्नान्यथा रागचित्तैः ॥ १३६ ॥

1. CLD. °शेषं 2. CLD. °वसाने 3. CLD. रन्ध्र
4. CLD. सार्धं 5. CLD. °बुध गुरु, pa saṅs 'jug riṅs
6. D. °ख इति 7. P. प्रसिद्धा
8. CD. रोपयित्वा L. स्नोपयित्वा

a. lhag ma 'k'or lo'i lha mo mč'og tu 'jigs par byed pa gžan rnams mt'a' dag p'yi dań lus la'o

b. mk'a' mig mig dań gčig tu gyur pa de rnams mč'og gi k'yab bdag gi ni dag pa'i gsuń las byuń

c. mk'a' 'gro dus kyi gzugs čan mt'a' dag lus la gnas śiń srog č'ags rnams kyi srog ni 'p'rog byed ma

d. p'o ña p'ra mo rab tu rgyu ba bla ma'i gsuń la gnas pa byań č'ub sems ni 'gyur med pa

e. sdig bral rnal 'byor ldan pa rnams kyis śes par bya ste gžan du 'dod č'ags sems kyis ma yin no

"मार्त्तण्डेन्द्वोः पदान्यप्युभयगतिवशात् तृष्णया ताडितानि[1]
अङ्गे भागावशेषं ग्रसति स चरणं राहुवेशे च केतुः।
सर्वाः सन्ध्याष्टयामाः प्रतिदिनसमये प्राणिनां द्वादशाङ्गाः
श्वासाश्चैकैकलग्ने द्विगुणनवशतप्राणवाहाङ्गयुक्तं ॥ १३७ ॥

[b]द्विद्वयंगेष्वाद्यविद्या[2] प्रथमदिनवशात् द्वादशाङ्गानि यावत्
[c]तस्मान् ऋत्वादिनाङ्गानि[3] च परनवमो पूर्ववद् यानि तानि।
एवं पञ्चप्रकारै ऋतुरपि च भवेत् सर्वतो द्विद्विमासात्
यस्मिन्निन्दोः फलैका[4] व्रजति निधनतामादिमासः स एव ॥ १३८ ॥

षण्मासत्त्रयेण ग्रहणमपि भवेत् द्वादशाङ्गप्रतीत्या
षष्ठोऽर्कस्यत्तुभेदश्चरणगतिवशाच्चन्द्रमध्ये प्रविष्टः।
[d]तस्मिन् स्पर्शाङ्गमध्ये ग्रसति स चरणं राहुरिन्द्वर्कयोश्च
औषध्यः सिद्धिदास्ता दिननिशिसमये राहुणालोकिता ये[5] ॥ १३९ ॥

[e]भौमः शुक्रो बुधेन्दू रविबुधभृगवो भौममन्त्र्यर्किमन्दाः
मन्त्री मेषादिराशौ प्रतिदिनसमये क्षेत्रिणः सर्वकालं।
शान्ता बिन्द्वर्कराशोबुधभृगुकुजमन्त्र्यर्किराशिश्च पुष्टौ
वश्या कृष्टौ वियोगे प्रभवति मरणे क्षेत्रिणोऽस्मिन् यदि स्यात् ॥१४०॥

1. CLD. तानि तानि 2. D. द्विद्वयंशे° 3. CLD. मृत्वद्या°
4. CLD. फलैका 5. L. °लौकिका ये

a. ñi ma daṅ ni zla ba'i rkaṅ pa rnams la gñi ga'i bgrod pa'i dbaṅ gis sred pas bsnun pa rnams

b. yan lag gñis gñis rnams la t'og ma'i ñin žag dbaṅ gis daṅ po ma rig yan lag bcu gñis par

c. de p'yir dus la sogs pas yan lag rnams te gžan ni dgu pa sṅar bžin gaṅ yin de rnams so

d. reg pa'i yan lag dbus der sgra gčan rgyu ba de yis zla ba ñi ma dag ni 'jin par 'gyur

e. sa skyes k'u ba gza' lag zla ba ñi ma gza' lag pa saṅs sa skyes sbags pa ñi skyes spen

शान्तावादो सितास्यं सितकनकनिभं पौष्टिके हस्तयामे
पीतं स्तम्भेऽग्नियामे कनकरविनिभं मोहनेऽब्धौ च रक्तं ।
आकृष्टौ पञ्चमे स्याद् रविजलदनिभं षष्ठयामे च वश्ये
[a]कृष्णास्यं मारणेऽद्रौ कर्षणसितमिहोच्चाटने अहो[1] निशान्ते ॥ १४१ ॥

[b]पृथ्वी तोयाग्नि वाता न शशिरविसुरा जीवभोक्तार एते[2]
एषां जीवश्च भोक्ताप्यशुभफलवशान् मन्यतेऽहञ्च भुक्तिः[3] ।
दृष्ट्वा दुःखानुरक्तो ग्रहभुजगसुरान् प्रार्थयेद् भूतवृन्दं
[c]मोक्षे यस्य प्रसादात् प्रभवति मनसस्तं न[4] शान्तिं करोति ॥ १४२ ॥

आदिश्वासोऽगुणात्मा[5] त्रिविध[6]गुणवशात् सोऽपि[7] याति त्रिसंख्यं
तिथ्याख्यास्तेऽपि जाता विषयगुणवशात्तेऽपि[8] भूयस्त्रिगुण्याः ।
जाता भूतास्त्रिसंख्या पुनरपि च चतुश्चारभेदैः तास्ते
नाड्यर्धश्वाससंख्या पुनरपि घटिका श्वाससंख्या द्विगुण्याः ॥ १४३ ॥

[d]द्वित्र्यब्धोष्वृत्वगाष्ट[9]ग्रहदशभिरियं वर्धिता कालनाडी
तस्माद् वर्गप्रभेदैः विविधपथिगता[10] कालनाडी समन्तात् ।
त्रैलोक्यं पूरयन्तो सकलसुखफलदा चन्द्रसूर्यप्रचारात्[11]
यावद्वेदाह्निवह्निः प्रभवति नियता कर्तिका शुक्तिहस्ता ॥ १४४ ॥

---

1. CLD. °ऽहो 2. L. एव 3. CLD. मुक्तिः
4. CLD. °च 5. D. °श्वासो गुणात्मा 6. CLD. विविध°
7. CLD. सापि 8. CLD. °वशास्ते° 9. CLD. °पृत्वगा°
10. CLD °पथ° 11. CLD. °सूर्यप्रचारा

a bsaṅ la nag pa'i žal te ri bo la'o bskrad la nag daṅ dkar 'dir klu la mo'an mo'i mt'ar

b sa č'u me rluṅ ri boṅ čan daṅ ñi ma lha ste 'di rnams srog ni loṅs spyod byed po min

c gaṅ gi driṅ gyis t'ar bar rab tu 'gyur pa yid kyis ži ba de ni byed pa ma yin no

d gñis gsum č'u gter mdu' dus ri brgyad gza' daṅ bču rnams kyis ni dus kyi rca 'di 'p'el ba ste

चक्राणोष्वब्धिसंख्या विषयगुणवशात् कायवाक्चित्तभेदैः
रक्षां कुर्वन्ति भर्त्तुः[1] समसुखफलदान्यष्टधूमादिदेव्यः ।
[a]एवं सूर्यस्य भर्त्ता परमशशिकलालिङ्गितो विश्वरूपः
देवो बुद्धामराणां विषयविषयिणां राहुचन्द्रार्कवन्द्यः ॥ १४५ ॥

[b]या भर्त्तुः सूक्ष्मरूपा वरगुणविषयाभ्यन्तरा[2]बाह्यमुद्रा
डाकिन्यस्तास्त्रिधातो परमभयकराः क्रोधचित्तप्रसूताः ।
भर्त्तुर्यानीन्द्रियाणि त्रिविधभवगतं कायवाक्चित्तवज्रं
[c]तान्येते वज्रडाकाः सत्त्वविषय[3]गुणालिङ्गिता मङ्गलाद्याः ॥ १४६ ॥

रूपं शब्दो रसो गन्धमपरमपि तत् स्पर्शधूमो[4] रजश्च[5]
सत्त्वं चित्तं क्रमेण प्रकटमपि तथालिङ्गितं राहुणा च ।
[d]तेषां षट्[6]मन्दचारात्[7] विविध[8]गतिरियं शीघ्रवक्रादिचारात्
अष्टानां षट्पदेऽष्टौ खलुविषयगुणाः संस्थिताश्चक्ररूपाः ॥ १४७ ॥

[e]आदिश्वासोऽष्टभेदो विषमगुणगतश्चावृतो डाकिनीभिः
धूमाद्याभिः समन्तात् त्रिविध[9]गतिवशात् भ्राम्यते षड्गतिस्थः ।
तन्मध्ये कालचक्रः स्फुरदमृतकलालिङ्गितः शुद्धकायः[10]
यः श्वासं छेदयित्वा विशति जिनतनुं कालचक्रः स एव ॥ १४८ ॥

---

1. CLD. चत्तुः 2. D ह्यन्तरा 3. CLD. स्वस्वविषय°
4. CLD. °धर्मा
5. CLD. रसश्च ; reg bya mun pa rdul daṅ ni
6. CLD. यन् 7. CLD °चारा 8. CLD. द्विविध°
9. CLD. °विविध° 10. CLD. स्तब्धकायः ; dag pa'i sku

a. de ltar ñi ma la gnas goo bo mc'og gi ri boṅ čan gyi č'a yis 'k'yud pa sna c'ogs gzugs
b. goo bo yi ni p'ra mo'i ño bo mc'og gi yon tan yul te naṅ p'yi rol p'yag rgya gaṅ
c. de nams raṅ gi yul bčas yon tan gyis 'gyur bkra šis la sogs rdo rje mk'a' 'gro 'di rnams so
d. de dag rnams kyi dal rkaṅ drug daṅ myur 'k'yog la sogs rgyu ba las ni rnam maṅ bgrod pa 'di
e. daṅ po'i dbugs ni dbye ba brgyad te yul daṅ yon tan la gnas kun nas du ba la sogs pa/mk'a' 'gro ma rnams dag gis bskor žiṅ rnam gsum bgrod pa'i dbaṅ gis 'k'yams te 'gro ba drug tu gnas

श्वासश्छेदावसाने त्रिविध[1]गतिरियं षट्प्रकारा न चास्ति
बिन्दो रोधे समन्तात् परमविभुसुखं वर्त्ततेऽनन्तकालं ।
"त्यक्त्वा संसारसौख्यं[2] परमगुरुसुखं योगिना भावनीयं
चर्या शृङ्गाररूपां परमभयकरीं योगिनीनामतुष्टि ॥ १४९ ॥

भत्तुः श्वासे समस्तं ग्रहगणचरणं नीयते कालयोगात्
श्वासे खं खं ख खाक्ष्यग्निजलनिधिगते चोदिते सर्वशून्ये ।
[b]एते वर्षैश्च बाह्ये परमविभुपदे सृष्टिसंहाररूपे
ज्ञातव्यं स्वस्वमाने जिनपतिचरणं श्वासमध्ये गतिस्थं ॥ १५० ॥

शून्ये मन्दप्रवेशः स्वदिनगतिवशाज्जायते वै युगान्ते
[c]शून्याकाशाम्बराब्ध्यब्धि शशधरदिनैः रेवतीभोगशेषैः ।
खं खं खं खाब्धिनेत्रैः स्वगतिगतदिनैस्तत्र राहुप्रवेशः
खं खं खं खर्त्तुकालैः स्वगतिगतदिनै र्देवमन्त्रिप्रवेशः ॥ १५१ ॥

खं खं शून्याम्बराष्टाहिनयनदिवसै र्मङ्गलस्य प्रवेशः
[d]सूर्यादीनां प्रवेशः ख ख ख ख नयनाग्न्यब्धि[3]संख्यै र्दिनैश्च ।
[e]खं खं खं खाब्धिनागैकशर[4]गतदिनैस्तत्र चन्द्रप्रवेशः
तस्मिन् काले विनाशः प्रभवति जगतः स्वस्वमानेन राजन् ॥ १५२ ॥

1. P. विविध° 2. CLD. त्यक्त्वेयमां मारसौख्यं
3. CLD. नयनाक्ष्यब्धि 4. CLD. °नागैः खशर°

a. 'k'or ba dag gi bde ba spaṅs nas mč'og gi bla ma'i žal ni rnal 'byor pa yis bsgom par bya
b. lo 'di rnams kyis p'yi rol du ni mč'og gi k'yab bdag rkaṅ pa sbro daṅ bsdu ba'i ṅo bo la
c. stoṅ pa nam mk'a' mk'a' mc'o č'u gter zla ba'i ñin žag loṅs spyod lhag ma rnams kyis nam gru la'o
d. mk'a' mk'a' nam mk'a' mk'a' mig me daṅ č'u gter graṅs kyi ñi ži žag rnams kyis ñi ma la sogs 'jug
e. mk'a' mk'a' nam mk'a' mk'a' mc'o brgyad daṅ zla ba mda' yi ñin žag rnams kyis zla ba der 'jug ste

नाडोसञ्चार एष प्रभवति च ततश्चन्द्रसूर्योदिते च
एकद्वित्र्यब्धिबाणा रसगिरिवसवो वर्द्धिता गुह्यनाडो ।
ªरन्ध्राख्या वारनाड्यो भवति च दशमो सूक्ष्मनाड्यूर्ध्व[1]मार्गे
भूयः सा वर्गभिन्ना सगुणसविषयाश्चक्रनाड्यो भवन्ति ॥ १५३ ॥

उष्णीषे हृत्प्रदेशे शिरसि शशिपदे कण्ठदेशेऽर्कचारे
ᵇनाभौ वै चक्रनाड्या युगभुजगनृपाश्चन्द्रचारै[2]रभिन्नाः ।
द्वात्रिंशत्तद् द्विगुण्याः सकलरविपदे मिश्रितैरप्यभिन्नाः
एकाशीतिः शतं[3] यत् करचरणगताः सन्धिनाड्यो द्विभेदाः ॥ १५४

उष्णीषे हृत्प्रदेशे शशिरविचरणे कण्ठचक्रेऽवशेषाः
ᶜएकाशीत्यन्तिमा या[4] प्रकटदशविधास्ते ग्रहाः सौम्यरौद्राः ।
तेषामाद्यन्तभागं विभुचरणगतं भुज्यते कालनाड्या[5]
वारान्तं चापि भुंक्ते त्रिभुवनजननो डाकिनी वज्रदेहा ॥ १५५ ॥

आदौ या शून्यरूपा विषयगुणगता तत्स्वभावा बभूव
धातुस्कन्धान् प्रविष्टा पुनरपि च समा चक्षुरादोन्द्रियेषु ।
जाग्रत्स्वप्नादिविष्टा परमसुखसमानाहते संप्रविष्टा
सा विद्या बुद्धमाता कुलिशपदगता योगिनान्वेषणीया ॥ १५६ ॥

1. CLD. °नाड्यर्ध°
2. D. °वारै°
3. CLD. शयं
4. D. °त्यन्तिमाया
5. CLD. °नाड्यां° ; dus kyi rca yis loṅs spyod čiṅ

a. bug pa žes bya sgo yi rcar 'gyur bču pa p'ra mo'i rca na slar yaṅ steṅ gi lam du'o
b. lte bar 'k'or lo'i rca ni dus daṅ lag 'gro mi bdag zla ba'i rkaṅ pa rnams kyis t'a daṅ min
c. brgyad ču rca gčig mt'ar t'ug rab gsal rnam bču gaṅ yin de dag ži daṅ drag po'i gza' rnams te

भत्तुः कायप्रभावाद् भवति वरतनौ योगिनां दिव्यचक्षुः
श्रोत्रं तद् वाक्प्रभावात् परहृदयगतं ज्ञायते तस्य चित्तात् ।
प्रज्ञाकायप्रभावात् त्रिविधभवगता [a]पूर्वजानुस्मृतिः स्यात्
प्रज्ञा या वाक्प्रभावात् प्रभवति खसमा सर्वदा[1] सर्वगर्द्धिः ॥ १५७ ॥

प्रज्ञाज्ञानस्वभावाद् भवति समसुखं सर्वदाऽनाहतं यत्
अक्षणादृश्यं[2] त्रिविश्रमपि[3] भवं दिव्यचक्षुः प्रभावात् ।
दिव्यश्रोत्रप्रभावात् हृदयसुखरवः श्रूयते प्राणिनोक्तः
एवं स्पर्शादिसर्वं भवति नरपते कायवाक्चित्तयोगात् ॥ १५८ ॥

या नाड्योऽपानमध्ये त्रिविधपथगता मूत्रविट्शुक्रवाहाः
प्राणात्तासां प्रचारो भवति नवविधश्चान्तिमो बुद्धवक्त्रे ।
श्रोत्रे घ्राणे च नेत्रे द्विविध इति [b]भवेल्लम्बिकायां सजिह्वे
बिन्दावुष्णीषरन्ध्रे भवति च दशमी [c]मुद्रितोऽज्ञानिनां[4] यः ॥ १५९ ॥

[d]प्राणापाने निरुद्धे क्षुभितशशधरः सूर्यबिम्बं प्रयाति
[e]अब्जे वज्रप्रबुद्धे द्रवति पुनरसौ सूर्यबिम्बार्चिषा वै ।
विज्ञानं ज्ञानमेकी भवति च मरुता चन्द्रसूर्ये निरुद्धे
एवं चैवं तथैवं त्रिविधमपि भवेन् नापरं किञ्चिदस्ति ॥ १६० ॥

1. CD. सर्वगा ; t'ams cad dus su kun 'gro'i rju 'p'rul tu rab 'gyur
2. CLD. अक्षादृश्यं, mig gis ma mt'on ba
3. L. त्रिधातौ विविधमपि 4. D. ज्ञानिनां,
5. PP[1]. वज्रे पद्मप्रबुद्धे

a. snon gyi skye ba rjes su dran par 'gyur
b. lce'u c'un ni lce dan bcas pa dan
c. bcu pa ses pa min pa rnams la rgya yis btab pa gan
d. srog dan t'ur sel 'gags par gyur na ri bon 'jin pa bskyod pa ñi ma'i gzugs su rab tu 'gyur
e. rdo rje pad mas rab tu sad na slar yan 'di ni ñi ma'i gzugs kyi me lces zu bar byed

ग्रस्ते चन्द्रार्कबिम्बे नभसि न च दिवा नैवरात्रिः कदाचित्
सा सन्ध्या देहमध्येप्यमृतपदगता योगिनां सर्वकालं ।
पक्षक्षीणो यथेन्दु र्व्रजति समरसं सूर्यबिम्बेऽम्बरस्थः
प्राणापानक्षये वै स्फुटमपि च तनौ सिद्धिकाले स रोधः ॥ १६१ ॥

नष्टे चन्द्रार्कबिम्बेप्युभयपथि सदा प्राणवाते निरुद्धे
[a]अब्जे वज्रप्रबुद्धे द्रुतशशिनि महासूर्यबिम्बे प्रविष्टे ।
भावाभावैकभूते त्रिविधभवगतेऽनाहते संप्रबुद्धे
तस्मिन्काले स योगी व्रजति परपदं न द्वयं यस्य[1] किञ्चित् ॥ १६२

क्रोधाबुद्धाः सदेव्यः खलु रसकुलिशा भूमिगर्भादयश्च
प्रत्यक्षाः खे भवन्ति प्रमुदितहृदया योगिनः सिद्धिकाले ।
प्रत्युषे चाधंरात्रे भवति शशिदिने चेष्टसिद्धिश्च तस्य
[b]रत्नै र्वा पुष्पवृष्टि र्भवति भुवितले कालयोगात् प्रकृष्टा[2] ॥ १६३ ॥

स्वच्छः कायोऽणुनष्टः प्रभवति खसमो लक्षणाद्यैः प्रपूर्णः
[c]स्वच्छं त्रैलोक्यमेवावरण[3]विरहितं स्वप्नवद् भाति विश्वं ।
भाषाऽच्छिन्ना[4] समन्तात् परहृदयगतानेकभाषान्तरेण
चित्तं सत्सौख्यपूर्णं न चलति सहजालिङ्गितं सर्वकालं ॥ १६४ ॥

1. CLD. कस्य 2. CLD. प्रहृष्टा 3. L. °चरण°
4. D. भाषा छिन्ना, skad ni kun nas č'ad pa med čiṅ

a. č'u skyes rdo rje rab tu sad čiṅ ri boṅ čan žu ñi ma'i gzugs č'en la ni rab tu žugs
b. rin po č'e 'am me tog č'ar ni mč'og gyur dus kyis sbyor bas sa yi steṅ du 'bab par 'gyur
c. sna c'ogs 'jig rten gsum po ñid ni naṅ žiṅ sgrib pa rnam par bral ba rmi lam bžin du snaṅ

[a]भूमेराकृष्य चाणुं[1] जलशिखिपवनं प्रेषयेत्तोयधातौ
[b]तोयाद् भूवह्निवायुं शिखिनि च शिखिनो[2] भूमितोयानिलाणुं ।
वायौ चाकृष्य वायोः क्षितिजलशिखिनं कर्मवातश्च शून्ये
अन्यं[3] क्षेत्रं गतान्ये त्रिविधभववशात् कर्मवाताहता ये ॥ १६५ ॥

बुद्धक्षेत्रं समस्तं त्रिभुवनजनकोऽकर्मकं वीक्षयित्वा
[c]शुद्धाणौ सर्वबुद्धा उभयसमरसे वेष्टिते बोधिसत्त्वाः[4] ।
[d]प्रत्येकैकरसाणावुभयकुलवशाद् वेष्टिते वज्रपुत्राः[5]
[e]भूम्याद्याश्चाम्बरान्ताः[6] सकलकुल[7]गताश्चाचलाद्यां प्रविष्टा । १६६।

तैः सार्धं वज्रसत्त्वो विहरति गगने वर्त्तकालं[8] हि यावत्
धत्ते सन्धारणोणुं क्षितिजलहुतभुग्वायुशून्यस्वभावं ।
मन्थानो मन्थयन्ति पृथगणुसकलं यावदेकत्वमेति
तेषामन्योन्ययोगः पुनरपि च भवेत् मुख्यभावेऽन्यभावः ॥ १६७ ॥

बुद्धक्षेत्रं समस्तं विरचयति महासर्वसंस्थानवायुः
प्रत्येके लोकधातौ पुनरपि च [f]महाचक्रवालं समन्तात् ।
तन्मध्ये लोकधातुः प्रभवति च महाकर्मभूमिस्वभावः
शेषाभोगस्वभावाः विषयसुखकराः सर्वरत्नप्रपूर्णाः ॥ १६८ ॥

1. D. चाश्वं 2. CLD. शशिनो 3. D. अन्ये
4. CLDP. वज्रपुत्राः 5. CLDP. बोधिसत्त्वाः
6. CLD. °श्चासुरान्ताः 7. CLD. °गुण°
8. D. °चत्त°, 'č'ags pa'i dus kyi bar du

a. sa las č'u dan rce mo čan dan kluṅ gi rdul p'ran p'ye nas č'u yi k'ams la 'jug par byed
